ॐ गं गणपतये नमः शुद्धोदक स्नानं समर्पयामि।

फलम्—ॐ पुष्पंवतीः प्रसूमंतीः फलिनीरफला उत। संमातरं इव दुह्रामस्मा अरिष्टतांतये ॥ *(अथर्ववेद ८.७.२७)*

ॐ गं गणपतये नमः फल स्नानं समर्पयामि। फल स्नान के बाद शुद्ध जल से स्नान करायें।

ॐ ब्राह्मणों स्य मुखंमासीद्बाहू राजन्यों भवत्। मध्यं तदंस्य यद्वैश्यः पद्भयां शूद्रो अंजायत ॥ *(अथर्ववेद १६.६.६)*

ॐ आदित्यवर्णो तपसोऽधिंजातो वनस्पतिस्तवं वृक्षोऽथ बिल्वः।

तस्य फलांनि तपसा नुंदन्तु मा यान्तंरा याश्चं ब्राह्या अंलक्ष्मीः ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

(अगर गणेश जी का ही होम या पूजा हो तो अथर्वशीर्ष एवं गणेश सूक्त के मन्त्रों से अभिषेक करना चाहिये।)

ॐ गं गणपतये नमः शुद्धोदक स्नानं समर्पयामि॥

वस्त्रम्— ॐ चन्द्रमा मनंसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रंश्चाग्निश्चं प्राणाद्वायुरंजायत ॥ *(अथर्ववेद १६.६.७)*

ॐ उपैंतु मां देंवसखः कीर्तिश्च मणिंना सह। प्रादुर्भूतोऽस्मिं राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातुं मे ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः वस्त्रं समर्पयामि। (रूई का वस्त्र प्रतिदिन बदलना चाहिये। पीताम्बर, रेशम या मडि वस्त्र पूजा में रखने पर दूसरे दिन भी उसे झाडकर पुनः गायत्री मन्त्र से प्रोक्षण कर दुबारा उस उपयोग में ला सकते हैं।)

यज्ञोपवीतम्—ॐ यज्ञोपवीतं परंमं पवित्रं प्रजापंतेर्यत् सहजं पुरस्तांत्।

आयुष्यमग्र्यं प्रतिमुंञ्चशुभ्रं यज्ञोपवीतं बलमंस्तु तेजः ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ विराडग्रे समंभवद्विराजो अधि पूरुंषः। स जातो अत्यंरिच्यत पश्चाद्भूमिमथों पुरः ॥ *(अथर्ववेद १६.६.६)*

ॐ क्षुत् पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः यज्ञोपवीतं समर्पयामि। दो यज्ञोपवीत। वस्त्र एवं यज्ञोपवीत। देने के बाद आचमनम्। ॐ गं गणपतये नमः आचमनं समर्पयामि।

आभरणम्—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्वं ईषिरे।
तत् त्वां चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ *(अथर्ववेद १९.२६.२)*

ॐ गं गणपतये नमः। आभरणं समर्पयामि।

गन्धम्— ॐ नाभ्यां आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ *(अथर्ववेद १९.६.८)*
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः गन्धं समर्पयामि।

अक्षताः—ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ *(अथर्ववेद २०.९२.५)*

ॐ गं गणपतये नमः अक्षतान् समर्पयामि।

पुष्पाणि—ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ *(अथर्ववेद १९.६.९)*
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः पुष्पाणि समर्पयामि। इसके पश्चात् गणेश मण्डल के अङ्गपूजा

प्रथमवरण पूजनम्—(पुष्प चढ़ायें)—आग्नेय में—गां हृदयाय नमः। ईशान में—गीं शिरसे स्वाहा नमः। नैऋत्य में—गूं शिखायै वषट् नमः। वायव्य में— गैं कवचाय हुं नमः। अग्नेय में गौं नेत्रत्रयाय वौषट् नमः। गः अस्त्राय फट् नमः। गङ्गणपतये नमः। प्रथमावरणपूजां समर्पयामि।

सूत्र—पूज्य पूजकयोर्मध्ये या सा प्राची प्रकीर्तिता। प्रतिष्ठित देवता जिस भी दिशा को देख रहे हैं। शास्त्रों के अनुसार वही पूर्व दिशा मान्य है। इसी के आधार पर शेष दिशाओं का निर्धारण करना चाहिये। जहाँ देवता पूर्वाभिमुख है वहाँ दिशाये यथावत् रहेंगे।

द्वितीयावरण पूजा—ॐ गं गणंजयाय नमः—(पूर्व में)। ॐ गिं विघ्नेशाय नमः—(आग्नेय में)। ॐ गुं एकदंष्ट्रय नमः—(दक्षिण में)। ॐ गृं वीराय नमः—(नैऋत्य में)। ॐ ग्लृं गजवक्त्राय नमः—(पश्चिम में)। ॐ गें लम्बोदराय नमः—(वायव्य में)। ॐ गों वरदाय नमः—(उत्तर में)। ॐ गं भक्तप्रियाय नमः—(ईशान में)। ॐ गं गणपतये नमः। द्वितीयावरणपूजां समर्पयामि।

तृतीयावरण पूजा—इस पूजन के समय दिक्पाल अपनी-अपनी दिशा में ही रहते है। अतः वास्तव दिशाओं में ही इनका पूजन करना चाहिये।

तृतीयावरण पूजा—पूर्वे इन्द्रं—ॐ लं इन्द्राय सुराधिपतये पीतवर्णाय शची समेनाथ वज्रहस्ताय ऐरावतवाहनाय सशक्तिकाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सर्वालंकार भूषिताय गणेश मूर्ति पार्षदाय नमः। आग्नेये अग्निं—ॐ रं अग्नये तेजोधिपतये पिंङ्गल वर्णाय स्वाहा समेताय शक्तिहस्ताय मेषवाहनाय सशक्तिकाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सर्वालंकार भूषिताय गणेशमूर्ति पार्षदाय नमः। दक्षिणे यमं—ॐ डं यमाय प्रेताधिपयते श्यामला समेताय, कृष्णावर्णाय, दण्डहस्ताय, महिषवाहनाय सशक्तिकाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सर्वालंकार भूषिताय गणेशमूर्ति पाषर्दाय नमः। नैऋत्ये निऋतिं—ॐ क्षं निर्ऋतये रक्षोधिपतये रक्षा समेताय, रक्तवर्णाय खङ्गहस्ताय नरवाहनाय सशक्तिकाय, साङ्गाय, सायुधाय, सवाहनाय, सपरिवाराय सर्वलंकार भूषिताय गणेशमूर्मि पार्षदाय नमः।

पश्चिमें वरुणम्—ॐ वं वरुणाय जलाधिपतये सिद्धा समेताय, शुभ्रवर्णाय, पाशहस्ताय, मकरवाहनाय सशक्तिकाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सर्वालंकार भूषिताय गणेशमूर्ति पार्षदाय नमः। **वायव्ये वायुं**—ॐ यं वायवे प्राणाधिपतये, धूम्रवर्णाय अंजना समेताय, अङ्कुशहस्तायय वाहनाय सशक्तिकाय साङ्गाय, सायुधाय, सवाहनाय, सपरिवाराय, सर्वालंकार भूषिताय गणेशमूर्ति पार्षदाय नमः। **उत्तरे सोमं**—ॐ सोमाय नक्षत्राधिपतये शुक्लवर्णाय गदाहस्ताय रोहिणी समेताय अश्ववाहनाय सशक्तिकाय, साङ्गाय, सायुधाय, सवाहनाय, सपरिवाराय, सर्वालंकार भूषिताय गणेशमूर्ति पार्षदाय नमः। **ईशाने ईश्वरं**—ॐ हं ईशानाय विद्याधिपतये पार्वती समेताय, स्फटिकवर्णाय, त्रिशूलहस्ताय, वृषभ वाहनाय सशक्तिकाय साङ्गाय सायुधाय स वाहनाय सपरिवाराय सर्वालंकार भुषिताय गणेशमूर्ति पार्षदाय नमः। **आकाशे ब्रह्मणं**—ॐ यं ब्रह्मणे लोकाधिपतये सरस्वतीसमेताय शुभ्रवर्णाय पाशहस्ताय हंस वाहनाय सशक्तिकाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सर्वालंकार भूषिताय गणेशमूर्ति पार्षदाय नमः। **पाताले अनन्तं (विष्णुं)**—ॐ ऐं अनन्ताय

नागाधिपतये क्षीरवर्णाय चक्रहस्ताय लक्ष्मी समेताय गरुडवाहनाय सशक्तिकाय साङ्गाय सायुधाय स वाहनाय सपरिवाराय सर्वालंकार भूषिताय गरोशमूर्ति पार्षदाय नमः। तृतीयावरण पूजां सर्मपयामि।

चतुर्थावरण पूजनम्— ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खङ्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ चक्राय नमः। ॐ पाषाय नमः। ईशाने ब्रह्माणं नैऋत्ये अनन्तं पूजयेत्। अग्रे—कुम्भोदराय नमः। (कुम्भोदर गणेश जी के नैमलिय धारण करने के अधिकारी है। उत्तर ईशान के बीच इनका वास है।) *(गणेश जी के पूजन प्रधान होने पर यहाँ फूलों से या दूर्वा से सहस्त्रनामादि कर सकते हैं।)*

धूपम्— वनस्पति रसोत्पन्नो गन्धाढ्यः सुमनो हरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥ *(प्रयोगरत्नाकर)*

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ *(अथर्ववेद १९.६.१०)*

ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः धूपं आघ्रापयामि।

दीपम्— साज्यं चिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥ *(ब्रह्मकर्म समुच्चय)*

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेनं देवा अयजन्त साध्या वसवश्च ये॥ *(अथर्ववेद १९.६.११)*

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः। दीपं दर्शयामि। धूपं दीपानन्तरं आचमनीयं समर्पयामि।

नैवेद्यम्— नैवेद्य रखने के स्थल पर मण्डल बनायें। विश्वामित्र ऋषिः। देवी गायत्री छन्दः। सविता देवता। निवेदने विनियोगः। एक बार गायत्री मन्त्र से नैवेद्य पर प्रोक्षण करें। सत्यं त्वर्तेन परिषिञ्चामि, इन मन्त्र से दिन में, एवं ऋतं त्वासत्येन परिषिञ्चामि, इन मन्त्र से रात्रि में परिषिञ्चन करें। यथा सम्भव नैवेद्यं निरीक्षस्व, कहकर प्रार्थना करें। अमृतोपस्तरणमसि मन्त्र से जल छोडें। बायें हाथ में ग्रास मुद्रा (जैसे बछड़े को घास खिलाते हैं) एवं दाहिने हाथ से निम्न मुद्राओं से देवता को नैवेद्य अर्पण करें। मन में कल्पना करें कि भगवान् को खिला रहे हैं।

प्राणाय स्वाहा—अङ्गुष्ठ एवं कनिष्ठिका मिलाकर, अपानाय स्वाहा—अङ्गुष्ठ एवं तर्जनी मिलाकर व्यानाय स्वाहा—अङ्गुष्ठ एवं मध्यमा मिलाकर, उदानाय स्वाहा—अङ्गुष्ठ एवं अनामिका मिलाकर, समानाय स्वाहा—सभी अङ्गुलियों को मिलाकर।

ॐ तस्मा॒दश्वा॑ अजायन्त॒ ये च॒ के चो॑भ॒याद॑तः। गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑॥ (अथर्ववेद १९.६.१२)

ॐ गं गणपतये नमः। क्रमुक ताम्बूलं समर्पयामि।

ताम्बूल के पश्चात् नीराजन (आरती)

ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऋचः॒ सामा॑नि जज्ञिरे। छन्दो॑ ह जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत॥ (अथर्ववेद १९.६.१३)

ॐ एह या॑तु वरु॑णः सोमो॑ अ॒ग्निर्बृह॒स्पति॒र्वसु॑भि॒रेह या॑तु।

अ॒स्य श्रिय॑मुप॒संया॑त॒ सर्व॑ उ॒ग्रस्य॑ चे॒त्तुः सं॑मनसः सजाताः॥ (अथर्ववेद ६.७३.१)

ॐ गं गणपतये नमः। मङ्गल नीराजनं दर्शयामि। कुर्यादारार्तिकं पञ्चवर्तिका मनुसंख्यया। पादयोश्च चतुर्वारं द्विः कृत्वोनाभि मण्डले। एककृत्वो मुखे सप्त कृत्वः सर्वाङ्ग एव हि॥ नीराजन में पाँच बाती हो पादो को चार बार नाभि मण्डल में दो बार, मुख को एक बार एवं सम्पूर्ण शरीर को सात बार आरती करनी चाहिये।

मन्त्र पुष्पम्—ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॒ संभृ॑तं पृषदा॒ज्य॑म्। प॒शूँस्तांश्च॑क्रे वाय॒व्या॑ नार॒ण्या ग्राम्याश्च ये॥ (अथर्ववेद १९.६.१४)

ॐ इ॒मा या ब्र॑ह्मणस्पते॒ विषू॑ची॒र्वात॒ ईर॑ते। स॒ध्रीची॑रिन्द्र॒ ताः कृ॒त्वा मह्यं॑ शि॒वत॑मास्कृ॑धि

स्व॒स्ति नो॑ अस्त्वभ॑यं नो अस्तु नमो॑ऽहोरा॒त्राभ्या॑मस्तु॥ (अथर्ववेद १९.८.६)

ॐ आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं सु॒वर्णां॑ हेम॒मालि॑नीम्।

सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ गं गणपतये नमः। मन्त्रपुष्पं समर्पयामि। (इन मन्त्रों से गणेश जी पर फूल चढायें।)

प्रदक्षिणा नमस्कार—यानि कानि च पापानि जन्मान्तर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिण पदे-पदे॥ *(स्मृति संग्रह)*

ॐ सप्तास्यांसन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥ *(अथर्ववेद १९.६.१५)*

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्॥ *(स्मृति संग्रह)*

(इन मन्त्रों से प्रदक्षिणा करनी चाहिये।) ॐ गं गणपतये नमः। प्रदक्षिणानमस्कारान् समर्पयामि।

प्रसन्नार्घ्यं—ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्॥ *(स्मृति संग्रह)*

इदमर्घ्यम्, इदमर्घ्यम्, इदमर्घ्यम्॥ (इस पूरी प्रक्रिया को तीन बार करना चाहिये, जल छोड़ना चाहिये।)

उत्तरपूजनम्—ॐ छत्रं समर्पयामि, चामरेणावीजयामि, गीतं गायामि, नाट्यं नटामि, आन्दोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्तराजोपचार देवोपचार पूजां समर्पयामि।

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि॥ *(अथर्ववेद १९.६.१६)*

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ गं गणपतये नमः। सर्वोपचार पूजां समर्पयामि।

प्रार्थना—ॐ वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ *(याजुषपूर्व प्रयोग रत्नाकर)*

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ *(स्मृति संग्रह)*

ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना॥ *(भगवद्गीता)*

ॐ गं गणपतये नमः। अनेन महागणपतिः प्रीयताम्। (यहाँ पर गणेश पूजन संपन्न हुआ।)

प्रथम दिन द्वितीय प्रहर

पञ्चगव्य मण्डल (प्रथम विधान)

१-पूर्व में गोमूत्र

२-पश्चिम में दूध

३-दक्षिण में गोमय

४-उत्तर में दहि

५-आग्नेय में घी

६-वायव्य में कुशोदक

७-प्रधान पात्र मध्य में

पञ्चगव्य प्राशन—मङ्गलार्थं शुभार्थं च आरम्भे पुण्यकर्मणाम्। निर्विघ्नेन फलावाप्त्यै पुण्याहं कथ्यते बुधैः ॥ *(लक्षण संहिता)*

मङ्गल के लिए, शुभ के लिए, निर्विघ्नता से फल प्राप्ति के लिए, सभी पुण्य कार्यों के आरम्भ में पुण्याह करना आवश्यक है।

पञ्चगव्य विधनस्य लक्षणं कथ्यतेऽधुना। शैवे च वैष्णवे चैव साधारणमतः परम् ॥ *(लक्षण संहिता)*

शैव एवं वैष्णव सभी संप्रदायों में समान पञ्चगव्य विधान बता रहे हैं।

स्वस्तिके व्रीहिसंपूर्णे न्यस्त्वा पात्रमधोमुखम्। मन्थानं चोपरि न्यस्य सकूर्च फलपुष्पकम् ॥ *(लक्षण संहिता)*

स्वस्तिक मण्डल में चालों को एक केले के पत्ते में रखें। पात्र को नीचे मूँह करके रखें। मथनी को उसके ऊपर रखें। कूर्च एवं फल पुष्प को भी उस उल्टे किये बर्तन पर रखें। स्वस्तिक मण्डल अलग पन्ने में लिखा है। चार दिशाओं में एवं आग्नेय वायव्य में छः कटोरे उल्टा कर रखें। करशुद्धिं पुराकृत्य प्राणायाम त्रयं चरेत्। पहले हाथें को धोकर उसके बाद तीन बार प्राणायाम करें। (प्राणायाम विधान गणेश पूजन में है।)

स्ववामाग्रे गुरुं पूज्य दक्षिणे गणनायकम्। *(लक्षण संहिता)*

(पहले हि गुरु गणेश पूजन हुआ है। अतः ॐ गुं गुरवे नमः कहकर गुरुमण्डल पर एवं ॐ गं गणपतये नमः कहकर गणेश जी पर फूल चढ़ायें।)

अस्त्रेण प्रोक्ष्य पात्रं तदुपरि विशदानक्षतान् क्षिप्य। तारेणास्मिन् मूलेन पुष्पं पृथगारिमनुना धूपदीपौ प्रदर्श्य ॥
उत्तानीकृत्य पुष्पाक्षतमपि विधिना सोक्तमन्त्रैश्च गव्या।
नेकैकान् प्रोक्त संख्यान्यपि च करमनुक्षाल्य संपूजयेत् च ॥ *(लक्षण संहिता)*

पहले उल्टा किये सात बरतनों पर ॐ गः अस्त्राय फट् कहकर पानी छोड़े उसके ऊपर अक्षता डालें। फिर पुष्प धूप दीप का अर्पण करें। फिर एक-एक

को उल्टा कर सही रूप में रखें। एवं उनका भी अक्षत पुष्प धूप दीप से पूजन करें।

गोमूत्रं स्थापयेत् पूर्वं गोमयं दक्षिणे स्मृतम्। क्षीरं तु पश्चिमे स्थाप्य उत्तरे दधि संस्मृतम्॥
आग्नेयान्तु घृतं प्रोक्तं वायव्यान्तु कुशोदकम्। *(स्मृति संग्रह)*

गोमूत्र के बरतन को पूर्व दिशा में रखें, गोमय बरतन को दक्षिण में रखें, दूध के बरतन को पश्चिम दिशा में, उत्तर में दहि के बरतन को आग्नेय दिशा में घी के बरतन एवं वायव्य दिशा में कुशोदक के बरतन को रखें।

पात्र में डालने योग्य पञ्चगव्यों का प्रमाण—

गोमूत्रमेकमानं स्यात् अर्धमानं तु गोमयम्। क्षीरं सप्तगुणं प्रोक्तं दधि त्रिगुणमुच्यते॥
सर्पिरेकगुणं तद्वत् कुशोदकमुदीरितम्। गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्॥
द्रव्याणि क्रमशः प्रोक्त लक्षणानि च संग्रहेत्। रक्तगोमूत्रमुद्दिष्टं कृष्णगोर्गोमयं स्मृतम्।
पयः पल्लवयाम्राया: श्वेतगोर्दधि संग्रहेत्॥ कपिलाया घृतं ग्राह्यं कुशाग्राभ्यां कुशोदकम्॥ *(लक्षण संहिता)*

यहाँ पर प्रत्येक गव्य संग्रह के लिए निर्दिष्ट गाय बताये गये है सम्भव न होने पर देशी गायों से संग्रह कर सकते हैं।

रक्त वर्णीय गाय से संगृहीत गोमूत्र एक प्रमाण	—	५० ग्राम
काली गाय से संग्रहीत गोमय (गोबर) अर्घ प्रमाण	—	२५ ग्राम
पत्ते के साम्रवर्णीय गाय से संगृहीत दूध सात प्रमाण	—	३५० ग्राम
सफेद गाय से संगृहीत दधि का तीन प्रमाण	—	१५० ग्राम

कपिला (सफेद रक्त वर्ण मिश्रित) गाय से संगृहीत घी एक प्रमाण — ५० ग्राम
कुश के अग्रों के दो टुकड़े एक प्रमाण पानी मे — ५० ग्राम
कुल — ६७५ ग्राम

इस प्रमाण से वस्तुओं का सङ्ग्रह करें। एवं पहले पात्रों में इन द्रव्यों को भरें। प्रधान पात्र खाली रखें। एक-एक पात्र में देवताओं का आवाहन करें।

गोमूत्रे देवतादित्यः गोमये वायुरीरितः। सोमं तु क्षीरे ह्यावाह्य दध्नि शुक्रं समर्चयेत्॥
घृते त्वग्निं तु संस्थाप्य गंधर्वं तु कुशोदके। *(बोधायनीय प्रयोगमाला)*

गोमूत्र में सूर्य का आवाहन—ॐभूः गोमूत्रे आदित्याय नमः आदित्यं आवाहयामि। ॐभुवः आदित्याय नमः आदित्यं आवाहयामि। ॐस्वः आदित्याय नमः आदित्यं आवाहयामि। ॐभूर्भूवः स्वः आदित्याय नमः आदित्यं आवाहयामि। स्थापयामि। पूजयामि।

गोमय मे वायु का आवाहन—ॐभूः वायवे नमः वायुं आवाहयामि। ॐभुवः वायवे नमः वायुं आवाहयामि। ॐस्वः वायवे नमः वायुं आवाहयामि। ॐभूर्भुवः स्वः वायवे नमः वायुं आवाहयामि। स्थापयामि पूजयामि।

गोदुग्ध में सोम का आवाहन—ॐभूः सोमाय नमः सोमं आवाहयामि। ॐभुवः सोमाय नमः सोमं आवाहयामि। ॐस्वः सोमाय नमः सोमं आवाहयामि। ॐभूर्भुवः स्वः सोमाय नमः सोममावाहयामि। स्थापयामि। पूजयामि।

दहि में शुक्र का आवाहन—ॐभूः शुक्राय नमः शुक्रमावाहयामि। ॐभुवः शुक्राय नमः शुकमावाहयामि। ॐस्वः शुक्राय नमः शुक्रमावाहयामि। ॐभूर्भुवस्वः शुक्राय नमः शुक्रमावाहयामि। स्थापयामि। पूजयामि।

घी में अग्नि का आवाहन करें। ॐभूः अग्नये नमः अग्निमावाहयामि। ॐभुवः अग्नये नमः अग्निमावाहयामि। ॐस्वः अग्नये नमः अग्निमावाहयामि। ॐभूर्भुवः

स्वः अग्नये नमः अग्निमावाहयामि। स्थापयामि। पूजयामि।

कुशोदक में गन्धर्व का आवाहन करें। ॐ भूः गन्धर्वाय नमः। गन्धर्वमावाहयामि। ॐ भुवः गन्धर्वाय नमः। गन्धर्वमावाहयामि। ॐ स्वः गन्धर्वाय नमः। गन्धर्वमावाहयामि। ॐ भूर्भुवः स्वः गन्धर्वाय नमः। गन्धर्वमावाहयामि। स्थापयामि। पूजयामि। छ कटोरियों में देवताओं का आवाहन संपन्न हुआ।

अब संक्षेप में सब का पूजन करें। ॐ आवाहित देवताभ्यो नमः। ॐ लं पृथिव्यात्मना गन्धं कल्पयामि। ॐ हं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अंबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचारपूजां समर्पयामि। इसके पश्चात् निम्न मन्त्रों से प्रधान पात्र में पूरण करें। भरें।

गोमूत्र पूरण मन्त्र—**ॐ तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। धियो॒ यो नः॑ प्रचो॒दया॑त्।**

गोमय पूरण मन्त्र—**ॐ गन्धद्वा॒रां दु॑राध॒र्षां नि॒त्यपु॑ष्टां करी॒षिणी॑म्। ईश्वरीं॑ सर्व॑भूता॒नां ताम्हि॒होप॑ह्वये॒ श्रियम्॥** *(पञ्चम मण्डलस्य परिशिष्टम्)*

दूध भरने का मन्त्र—**ॐ सं सिञ्चामि॒ गवां॑ क्षी॒रं समाज्येन॒ बलं॒ रस॑म्।**

संसि॑क्ता अ॒स्माकं॑ वी॒रा ध्रुवा गावो॒ मयि॒ गोप॑तौ॥ *(अथर्ववेद २.२६.४)*

दहि भरने का मन्त्र—**ॐ दधि॒क्राव्णो॑ अकारिषं जि॒ष्णोरश्व॑स्य वा॒जिनः॑।**

सु॒रभि नो॒ मुखा॑ कर॒त्प्र ण॒ आयूं॑षि तारिषत्॥ *(अथर्ववेद २०.१३७.३)*

घी भरने का मन्त्र—**ॐ घृतं ते॑ अग्ने दि॒व्य स॒धस्थे॑ घृतेन॒ त्वां मनु॑र॒द्या समि॑न्धे।**

घृतं ते॑ दे॒वीर्न॒प्त्य॑ऽ आ वहन्तु घृतं॑ तुभ्यं॑ दह्रतां॒ गावो॑ अग्ने॥ *(अथर्ववेद ७.८२.६)*

कुशोदक भरने का मन्त्र—**ॐ दे॒वस्य॑ त्वा सवि॒तुः प्रस॒वेऽश्विनो॑र्बा॒हुभ्यां॑ पूष्णो हस्ता॑भ्याम् प्रसू॑त आ र॑भे॥** *(अथर्ववेद १९.५१.२)*

अब मन्त्रों से प्रधान पात्र में भरने के बाद निम्न मन्त्रों से मन्थन करें। (मथनी से)

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

उपरोक्त मन्त्रों से मन्थन करना चाहिये। तदनन्तर प्रधान पात्र में आवाहन करें। इरावती वसिष्ठो विष्णुस्त्रिष्टुप्। पञ्चगव्यमध्ये विष्णवावाहने विनियोगः।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे॥ *(अथर्ववेद ७.२६.४)*

ॐ विष्णवे नमः। ॐ भूः विष्णुमावाहयामि। ॐ भुवः विष्णुमावाहयामि। ॐ स्वः विष्णुमावाहयामि। ॐ भूर्भुवः स्वः विष्णुमावाहयामि, स्थापयामि, पूजयामि।

ॐ रुद्रस्यैलबकारेभ्योऽसंसूक्तगिलेभ्यः। इदं महास्येभ्यः श्वभ्यो अकरं नमः॥ *(अथर्ववेद ११.२.३०)*

ॐ रुद्राय नमः। ॐ भूः रुद्रमावाहयामि। ॐ भुवः रुद्रमावाहयामि। ॐ स्वः रुद्रमावाहयामि। ॐ भूर्भुवः स्वः रुद्रमावाहयामि, स्थापयामि, पूजयामि।

ॐ विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन्।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः॥ *(अथर्ववेद १.३०.१)*

ॐ विश्वेदेवेभ्यो नमः। ॐ भूः विश्वेदेवमावाहयामि। ॐ भुवः विश्वेदेवमावाहयामि। ॐ स्वः विश्वेदेवमावाहयामि। ॐ भूर्भुवः स्वः विश्वेदवमावाहयामि, स्थापयामि, पूजयामि। कलश छूकर आठ बार या एक सौ आठ बार गायत्री मन्त्र का जप करें। आवाहित देवताभ्यो नमः, षोडशोपचार पूजां समर्पयामि। (यहाँ पर संक्षेप में षोडशोपचार पूजन करना चाहिये—इसका विधान गणेश पूजन में है) इसके बाद निम्न मन्त्र से प्राशन (सेवन) करें।

ॐ यत्वगस्थि गतं पापं देहे तिष्ठति मामके। प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्। *(स्मृति संग्रह)*

यहाँ पर पञ्चगव्यप्राशन संपन्न हुआ।

इसके प्रमाण श्लोक—**शन्नो देवीति गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति चक्षीरंदधिक्राव्णो दधि क्रमात्॥**

आज्यं शुक्रमसीत्युक्तं देवस्यत्वा कुशोदकम्। पूरणे पञ्चगव्यानामिति मन्त्राः प्रकीर्तिताः॥

गाय त्र्यावाह्य पूजादि सर्वकर्म समाचरेत्। इरावती इदं विष्णुर्मानस्तोकेति शंवति॥ *(लक्षण संहिता)*

पुण्याह प्रकरणम्

मङ्गलार्थं शुभार्थं तदारम्भे पुण्यकर्मणाम्। निर्विघ्नेन फलावाप्त्यै पुण्याहः कथ्यते बुधैः॥ *(लक्षण संहिता)*

संपन्न किये जाने वाले कार्य मङ्गलमय हो, शुलफल देने वाला हो, एवं निर्विघ्नता से फल प्राप्ति हो इसलिए सभी कार्यो में पुण्याह वाचन अनिवार्य है।

अत्र हेमाद्रौ दानकाण्डे बह्वचपरिशिष्टत्वेनोक्तः

सकल साधारण शिष्टाचार प्राप्तश्च पुण्याह वाचन प्रयोगो लिख्यते। हेमाद्रि ग्रन्थ के दानकाण्ड में बहुत से ऋषियों के मत से कहा गया अधिक रूप से समाज में प्रचलित पुण्याहविधान बता रहे है। **कृतमङ्गलस्नानः** = पहले मङ्गल स्नान करें। **स्वलंकृतः** = मस्तक में सप्रदाय चिन्हों से अलंकृत हो। **संभृत मङ्गल संभारोः** = सभी मङ्गल द्रव्यों को एकत्र करें। **मङ्गलल रंगवल्ली मंडित शुद्ध स्थलेः** = मङ्गलमय रंगोली से सुशोभित पवित्र स्थल पर। **प्राङ्मुखो यजमानः** = यजमान पूर्व दिशा की ओर मूँह कर बैठें। **ऊर्णा वस्त्राद्याच्छादिते पीठे उपविश्यः** = ऊनी वस्त्रादि से आच्छादित पीठ पर बैठकर।

यदि गृहस्थ हो तो—पत्नीं स्वदक्षिणतः प्रांङ्गमुखीमुपवेश्यत्व=दाहिनी ओर पूर्वाभिमुख पत्नी को बैठाकर। यह गृहस्थों के द्वारा करने वाले विवाहादि

में—संस्कार्य च तथैवोपवेश्य:=उनका भी स्नानादि से शुद्धि हो।

तदनन्तर—बाह्मणै: = ब्राह्मणों के द्वारा ''यशस्करं बलवन्तं कनिकदज्जनुष'' आदि माङ्गल्य मन्त्रों से मङ्गल तिलक धारण करें। इसके बाद दो बार आचमन करें। एवं प्राणायाम करें। गणेश जी की प्रार्थना करें। हाथ में पवित्र को धारण करें। स्थान देवता का पूजन करें। इसके पश्चात् गणेशपूजन करें। इतना हम पहले ही कर चुके हैं। पञ्चगव्य प्राशन (पुण्याहवाचन के बाद) (पञ्चगव्यपीना चाहिये)।

यहाँ से पुण्याहवाचन प्रारम्भ—कर्ता स्वपुरतः=पुण्याहवाचन करने वाले अपने आगे भूमि पर—

ॐ भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्। संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ॥ *(अथर्ववेद १२.१.६३)*

इस मन्त्र को पढकर भूमि को उत्तर एवं दक्षिण दिशा में स्पर्श करें।

ॐ अक्षितास्त उपसदोऽक्षिताः सन्तु राशयः। पृणन्तो अक्षिताः सन्त्वत्तारः सन्त्वक्षिताः ॥ *(अथर्ववेद ६.१४२.३)*

इस मन्त्र से पत्तल आदि बिछाकर दो चावल की राशी उत्तर एवं दक्षिण में बनाना याहिये।

ॐ एमां कुमारस्तरुण आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः ॥ *(अथर्ववेद ३.१२.७)*

इस मन्त्र को पढ़कर चावल पर दो कलशों को स्थापित करें।

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु ॥ *(अथर्ववेद ७.८३.१)*

इस मन्त्र से कलशों में तीर्थ जल भरें।

ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

इस मन्त्र से गंध (चन्दन) कलश में डालें।

ॐ आयने ते परायणे दूर्वा रोहंतु पुष्पिणीः। उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान् ॥ *(अथर्ववेद ६.१०६.१)*

इस मन्त्र से दूर्वा (दूब) कलश में डालें।

ॐ पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया। संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे ॥ *(अथर्ववेद ३.५.८)*

इस मन्त्र से कलश पर अश्वत्थ, बरगद, आम, जामुन, कटहल के पत्तों को रखें। (पञ्च पल्लव)

ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये ॥ *(अथर्ववेद ८.७.२७)*

इस मन्त्र से द्राक्षा आदि छोटे फलों को कलश में डालें।

ॐ यद्धिरंण्यं सूर्येण सुवर्णं प्रजावंन्तो मनंवः पूर्वं ईषिरे।
तत् त्वां चन्द्रं वर्चसा सं सृजत्यायुंष्मान् भवति यो बिभर्ति॥ *(अथर्ववेद १६.२६.२)*

इस मन्त्र से रत्नों को (पुष्प को) कलश में डालें।

ॐ हिरण्यगर्भः समंवर्ततांग्रे भूतस्यं जातः पतिरेकं आसीत्।
स दांधार पृथिवीमुत द्यां कस्मैं देवायं हविषां विधेम॥ *(अथर्ववेद ४.२.७)*

इस मन्त्र से हिरण्य या सिक्का कलश में डाले।

ॐ परिं धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः।
बृहस्पतिः प्रायंच्छद् वासं एतत् सोमांय राज्ञे परिंधातवा उं॥ *(अथर्ववेद २.१३.२)*

इस मंत्र से वस्त्र को कलश पर लपेटें या मौली से कलश पर बांधे।

कलशों को वस्त्र बाँधने का विधान-प्रमाण श्लोक—

कलशान् वेष्टयेत् सर्वान् सूत्रेनैकेन बुद्धिमान्। वर्धिनी सूत्रयुग्मेन शिवकुम्भान् त्रिसूत्रकैः॥ *(क्रियासार)*

सामान्यतः सभी कलशों को मौली से एक बार लपेटना चाहिये। वर्धिनी कलश जो कि अस्त्र कलश भी कहलाता है यह यज्ञ की रक्षा के लिए रखा जाता है इसे मौली से दो बार लपेटना चाहिये। शिवकुम्भ अर्थात प्रधान कलश को तीन बार मौली से लपेटना चाहिये।

ॐ पूर्णादर्वे परां पत सुपूर्णा पुनरा पंत। सर्वान् यज्ञान्त्संभुञ्जतीषमूर्जं न आ भंर॥ *(अथर्ववेद ३.१०.७)*

इस मन्त्र से चावल से भरे पात्र को कलश के मुख पर रखना चाहिये। उत्तरकलशे वरुणावाहने विनियोगः। उत्तर दिशा में जो कलश है उसमें नीचे लिखे

मन्त्र से वरुण देवता का आवाहन करें।

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि। (आवाहन करें)

ॐभूर्भुवः स्वः वरुणाय नमः। चन्दनं समर्पयामि। ॐभूर्भुवः स्वः वरुणाय नमः। पुष्पं समर्पयामि। ॐभूर्भुवः स्वः वरुणाय नमः। धूपं समर्पयामि। ॐभूर्भुवः स्वः वरुणाय नमः। दीपं समर्पयामि। ॐभूर्भुवः स्वः वरुणाय नमः। नैवेद्यं समर्पयामि। इन पञ्चोपचारों से पूजन करें।

ॐ प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये।
दुष्वप्न्यँ दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम्॥ *(अथर्ववेद ७.८३.४)*

ॐभूर्भुवः स्वः वरुणाय नमः। मन्त्रपुष्पं समर्पयामि। अनेन पूजनेन वरुणः प्रीयताम्। इसके पश्चात् कलश छूकर मन्त्र पाठ करें।

कलशस्य मुखेविष्णुः कंठेरुद्रः समाश्रितः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथयजुर्वेदः सामवेदोह्यथर्वणः॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा। आयान्तु मम शान्त्यर्थं दुरितक्षय कारकाः॥ *(ब्रह्मकर्म समुच्च-देवपूजा प्रकरण)*

उत्तर कलश में अक्षत डालें। मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव। अतिथिदेवो भव। सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः। इसके बाद घुटने टेककर बैठें, अंजलि में उत्तर दिशा के कलश को ग्रहण करें। ब्राह्मणों से आशीर्वाद की प्रार्थना करें।

ब्राह्मण—सत्या आशिष सन्तु *(आपकी इच्छा पूर्ण हो)*। दीर्घानागानद्योगिरयस्त्रीणि विष्णुपदानि च तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु *(आपको दीर्घायुष्य प्राप्त हो)* *(यजमान ब्राह्मणे के हाथ में जल देते हैं)*। ब्राह्मणहस्ते शिवा आपः सन्तु। ब्राह्मण कहते हैं—सौमनस्यमस्तु *(आपका मन स्वस्थ हो)*। अक्षतं चारिष्टं चास्तु *(दिये गये अक्षतों से अरिष्ट निवारण हो)*। गंधाः पान्तु *(कहकर गन्ध देवे)*। सौमंगल्यं चास्तु *(आपको मङ्गल हो)*। अक्षताः पान्तु *(कहकर अक्षत देवे)*।

आयुष्यमस्तु *(आपको दीर्घायुष्य हो)*। पुष्पाणि पान्तु *(कहकर फूल देवें)*। सौश्रियमस्तु *(उत्तम संपत् प्राप्त हो)*। तांबूलानि पान्तु *(कहकर ताम्बुल देवें)*। ऐश्वर्यमस्तु *(ऐश्वर्य प्राप्त हो)*। दक्षिणाः पान्तु *(कहकर दक्षिणा सिक्का दें)*। बहुदेयं चास्तु *(भगवान् आपको बहुत देने योग्य बनायें)*। दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिश्चास्तु *(आपको दीर्घायुष्य, श्रेय, शान्ति, पुष्टि एवं सन्तोष प्राप्त हो)*।

श्रीर्यशोविद्याविनयोवित्तं बहुपुत्रं चायुष्यं चास्तु।

यं कृत्वा सर्ववेद यज्ञ क्रिया करणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकारमादिंकृत्वा ऋग्यजुः सामाशीर्वचन बह्वृषिमतं सं विज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। (ब्राह्मण यजमान से कहते हैं जिसके करने से सभी वेदों का यज्ञ कार्यों का आरम्भ शुभ होता है ऐसे ॐकार से प्रारम्भ कर बहुत से ऋषियों के द्वारा अच्छी तरह से विचार कर ऋग्वेद यजुर्वेद एवं सामवेदोक्त आशीर्वाद मन्त्रों से (हम-ब्राह्मण) आपका पुण्याह करना चाहते हैं।
यजमान कहते हैं—विप्राः ओं वाच्यतां।

ॐ पार्थिवस्य रसे देवा भगस्य तन्वो३ बले। आयुष्यमस्मा अग्निः सूर्यो वर्च आ धाद् बृहस्पतिः॥
आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम् *(अथर्ववेद २.२९.१-२)*

व्रतनियम तपः स्वाध्याय क्रतुदमदान विशिष्टानां ब्राह्मणानां मनः समाधीयताम् *(यह वाक्य यजमान कहते है कि ब्राह्मणों का मन स्थिर हो)*। विप्राः-समाहित मनसः स्मः *(हम स्वस्थ मनवाले हैं)*। यजमानः-प्रसीदन्तु भवन्तः *(आप प्रसन्न हो)*। **विप्राः**- प्रसन्नाः स्मः *(हम प्रसन्न है)*। यहाँ से प्रत्येक पंक्ति के बाद उत्तर कलश के जल को बड़े बरतन में छोड़े। शान्ति रस्तु *(शान्ति हो)*। पुष्टिरस्तु *(पुष्टि हो)*। तुष्टिरस्तु *(तुष्टि हो)*। वृद्धिरस्तु *(वृद्धि हो)*। अविघ्नमस्तु *(निर्विघ्न हो)*। आयुष्यमस्तु *(आयुष्य हो)*। आरोग्यमस्तु *(आरोग्य हो)*। शिवं कर्मास्तु *(कर्म में मङ्गल हो)*। कर्म समृद्धिरस्तु *(कर्म में समृद्धि हो)*। धर्म समृद्धिरस्तु *(धर्म में समृद्धि हो)*। वेदासमृद्धिरस्तु *(वेद समृद्ध हो)*। शास्त्रसमृद्धिरस्तु *(शास्त्रसमृद्धि हो)*। पुत्र समृद्धिरस्तु *(पुत्र समृद्धि हो)*। धनधान्य समृद्धिरस्तु *(धन एवं धान्य की समृद्धि हो)*। इष्ट संपदस्तु *(इच्छित ऐश्वर्य मिलें)*।

ऐशान्यां बहिर्देशे सर्वारिष्टनिरसन मस्तु *(बाहर देश में सभी प्रकार के अरिष्टों का निवारण हो)*। यत्पापं तत् प्रतिहतमस्तु *(जो भी पाप है वह दूर हो)*। यच्छ्रेयः तदस्तु *(जो श्रेयस्कर हो वह मिले)*। उत्तरोत्तरा: क्रियाः शुभाः शोभनाः संपद्यंताम् *(आगे-आगे करने वाले कार्य शुभ एवं सुन्दर हो)*। इष्टाः कामाः संपद्यंताम् *(इच्छित कामनाऐं पूर्ण हो)*। तिथिकरणमुहूर्त नक्षत्र संपदस्तु *(तिथि, करण, मुहूर्त एवं नक्षत्र संपत्ति हो—अर्थात् ये सब श्रेष्ठ हो)*।

तिथिकरणमुहूर्त नक्षत्र ग्रहलग्नाधिदेवताः प्रीयन्ताम् *(तिथिकरण मुहूर्त एवं नक्षत्र ग्रहों के सहित एवं देवताओं के सहित प्रसन्न हों)*। दुर्गा पाञ्चाल्यौ प्रीयेताम् *(दुर्गा एवं पाञ्चाली प्रसन्न हो)*। अग्निपुरोगा विश्वेदेवाः प्रीयंताम् *(अग्नि के साथ विद्यमान विश्वेदेव प्रसन्न हो)*। इन्द्र पुरोगाः मरुद्गणाः प्रीयंताम् *(इन्द्रपुरोगाः मरुद्गण प्रसन्न हो)*। ब्रह्मपुरोगाः सर्वेवेदाः प्रीयन्ताम् *(ब्रह्मा जी के साथ विद्यमान सभी वेद प्रसन्न हो)*।

विष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् *(विष्णु के साथ विद्यमान सभी देवता प्रसन्न हो)*। माहेश्वरी पूरोगा उमामातरः प्रीयंताम् *(माहेश्वरी देवी के साथ विद्यमान उमामातर प्रसन्न हो)*। वसिष्ठपुरोगा ऋषिगणाः प्रीयंताम् *(वसिष्ठ जी के साथ विद्यमान ऋषिगण प्रसन्न हों)*। अरुंधतीपुरोगा एकपत्न्यः प्रीयंताम् *(अरुन्धती के साथ विद्यमान एकपत्नी देवियाँ प्रसन्न हो)*। ऋषयश्छंदास्याचार्यवेदादेवायज्ञाश्च प्रीयंताम् *(ऋषिगण, छन्द, आचार्य, वेद, देवता एवं यज्ञ प्रसन्न हो)*। ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् *(ब्रह्मा एवं ब्राह्मण प्रसन्न हो)*। श्री सरस्वत्यौ प्रीयेताम् *(लक्ष्मी एवं सरस्वती प्रसन्न हो)*। श्रद्धामेधे प्रीयेताम् *(श्रद्धा एवं मेधा देवी प्रसन्न हो)*। भगवती कात्यायनी प्रीयताम् *(भगवती कात्यायनी देवी प्रसन्न हो)*। भगवती माहेश्वरी प्रीयताम् *(भगवती माहेश्वरी प्रसन्न हो)*। भगवती पुष्टिकरी प्रीयताम् *(भगवती पुष्टिकारी प्रसन्न हो)*।

भगवती ऋद्दिकरी प्रीयताम् *(भगवती ऐश्वर्यदेनेवाली प्रसन्न हो)*। भगवती वृद्धिकरी प्रीयताम् *(भगवती वृद्धि करने वाली प्रसन्न हो)*। भगवंतौ विघ्नविनायकौ प्रीयेताम् *(भगवान् विघ्नेश एवं विनायक प्रसन्न हो)*। भगवान् स्वामी महासेनः सन्त्रीकः स सुतः सपार्षदः सर्वस्थानगतः प्रीयताम् *(भगवान् कार्तिकेय सपरिवार प्रसन्न हो)*। हरि हर हिरण्यगर्भाः प्रीयंताम् *(विष्णु, शिव, ब्रह्मा जी प्रसन्न हो)*।

सर्वाः ग्रामदेवताः प्रीयताम् *(सभी ग्राम देवता प्रसन्न हो)*। सर्वाः कुलदेवताः प्रीयताम् *(सभी कुल देवता प्रसन्न हो)*। सर्वाः वास्तुदेवताः प्रीयताम् *(सभी वास्तु देवता प्रसन्न हो)*। बहिरपः *(नैऋत्य में बड़े बरतन से बाहर कलश जल छोडें)*। हताब्रह्मद्विषः *(ब्रह्मद्वेषियों का नाश हो)*। हताः परिपन्थिनः *(शत्रुओं का नाश हो)*। हता अस्य कर्मणोविघ्नकर्तारः *(इस कर्म के विघ्न करने वाले का नाश हो)*। शत्रवः पराभवं यातु *(शत्रु पराजित हो)*।

शाम्यन्तु घोराणि *(सभी घोर शान्त हो)*। शाम्यन्तु पापानि *(सभी पाप शान्त हो)*। शांम्यंत्वीयतः *(सभी उत्पातों की शान्ती हो)*। शुभानिवर्धताम् *(मङ्गल अभिवृद्धि*

हो)। शिवा आपः सन्तु *(जल मङ्गलमय हो)*। शिवाऋतवः सन्तु *(ऋतुऐं मङ्गलमय हो)*। शिवा अग्रयः सन्तु *(अग्रियां मङ्गलमय हो)*। शिवा आहुतयः सन्तु *(आहुतियां मङ्गलमय हो)*। शिवा ओषधयः सन्तु *(औषधियां मङ्गलमय हो)*। शिवा वनस्पतयः सन्तु *(वनस्पतियां मङ्गलमय हो)*। शिवा अतिथयः सन्तु *(आगन्तुक मङ्गलमय हो)*।

अहोरात्रे शिवेस्याताम् *(रातदिन मङ्गल हो)*। **निकामेनिंकामेनः पुर्जन्यों वर्षतु** *(समय पर बारीश होवे)*। **फलिन्यों न ओषधयः पच्यंताम्। योगक्षेमो नः कल्पताम्** *(हमारा योगक्षेम हो)*। शुक्राङ्गारकबुधबृहस्पतिशनैश्चर राहुकेतु सोम सहिताः आदित्य पुरोगाः सर्वे ग्रहाः प्रीयंताम् *(सूर्यादि शुक्र, कुज, बुध, गुरु, शनि, राहु, केतु, चन्द्र ग्रह प्रसन्न हों)*। भगवान्नारायणः प्रीयताम् *(भगवान् नारायण प्रसन्न हो)*। भगवान् पर्जन्थः प्रीयताम् *(भगवान पर्जन्य प्रसन्न हो)*। प्रीयतां भगवान् स्वामी महासेनः *(भगवान सुब्रह्मण्य प्रसन्न हो)*। पुण्याहकालान्वाचयिष्ये। वाच्यतां इति विप्राः ब्राह्मण कहते हैं—पढें।

ॐ पुण्यं पूर्वा फल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वाति सुखो मे अस्तु।
राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्ट मूलम्॥ *(अथर्ववेद १६.७.३)*

मह्यं सकुटुम्बिनेमहाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्यकरिष्यमाणामुककर्मणः पुण्याहं भवंतो ब्रुवंत्विति त्रिर्वदेत्।
(यजमान अपने सकुटुम्ब प्रणाम करते हुए आज संपन्न होने वाले कर्म के लिए पुण्याह की याचना करते हुए तीन बार कहते हैं। जिसका प्रत्युत्तर ब्राह्मण तीन बार देते हैं।)

१. ॐपुण्याहं भवन्तो ब्रुवन्तु। ॐअस्तु पुण्याहम्। २. ॐपुण्याहं भवन्तो ब्रुवन्तु। ॐअस्तु पुण्याहम्। ३. ॐपुण्याहं भवन्तो ब्रुवन्तु। ॐअस्तु पुण्याहम्।

ॐ वेदः स्वस्तिर्द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति।
हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम्॥ *(अथर्ववेद ७.२८.१)*

इसके बाद नीचे लिखा वाक्य का तीन बार यजमान कहें। एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्यक रिष्यमाणामुककर्मणः स्वस्ति भवन्तो ब्रुवन्तु। (ब्राह्मण कहते हैं)—ॐआयुष्मते स्वत्ति। इन उपरोक्त वाक्यों को तीन बार दोहराना चाहिये। इसके बाद पुनः पहले जैसे उत्तर कलश से जल नीचे रखे बड़े पात्र में थोड़ा-थोड़ा कर गिराते हुए मंत्रपाठ करें।

ॐ ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा।
अदंब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि।। *(अथर्ववेद ५.१.१)*

इसके बाद पुनः नीचे लिखे वाक्यों को तीन बार यजमान कहें। एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्य करिष्यमाण अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।
(ब्राह्मण कहते हैं)—ॐ ऋध्यतां। इन उपरोक्त वाक्यों को तीन बार दोहराना चाहिये। इसके बाद मन्त्र पाठ करते हुए उत्तरकलश से नीचे रखे पात्र में जल छोड़ना चाहिये।

ॐ एह यांतु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यांतु।
अस्य श्रियमुपसंयांत सर्वं उग्रस्य चेत्तुः संमनसः सजाताः।। *(अथर्ववेद ६.७३.१)*

इसके बाद पुनः नीचे लिखे वाक्यों को तीन बार यजमान कहें एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्य करिष्यमाण अमुक कर्मणः श्रीरस्त्विति भवंतो ब्रुवन्तु। (ब्राह्मण कहते हैं)—ॐ अस्तु श्रीः। इन वाक्यों को तीन बार कहना चाहियें। वर्षशतं परि पूर्णमस्तु। गोत्राभिवृद्धिरस्तु। कर्माङ्ग देवता प्रीयताम्। (ब्राह्मण आशीर्वाद देते हैं—सौ साल पूर्ण हो। आप की वंश वृद्धि हो। कर्माङ्ग देवता आप पर प्रसन्न हो।)

तदप्येषः श्लोक कोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे।। आविक्षितस्य कामप्रेः विश्वेदेवाः सभासद इति।।

इसके पश्चात् उत्तरकलश को दाहिने हाथ में एवं दक्षिण दिशा में रखे कलश को बायें हाथ में लेकर दोनों की धाराओं को मिलाकर नीचे रखें पात्र में मन्त्रोच्चारण करते हुए छोड़ना चाहिये।

ॐ आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम्।।
य आशानामाशापालाश्चत्वार स्थन देवाः।

ते नो निर्ऋत्याः पाशेभ्यो मुञ्चतांहसोअंहसः ॥
अस्त्रामस्त्वा हविषा यजाम्यश्लोणास्त्वा घृतेन जुहोमि ।
य आशानामाशापालस्तुरीयो देवः स नः सुभूतमेह वक्षत् ॥
स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥ *(अथर्ववेद १.३१.१-४)*

इसके पश्चात् पात्र में स्थित जल से यजमान का अभिषिञ्चन नीचे लिखे मन्त्रों से करना चाहिये।

ॐ पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः
शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः ।
ताभिः शान्तिभिः सर्वं शान्तिभिः शमयामोऽहं यदिह घोरं यदिह
क्रूरं यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ॥ *(अथर्ववेद १९.९.१४)*

बलायश्रियैयशसेन्नाद्याय। ॐभूर्भुवः स्वः अमृताभिषेकोअस्तु ॥ शान्तिः पुष्टिस्तुष्टिश्चास्तु। इसके बाद दो बार आचमन करें। पुण्याह वाचन पवित्रता के लिए किया जाता है। इसके चार विभाग कर सकते हैं (प्रयोग की दृष्टि से)—

१. मण्डलरचना—कलशस्थापन।

२. ब्राह्मणों को द्रव्यादि दान—खडे होकर उत्तर कलश से जल छोड़ते हुए मन्त्र पठन।

३. दोनों कलशों को दोनों हाथों मे लेकर उन्हे नीचे रखे पात्र में छोड़ते हुए करने वाले मन्त्र पठन।

४. पात्र में स्थित जल से यजमान, उपस्थित ब्राह्मण, यज्ञस्थल एवं सामग्रियों पर प्रोक्षण विशेषतः यजमान का अभिषिञ्चन।

इसके ४-५ प्रकार प्रचलित है। परन्तु उपरिलिखित विधान वैदिकों में अधिक मान्यता प्राप्त है।

पुण्याह वाचन प्रकरण समाप्त

पुण्याह बाचन में **कर्माङ्ग देवता प्रीयतां** कहना पड़ता है। विवाह में पुण्याह करने पर कर्माङ्ग देवता—**अग्निः प्रीयताम्।** औपासन होम में पुण्याह करने पर कर्माङ्ग देवता—**अग्नि सूर्य प्रजापतयः प्रीयंताम्।** स्थालीपाक होम में पुण्याह करने पर **कर्माङ्ग देवता अग्निः प्रीयताम्।** गर्भाधान संस्कार में पुण्याहकरने पर **कर्माङ्ग देवता ब्रह्मा प्रीयताम्।** पुंसवन संस्कार में पुण्याह करने पर **कर्माङ्ग देवता प्रजापतिः प्रीयताम्।** सीमांत संस्कार में पुण्याह करने पर **कर्माङ्ग देवता धाता प्रीयताम्।** जातकर्म संस्कार में पुण्याह करने पर **कर्माङ्ग देवता मृत्युः प्रीयताम्।** नामकरण, निष्क्रमण (बच्चे को घर से पहली बार बाहर लाना) अन्न प्राशन संस्कार में पुण्याह करने पर **कर्माङ्ग देवता सविता प्रीयताम्।** चौल संस्कार में पुण्याह करने पर **कर्माङ्ग देवता केशिनः प्रीयताम्।** उपनयन संस्कार में पुण्याह करने पर **कर्माङ्ग देवता इन्द्रः श्रद्धा मेधाः प्रीयंताम्।** मेघाजनन (उपनयन के चौथे दिन) पुण्याह करने पर **कर्माङ्गदेवता सुश्रवाः प्रीयताम्।** पुनरुपनयन (प्रायश्चित) संस्कार में पुण्याह करने पर **कर्माङ्ग देवता अग्निः प्रीयताम्।** समावर्तन संस्कार में पुण्याह करने पर कर्माङ्ग देवता **इन्द्रः प्रीयताम्।** उपाकर्म, महानाम्नि, महाव्रत, उपनिषत्, गोदान इन कर्मो में पुण्याह करने पर कर्माङ्गदेवता—**सविता प्रीयताम्।** वास्तुहोम में दो बार पुण्याह होता हैं—पहले बार कर्माङ्ग देवता-**वास्तोष्पतिः प्रीयताम्।** दूसरी बार पुण्याह के कर्माङ्ग देवता-**प्रजापतिः प्रीयताम्।** आग्रयण (नूतन धान्य खाने से पूर्व करने वाला) संस्कार में कर्माङ्गदेवता-**आग्रयण देवताः प्रीयताम्।** सर्पबलि संस्कार में पुण्याह करने पर कर्माङ्गदेवता **सर्पाः प्रीयंताम्।** तडागादि (तालाब आदि निर्माण में) पुण्याह करने पर कर्माङ्ग देवता **(वरुणः प्रीयताम्।)** ग्रह यज्ञ में पुण्याह करने पर कर्माङ्ग देवता **नवग्रहाः प्रीयंताम्।** कूष्मांड होम, चान्द्रयण एवं अग्न्याधान में पुण्याह करने पर कर्माङ्ग देवता-**अग्न्यादयः प्रीयंताम्।** (दक्षिणाग्नि आर्हपत्य आहवनीय तीन अग्नियों को अग्निमन्थन से अग्नि को प्रज्वलित कर विधि पूर्वक स्थापित करने का विधान अग्न्याधान कहलाता है। अग्निष्टोम (सोमयाग) में पुण्याह करने पर कर्माङ्ग देवता **अग्निः प्रीयताम्।** शेष सभी काम्य कर्म वाले यज्ञों में पुण्याह करने पर कर्माङ्ग देवता-**प्रजापतिः प्रीयताम्।**

उदाहरण—सर्वाद्‌भुत शान्ति में कर्माङ्गदेवता-**प्रजापतिः प्रीयताम्।**

पुण्याह प्रकरण समाप्त

नान्दि श्राद्ध प्रकरण

देव कार्य करने से पूर्व पितृ कार्य करना आवश्यक है। अतः सभी यज्ञों में एवं सभी संस्कारों में जहाँ भी पुण्याह वाचन होता है वहाँ नान्दी श्राद्ध आवश्यक है।

कुर्याच्च कर्ता स्वयमेव तत्र नान्दीमुख श्राद्धमथोपचारैः।
उद्दिश्य देवान् पितृभिः समेतानावाह्य विप्रद्वितये यथोक्तान्॥
अर्चासनावाहन सार्घ्यतोय गन्धाक्षतैः पुष्पसपाद्यधूपैः।
दीपांजनाच्छादन नत्युपेतैः कराम्बुधारान्तरितैर्यथावत्॥ *(लक्षण संहिता)*

यजमान सभी कर्मों के प्रारम्भ में पितरों से युक्त देवताओं को लक्ष्य करके स्वयं नान्दी श्राद्ध करना चाहिये। इसमें कनिष्ट दो ब्राह्मणों को आसन, आवाहन, अर्ध्य, आचमन, गन्ध, अक्षत, पुष्प, धूप, अंजन, आच्छादन, नमस्कारों से पूजन करना चाहिये। बीच-बीच में जल देते हुए करना चाहिये।

पितृणां च गणाः सप्त त्रिषु लोकेषु विश्रुताः। अमूर्ताश्च समूर्ताश्च द्विधा भिन्नाः प्रकीर्तिताः॥
अग्नि ष्वात्ताबर्हिषदः आज्यपाः सोमपा इति। अमूर्तास्तेषु चत्वारः पितरश्च पितामहाः॥
प्रपितामहास्तथा प्रोक्ता समूर्तास्तेष्वितित्रयः। अमूर्ता देवकार्येषु समूर्ताः पितृकर्मसु॥
अग्निजिह्वा विप्रजिह्वा विश्वेदेवा द्विधा स्मृताः। नान्दीमुखे सत्यवसू काम्यके धुरिलोचनौ॥
क्रतुदक्षावुत्सवे तु पार्वणे च पुरूरवौ। सपिण्डीकरण श्राद्धे अष्टकायां तथैव च॥
विश्वेदेवाः कालकामौ विप्रजिह्वा दशस्मृताः। अग्निजिह्वास्त्रयः प्रोक्ता वह्निस्थास्ते त्रयः स्मृताः॥ *(लक्षण संहिता)*

इत्येते तद्विशेषज्ञैर्विश्वेदेवास्त्रयोदश। तीनों लोको में सात पितृगण (समूह) प्रसिद्ध है। उनमे दो भाग है एक-अमूर्त (शरीर हीन) दूसरा-समूर्त (आकार युक्त)।

उनमें—**अमूर्त के चार भाग है।** १. अग्निष्वात्ता (अग्नि में वास करने वाले), २. बर्हिषदः (कुश में रहने वाले), ३. आज्यपाः (घी पीने वाले), ४. सोमपाः (सोमपान करने वाले)

पिता-पितामह एवं **प्रपितामह समूर्त** वर्ग में आते हैं। देवकार्य में (यज्ञ यागादियों में) अमूर्त पितरों का पूजन करना चाहिये। पितृकार्यों में समूर्तो को (पिता-पितामह-प्रपितामह) पूजन करना चाहिये। विश्वेदेवों का दो भाग है। ये हमेशा पितरों के साथ रहते है। उनके रक्षक देवता है। इनके दो भाग है—

१. अग्निजिह्वा—अग्नि द्वारा हविस् स्वीकार करने वाले विश्वदेव। ये तीन हैं। ये अग्नि में वास करते हैं। इनहें **अग्निजिह्वा** नाम से ही जाना जाता है।

२. विप्रजिह्वा—ब्राह्मणों के मुख (जिह्वा) द्वारा आहर स्वीकार करने वाले विश्वदेव। इनके दस देवता हैं। नान्दीमुख में सत्य एवं वसु, काम्य श्राद्ध मे धूरि एवं लोचन, रथोत्सव आदियो में क्रतु एवं दक्ष, पार्वण (विशेष समय पर-मासिक आदि) पुरु एवं रव, सपिण्डीकरण श्राद्ध में काल एवं कामयेदस विश्वेदेवता विप्रजिह्व कहलाते हैं।

दत्वा तण्डुलपूर्णपात्रयुगले संकल्प्य भुक्तिं तयोः। ताम्बूलादि सुदक्षिणान्तिकमनुज्ञातः समुद्वाहयेत्॥ *(लक्षण संहिता)*

चावल से भरे दो पात्रों मे उनके भोजन का संकल्प करके ताम्बूल दक्षिणादि सभी देकर अन्त में विसर्जन करना चाहिये। (इनमें आहार के बदले कच्चा पदार्थ अर्थात् चालव, सब्जी, दाल आदि कच्चे पदार्थ ब्राह्मणों को संकल्प करके दिया जाता है।) **प्रयोग आगे है। यह मात्र विषय की जानकारी है। नान्दि श्राद्ध के दो प्रकार है—**

१. स्वार्थ—अपने लिए जब करते हैं। तब समूर्त पितरों का श्राद्ध अर्थात् पिता-पितामह-प्रपितामह माता-पितामहि-प्रपितामहि सपत्नीक मातामह-सपत्नीक मातृपितामह, सपत्नीक मातृप्रपितामह (इन नौ पितरों को पूजना चाहिये)।

२. विश्वकल्याणार्थ या परार्थ, उत्सवादि में अमूर्त पितरों का पूजन—

१. अग्निष्वात्ता, २. बर्हिषदः, ३. आज्यपाः, ४. सोमपा इन पितरों का पूजन करना चाहिये।

संकल्प—देशकालौ संकीर्त्य (देश काल को बताकर)करिष्यमाण मंगलकार्याङ्गभूतं मातृकापूजनं नान्दीश्राद्धं च करिष्ये। (मातृका पूजन एवं नान्दी श्राद्ध करना है)। पुण्याह कलश के दक्षिण में नान्दी दो मण्डल

दो पात्रों में भोजन के लिए आवश्यक चावल, सब्जी, दाल, मेवा दक्षिणा रखें।

मातृका पूजनम्—पान सुपारी दक्षिणा के ऊपर कूर्च (कुश से बना) रखकर उसमें मातृका आवाहन करके उनमें मातृका पूजन करना चाहिये। नान्दी मण्डल के आगे मातृका पूजन करना चाहिये।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही तथेन्द्राणी चामुण्डाः सप्तमातरः॥ *(ब्रह्मकर्म समुच्चय)*

सात मातृकायें।

गौरीपद्मा शचीमेधासावित्रीविजयाजया। देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृतिः पुष्टिस्तथातुष्टिरात्मनः कुलदेवताः॥ *(ब्रह्मकर्म समुच्चय)*

(गौर्यादि षोडश मातृकायें)। ब्राह्म्यादि सप्त मातृः गौर्यादि षोडश मातृः आवाहयामि। विनायकं आवाहयामि। दुर्गा आवाहयामि। क्षेत्रपालं आवाहयामि। गणपतिं आवाहयामि। मातृस्वसारं आवाहयामि। पितृस्वसारं आवाहयामि। एताभ्यो देवताभ्यो नमः। ध्यायामि। ध्यानं समर्पयामि। इनका षोडशोपचार पूजन करना याहिये। **उदाहरण**—आवाहित देवताभ्यो नमः। आसनं समर्पयामि आदि। षोडशोपचार पूजन संक्षेप में करें। (गणेश पूजन में है।)

अन्त में पुष्पांजलि मन्त्र—ॐ दे॒वानां॒ पत्नी॑रुश॒तीर॑वन्तु नः॒ प्राव॑न्तु नस्तु॒जये॑ वाज॑सातये।
याः पार्थि॑वासो॒ या अ॒पामपि॑ व्र॒ते ता नो॑ देवीः सु॒हवाः॒ शर्म॑ यच्छन्तु ॥ *(अथर्ववेद ७.४९.१)*

ॐभूर्भुवः स्वः आवाहित देवताभ्यो नमः। मन्त्रपुष्पं समर्पयामि।

ॐ तद॑स्तु मित्रावरुणा॒ तद॑ग्ने॒ शं योर॒स्मभ्य॑मि॒दम॑स्तु श॒स्तम्।
अ॒शी॒महि॑ गा॒धमु॒त प्र॑ति॒ष्ठां नमो॑ दि॒वे बृ॑ह॒ते साद॑नाय॥ *(अथर्ववेद १९.११.६)*

गृहावै सूक्तं, प्रतिवीतं तत्, प्रतिवीततमया वाचा शस्तव्यम्। स यद्यपित दूरात् पशूंल्लभते, गृहानेवैनानाजिगमिषति गृहाहिपशूनां प्रतिष्ठा। *(गो.ब्रा.)*

इन मन्त्रों को पढकर पुष्पाक्षत चढ़ायें।

मातृका पूजन समाप्तम्

नान्दी श्राद्ध—ॐ विश्वे॑ देवा॒ वस॑वो॒ रक्ष॑ते॒ममु॒तादि॑त्या जागृ॒त यू॒यम॒स्मिन्।
मेमं सना॑भिरु॒त वा॒न्यना॑भि॒र्मेमं प्राप॒त् पौरु॑षेयो व॒धो यः॥ (अथर्ववेद १.३०.१)

ॐ सत्यवसुसंज्ञकाविश्वेदेवाः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। ॐभूर्भुवः स्वः इयं च वृद्धिः। इससे दूर्वा हाथ में रखकर उस पर से जल छोडें। सोमयाग, गर्भाधान, पुंसवन, सीमन्त, आधान इन कर्मो के अङ्गभूत नान्दी श्राद्ध में क्रतु दक्ष संज्ञक विश्वेदेव अन्य सभी संस्कारों में सत्यवसु संज्ञक विश्वेदेव कहना चाहिये।

मातृपितामहीप्रपितामह्यः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। ॐभूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ मे रखकर उस पर से जल छोडें। पितृपितामहप्रपितामहाः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। ॐभूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोड़ें। सपत्नीक मातामह मातृपितामह मातृप्रपितामहाः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। ॐभूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोड़ें। सपत्नीक मातामह मातृपितामह मातृप्रपितामहाः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। ॐभूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोड़ें।

सत्यवसु संज्ञकाः विश्वेदेवाः नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध, अक्षत, पुष्प, दुर्वा हाथ में लेकर उस पर जल छोड़ें। मातृपितामही प्रपितामह्यः नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। हाथ में गंध अक्षत पुष्प दूर्वा लेकर उस पर जल छोडें।

सपत्नीक माता मह मातृपितामह मातृपितामहाः नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचार कल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। हाथ में गंध अक्षतपुष्पदूर्वा लेकर उस पर जल छोडें।

ॐभूभुर्वः स्वः सत्यं त्वर्तेनपरिषिञ्चामि कहकर मण्डल पर रखें दोनो पात्रों को परिषेचनकर दक्षिण दिशा के पात्र को "इदं विश्वेभ्यो देवेभ्यः। उत्तर दिशा के पात्र को "इदं नान्दीमुख पितृभ्यः। कहकर दान संकल्प कर—ब्राह्मणों को दे देवें।

सत्यवसु संज्ञकाः विश्वेदेवाः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामंसोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर

ताम्बूल दक्षिणा पर जल छोड़कर नीचे रखना चाहिये।

मातृपितामहीप्रपितामह्यः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणा पर जल छोड़कर नीचे रखें। पितृपितामहप्रपितामहाः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। सपत्नीक मातामह मातृपितामह मातृप्रपितामहाः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बुलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणा पर जल छोडकर नीचे रखें। आगे लिखें मन्त्रों से खड़े होकर उपस्थान करें।

कृतस्य नान्दी श्राद्धस्य प्रतिष्ठाफलसिद्ध्यर्थं द्राक्षामलक निष्क्रयिणीं दक्षिणां दातुमहमुत्सृज्ये। कहकर हाथ में दक्षिणा लेकर उस पर जल छोड़कर नीचे रख दें।

प्रार्थना— मातापितामही चैव तथैव प्रपितामही। पितापितामहश्चैव तथैव प्रपितामहः॥
मातामहस्तत्पिताच प्रमातामहकादयः। एतेभवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम्॥

कहकर जल छोड़े। अनेन नान्दीसमाराधनेन नान्दीमुखदेवताः प्रीयंतां। आचम्यमंगलाक्षतकुंकुमादि धारण करें।

विसर्जन—यज्ञ पर अन्तिम दिन में, उपनयन में व्रत समाप्ति पर विवाह में व्रतसमाप्ति पर प्रायः हर कर्म की समाप्ति पर विसर्जन निम्न मन्त्र से करना चाहिये।

ॐ इडायास्पदं घृतवंत् सरीसृपं जातवेदः प्रति हव्या गृभाय।
ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु॥ *(अथर्ववेद ६.७३.१)*

यथाचारं हिरण्येन भाण्डवादनं। मन्त्र कहते हुए सिक्के से थाली के निचले भाग में शब्द करना चाहिये। (घण्टावादन के बदले)

ॐ उत्तिष्ठब्रह्मणस्पते देवान् यज्ञेन बोधय।
आयुः प्राणं प्रजां पशून् कीर्तिं यजमानं च वर्धय *(अथर्ववेद १९.६३.१)*

यान्तु देवगणाः सर्वे पूजामादायमत्कृतां। इष्टकामार्थसिद्धयर्थं पुनरागमनाय च॥ *(ब्रह्मकर्म समुच्चय)*

इन मन्त्रों से आवाहित देवताओं को उठाना चाहिये।

प्रमाण (विचार)—गौर्यादि मातृकापूजनं नान्दी श्राद्धाङ्गम्।

गौर्यादि मातृकापूजन नान्दी श्राद्ध के अङ्ग है, स्वतन्त्र नहीं। **यत्र नान्दी श्राद्धं न क्रियते तत्र मातृकापूजनमपि न कार्य** जहाँ नान्दी श्राद्धं नहीं करते हैं वहाँ मातृकापूजन भी न करें।

स्वार्थ नान्दी श्राद्ध करने वालों के कुछ नियम। ये यज्ञ में आवश्यक नहीं है अतः अर्थ नहीं लिखा है।

तत्रपूर्वं मातृपार्वणां ततः पितृपार्वणं ततः सपत्नीक मातामह पार्वणं इति पार्वण त्रयात्मकं नान्दी श्राद्धं। मातृजीवने सपत्नमातृमरणेपि न मातृपार्वणां। एवं मातामहीजीवने मातामहीसपत्नीमरणेपि न मातामहादेः सपत्नीकत्वं। अत्र कर्तुजीवत्पितृकत्वे निर्णयः। जीवेन्तु यदि वर्गाद्यस्तंवर्गं तुपरित्यजेदितिन्यायेन जीवत्पितृकः स्वापत्संस्कारेषु मातृमातामहपार्वणयुतं नान्दी श्राद्धं कुर्यात्। मातारि जीवत्यां मातामहपार्वणमेकमेव। मातामहे जीवति मातृपार्वणमेकमेव॥

केवल मातृपार्वणे विश्वेदेवा न कार्याः। वर्गत्रयाद्योषु मातृपितृ मातामहेषु जीवस्तु नान्दी श्राद्ध लोप एव सुतसंस्कारेषूचितः।

द्वितीय विवाहाधानपुत्रेष्टि सोमयागादिषु स्व संस्कार कर्मसु येभ्य एव पितादद्यात्तेभ्योदद्यात्तुतस्सुतः। तथा च मृतमातृमातामह कोपिजीवत्पित्रक स्वसंस्कारे पितुर्मातृपितामही प्रपितामह्यः पितुः पितृपितामहप्रपितामहाः पितुर्मातामहमातृपितामह मातृप्रपितामहा इत्येव पार्वण त्रयुमुद्दिश्यश्राद्धं कुर्यात्। न तु स्वमातृमाता मह पार्वणोद्देशः। पिररि पितामहे च जीवति स्वसंस्कारे पितामहस्य मातृपितामहीप्रपितामह्य इत्याद्युद्देशः। एवं प्रपितामहेपियोज्यं। पितुर्मात्रादि जीवने तत्पार्वण लोप एव। तथा च येभ्य एव पितादद्यादितिपक्षस्य वर्गाद्य जीवने तत्पार्वण लोप इति द्वारलोपपक्षस्य च स्वसंस्कार स्वापत्यसंस्कार भेदेन व्यवस्था सिद्धांतितेति ज्ञेयं। केचिन्तु पक्षद्वस्यस्यैच्छिकोविकल्पो न तु व्यवस्थित इत्याहुः। एवं मृत पितृकस्य जीवन्मातृमातामहस्य पितृपार्वणेनैव नांदी श्राद्धसिद्धिर्ज्ञेया। समावर्तनस्य माणवक कर्तृत्वेपितदंगभूत नान्दी श्राद्धे पितुस्तदभावे ज्येष्ठभ्रात्रा देरधिकार इति केचित्। तत्र पितापुत्र समावर्तने स्वपितृभ्यो नान्दी श्राद्धं कुर्यात्। पिताजीवत्पितृकश्चेत्सुत संस्कारत्वात् द्वारलोप पक्षेयुक्त इतिभाति।

माणवकपितुः प्रवासादिना असंनिधाने भ्रात्रादिर्माणवकस्य पितुर्मातृपितामहीप्रपितामह्य इत्याद्युच्चार्यश्राद्धंकुर्यात्। मृत पितृक माणवक समावर्तने पितृव्य

भ्रात्रादिरस्य माणवकस्य मातृपितामहीत्याद्युच्चारयेत्। भ्रात्रादेरभावे स्वयमेव पितृभ्यो दद्यात्। एवं जीवत्पितृकोपिपितुरसन्निधाने भ्रात्रादेरभावे पितुः पितृभ्यः स्वयमेव नांदीमुखं कुर्यात्। उपनयनेनकर्माधिकारस्य जातत्वात्। एवं विवाहे पि द्रष्टव्यं।

मृत पितृकस्य चौलोपनयनादिकं पितृव्यमातुलादिः कुर्वन् अस्य संस्कार्यस्य पितृपितामहेत्याद्युच्चार्य श्राद्धं कुर्यात्। जीवतः पितुरसन्निधानेन कुर्वन् मातुलादिरस्य संस्कार्यस्य पितुर्जनकादीनुद्दिश्य कुर्यान्नतु संस्कार्यस्य मृतानपि मात्रादीनिति संक्षेपः।

नान्दी श्राद्ध प्रकरण समाप्त

देवनान्दी—देवनान्दी में मातृका पूजन आवश्यक नहीं है। यज्ञ,(अतिरुद्र, सहस्रचण्डी) रथोत्सव आदि सार्वजनिक आचरणों में देवनान्दी ही करना चाहिये। **क्रतुदक्षावुत्सवे तु।** इस वाक्य से क्रतु एवं दक्ष नामक विश्वेदेव देवता हैं। देवनान्दी में पितृदेवता चार है। अमूर्त्य।

१. अग्निष्वात्ता, २. बर्हिषदः, ३. आज्यपाः, ४. सोमपाः

संकल्प—देशकालौ संकीर्त्य करिष्यमाण कर्माङ्ग भूतं नान्दीसमाराधनं करिष्ये। पहले दो मण्डल बनायें।

दत्वातण्डुलपूर्णपात्रयुगले संकल्प्य भुक्तिं तयोः।
ताम्बूलादि सुदक्षिणान्तिकमनुज्ञातः समुद्वाहयेत्॥ *(लक्षण संहिता)*

दो पात्रों में चावल, काजू किशमिश, फल, दाल, आदि दो मण्डलों पर रखें।

ॐ विश्वे देवा वसंवो रक्षंतेममुतादिंत्या जागृत यूयमस्मिन्।
मेमं सनांभिरुत वान्यनांभिर्मेमं प्रापत् पौरुषेयो वधो यः॥ *(अथर्ववेद १.३०.१)*

ॐ क्रतुदक्षसंज्ञका विश्वेदेदेवाः—नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूभुर्वस्वः इयं च वृद्धिः। इससे दुर्वा हाथ में रखकर उस पर से जल छोडें। अग्निष्वात्ताः पितृगणाः नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूभुर्वः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोड़ें।

बर्हिषदः पितृगणाः—नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोडें। **आज्यपाः पितृगणाः**—नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दुर्वा हाथ में रखकर उस पर से जल छोडें। **सोमपाः पितृगणाः** नान्दीमुखाः उभाभ्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोडें।

ॐ क्रतुदक्ष संज्ञका विश्वेदेवाः नान्दीमुखाः उभयोः ब्राह्मणयोः इदमासनगंधाद्युपचार कल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दूर्वा हाथ में लेकर उस पर जल छोडें।**ॐ अग्निष्वात्ताः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणयोः इदं आसनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दूर्वा हाथ में लेकर उस पर जल छोडें। **बर्हिषदः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणयोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दुर्वा हाथ में लेकर उस पर जल छोडें। **आज्यपाः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणयोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध, अक्षत, पुष्प, दुर्वा हाथ में लेकर उस पर जल छोडें।

सोमपाः पितृगणाः नान्दीमुखाः उभयोः ब्राह्मणयोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भूवः स्वः इयं च वृद्धिः। गन्ध, अक्षत, पुष्प, दुर्वा हाथ में लेकर उस पर जल छोडें। ॐभूर्भुवः स्वः सत्यं त्वर्तेन परिषिञ्चामि कहकर मण्डल पर रखे दोनों पात्रों को परिषेचन कर दक्षिणादिशा के पात्र को "इदं विश्वेभ्यो देवेभ्यः" उत्तरदिशा के पात्र को "इदं नान्दीमुख पितृभ्यः" कहकर दान संकल्प कर ब्राह्मणों को दे देवें।

क्रतुदक्षसंज्ञकाः विश्वेदेवाः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणापर जल छोड़कर नीचे रखना चाहिये। **अग्निष्वात्ताः पितृगणाः** नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामंसोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणापर जल छोडकर नीचे रखना चाहिये। **बर्हिषदः पितृगणाः** नान्दीमुखाः गुग्म ब्राह्मण भोजन पर्याप्तं दमनामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणापर जल छोड़कर नीचे रखना चाहिये। **आज्यपाः पितृगणाः** नान्दीमुखा युग्म ब्राह्मण भोजन पर्याप्तं इदमामंसोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर ताम्बूल दक्षिणापर जल छोडकर नीचे रखना चाहिये।

सोमपाः पितृगणाः नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। कहकर

ताम्बूल दक्षिणा पर जल छोड़कर नीचे रखना चाहिये। आगे लिखे मन्त्रों से खड़े होकर उपस्थान करें।

दीपं दर्शयामि धूपदीपानन्तरं आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। (नैवेद्य को गायत्री मन्त्र से प्रोक्षण करें नैवेद्य मण्डल पर रखें। **सत्यं त्वर्तेन परिषिञ्चामि।** इस मन्त्र से परिषिञ्चन करें।) **अमृतोपस्तरणमसि** कहकर जल छोड़ें। ॐ प्राणाय स्वाहा (अङ्गुष्ठ एवं कनिष्ठिका मिलाकर) ॐ अपानाय स्वाहा (अङ्गुष्ठ एवं तर्जनी मिलाकर) ॐ व्यानाय स्वाहा (अङ्गुष्ठ एवं मध्यमा मिलाकर) ॐ उदानाय स्वाहा (अङ्गुष्ठ एवं अनामिका मिलाकर) ॐ समानाय स्वाहा (सभी अङ्गुलियों को मिलाकर) ॐ देवेभ्यः स्वाहा नैवेद्यं निवेदयामि। **अमृतापिधानमसि** कहकर जल छोड़ें। नैवेद्यं विसर्जयामि। हस्तप्रक्षालनं समर्पयामि। गण्डूषं समर्पयामि। पुनराचमनं समर्पयामि। (कहकर जल छोड़ें) ॐ ब्रह्मादि देवताभ्यो नमः।

पूगीफल समायुक्तं नागवल्ल्यादलैर्युतम्। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यतां। क्रमुक ताम्बूलं समर्पयामि। *(देवपूजा)*
ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ एह यांतु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यांतु।
अस्य श्रियमुपसंयांत सर्व उग्रस्यं चेत्तुः संमनसः सजाताः॥ *(अथर्ववेद ६.७३.१)*

मङ्गलनीराजनं समर्पयामि। नीराजनान्ते परिमल पत्र पुष्पाणि समर्पयामि। मन्त्रपुष्पं समर्पयामि। प्रदक्षिणां समर्पयामि। नमस्कारान् समर्पयामि।

देवाराधनमण्डलं सुरगणावासं सदामङ्गलं। कुर्तुः दर्शनमात्रतः शुभकरं तत् पञ्च भूतात्मकं॥
अर्णाद्यक्षरसंयुतं भयहरं तद् याग पुण्यार्जितं। नानामन्त्रमयं समस्त फलदं ध्यायेन्मनोनन्दनं॥
अरिष्टानि बहून्यस्मिन् दुष्कृतानि शतानि च। मण्डलानि निरीक्षन्ते यथा युद्धेषु कातराः॥ *(अनुष्ठान पद्धति)*

(युद्ध भूमि में कायर जैसे देखते ही भीत हो जाते हैं, वैसे ही मण्डल को देखते ही सभी अरिष्ट दूर हो जाते हैं।) **अनया पूजया ब्रह्मादि मण्डल देवताः प्रीयन्तां** यहाँ पर सर्वतोभद्र मण्डल पूजन संपन्न हुआ।

द्वितीय दिन द्वितीय प्रहर

प्रधानदेवता विष्णु पूजनम्-

देह शुद्धि—ॐ या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः॥ *(अथर्ववेद ११.८.३०)*

आचमन मन्त्र—ऋग्वेदाय स्वाहा। यजुर्वेदाय स्वाहा। सामवेदाय स्वाहा। (स्वाहा मन्त्र से जल पीना चाहिये।) अथर्ववेदाय नमः। इतिहास पुराणेभ्यो नमः। अग्नये नमः। वायवे नमः। प्राणाय नमः। सूर्याय नमः। चन्द्राय नमः। दिग्भ्यो नमः। इन्द्राय नमः। पृथिव्यै नमः। अन्तरिक्षाय नमः। दिवे नमः। ब्रह्मणे नमः। विष्णवे नमः। सदाशिवाय नमः। द्विराचम्य .. इस प्रक्रिया को दुबारा करना चाहिये।

पवित्र धारणम्—ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः।
पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ *(अथर्ववेद २०.१३७.४)*

ॐभूभुर्वः स्वः कहकर जल सिञ्चन करें॥ (इन मन्त्रों से पवित्र शुद्धिकर धारण करना चाहिये आसन के नीचे दो कुश डाल लेना चाहिये।)

प्राणायाम—प्रणवस्य परब्रह्म ऋषिः, दैवी गायत्री छन्दः, परमात्मा देवता प्राणायामे विनियोगः।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवस्वरोम्। *(ऋग्वेद ३.६२.१०)*

(रेखाङ्कित मन्त्र को तीन बार कुम्भक में जप करना चाहिये।)

आसन शुद्धि—ॐ स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छांस्मै शर्मं सप्रथाः॥ *(अथर्ववेद १८.२.१९)*

इस मन्त्र से जल प्रोक्षण करने से भूमि शुद्ध होती है।

शिखाबन्धनम्—

ऊर्ध्वकेशि विरूपाक्षि मांसशोणित भक्षणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते॥ *(ब्रह्मकर्म समुच्चय)*

(इस मन्त्र से शिखाबन्धन करना चाहिये।)

महा संकल्प —..........

गुरु प्रार्थना —

नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः।
आचार्य सिद्धेश्वर पादुकाभ्यो नमोऽस्तु लक्ष्मीपति पादुकाभ्यः॥ *(श्रृङ्गेरी मठीय आचार्य प्रार्थनम्)*

श्री गुरु परमगुरु परमेष्ठी गुरु सद्गुरु पादुकाभ्यो नमो नमः। हम लोग ब्रह्मानन्दं गुरु तं नमानि। गुरु परम्परा को भी बोल सकते हैं। कर सकते हैं। हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ ईश्वर के रुष्ट होने पर गुरुजी रक्षा करते हैं एवं गुरुजी के कुपित होने पर कोई भी रक्षक नहीं है।

भूतोच्चाटन मन्त्र—

ॐ अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरण)*

ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरण)*

ॐ तीक्ष्णदंष्ट्रमहाकाय कल्पान्ते दहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि॥ *(ब्रह्मकर्म समुच्चय)*

इति भैरवं नमस्कृत्य। (इन मन्त्रों से भूतोच्चाटन कर भैरव जी से यज्ञ रक्षा की प्रार्थना करते हैं।)

गणपति प्रार्थना—ॐ इमा या ब्रह्मणस्पते विषूचीर्वात ईरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु॥ *(अथर्ववेद १९.८.६)* इन मन्त्रों से गणपति प्रार्थना कर पुष्पाक्षत छोड़ना चाहिये।

जल कलश पूजनम्—कलश में पूर्ण जल भरकर रखना चाहिये। फिर उसमें गन्ध अक्षत पुष्प कलश के अन्दर डालना चाहिये एवं बाहर भी चारों ओर लगाना चाहिये। गायत्री मन्त्र से तीन बार कलश छूकर जप करना चाहिये।

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदस्सामवेदोह्यथर्वणः॥
अङ्गैश्चसहितास्सर्वे कलशाम्बुसमाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
आयान्तु देवपूजार्थं दुरितक्षयकारकाः। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिंकुरु॥ *(ब्रह्मकर्म समुच्चय-देवपूजा प्रकरण)*

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

ॐ एमां कुमारस्तरुण आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः॥ *(अथर्ववेद ३.१२.७)*

श्री वरुण मूर्तये नमः। (इन मन्त्रों को कलश छूकर पाठ करना चाहिये।)

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृत कलशोद्यत्पंकजाभीत्यभीष्टाम्।
विधि हरिहररूपां सेन्दुकोटीरचूडां भसितसितदुकूलां जाह्नवीं तां नमामि॥ *(स्मृति संग्रह)*

(इस मन्त्र से कलश में गङ्गाजी का ध्यान करना चाहिये।)

आत्माराधनम्—हृदि स्थितं पंकजमष्टपत्रं सकेसरं कर्णिक मध्यनालं॥
अङ्गुष्ठमात्रं मुनयो वदन्ति ध्यायेत् च विष्णुं पुरुषं पुराणम्॥
हृदयकमलमध्ये सूर्यबिम्बासनस्थं सकलभुवनबीजं सृष्टिसंहारहेतुम्।
निरतिशयसुखात्म ज्योतिषं हंसरूपं परमपुरुषमाद्यं चिन्तयेदात्ममूर्तिम्॥
आराधयामि मणि सन्निभमात्मलिङ्गम्। मायापुरीरहृदय पंकज सन्निविष्टम्॥
श्रद्धा नदी विमलचित्त जलभिषेकै। र्नित्यं समाधि कुसुमैर्न पुनर्भवाय॥
देहो देवालयः प्रोक्तो जीवो हंसः सदाशिवः। त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत्॥
स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकम्। तावत् त्वं प्रीति भावेन बिम्बेस्मिन् सन्निधिं कुरु॥ *(देवपूजा)*

ॐआत्मने नमः। ॐअन्तरात्मने नमः। ॐपरमात्मने नमः। ॐज्ञानात्मने नमः। आत्मपूजां समर्पयामि। इससे आत्मशुद्धि होती है। (इन मन्त्रों को कहकर अपने सिर पर अक्षत डाल लेवें।)

कलश स्थापन विधान—तत्र षोडश प्रस्थ परिमितान् शालीन् निक्षिप्य तदर्धं तण्डुलं तदर्धं तिलं तदर्धं सर्षपं इति वस्त्रान्तरितैः द्रव्यैः पीठं विरचय्य तस्मिन् कूर्च न्यस्य अन्यत्र उपकलशार्थं पीठान् विरचय्य तस्मिन् सौवर्णादि कुम्भान् अस्त्र मन्त्रेण जलैः क्षालयित्वा सूत्रवेष्टितान् आधोमुखान् न्यस्येत्।

सर्वतोभद्रमण्डल के ऊपर एक वस्त्र बिछाना चाहिये। उस पर १६ सेर धान, पुनः उस पर वस्त्र डालें ८ सेर चावल, पुनः उस पर वस्त्र डाले। उस पर ४ से तिल, पुनः वस्त्र डालें। उस पर २ सेर सफेद सरसूँ (अभाव में काला सरसूँ) उस पर दो कुश रखें (कुर्च) सोना चान्दी कॉच ताम्र पात्र (कलश) रखें। **इसके ४ प्रकार हैं—**

१. सर्वतोभद्र मण्डल में देवताओं के ५७ आवाहन है। अतः ५७ कलश रख सकते हैं।

२. अष्टदिक्पालों के आठ एवं शेष के लिए एक प्रधान कलश-कुल ९

३. चार दिक्पालों के चार एवं शेष के लिए एक प्रधान कलश कलश कुल ५ कलश।

४. १ कलश (सभी देवताओं का एक ही पूजन।)

अस्त्र मन्त्रों से कलशो को धोना चाहिये। ऊँ षीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तर तनूरूप चट चट प्रचट प्रचट कर कह वम वम बन्ध बन्ध घातय घातय हुं फट्॥ इस मन्त्र को कहते हुए कलशों को स्वच्छ करें। उसे सूत्रों से बॉधकर, प्रधान कलश को तीन सूत्र से शेष कलशों को एक सूत्र से पंजर बॉधना चाहिये। (पंजर का अर्थ धागों से कलश के चारों ओर लपेटने का विधान) फिर कलशो को उलटा करके रखना चाहिये। दक्षिणभागे पुष्पचन्द क्षतादीन् न्यस्य आग्नेय भागे दीपादिकं न्सस्य, वामभागे स्वस्तिके वस्त्र गालितं जलं संस्थाप्य गुरुः नववस्त्रं संवेष्ट्य आचम्य उपवीतवत् उत्तरीयं वस्त्रं धृत्वा देवं संवंद्य प्रधान द्वारे मण्टपं प्रविश्य कलश समीपे स्वासने उपविश्य पवित्रपाणिः गुरून् गणपतिं च संवंद्य अस्त्रेण करशोधनं कृत्वा ताळत्रयादिग्बन्धन आग्निप्राकारांश्च कुर्यात्।

दाहिने ओर फूल चन्दन अक्षतादिकों को रखकर, आग्नेय भाग में दीप रखें। बायें भाग में स्वस्तिक चिन्ह लिखकर उस पर धान डालकर उस पर शुद्ध पात्र रखें। पात्र का मुख वस्त्र से बन्द रखें। उसमें जल भरें। आचार्य नवीन वस्त्र को धारण करें। उत्तरीय को यज्ञोपवीत के समान पहनें (ब्रह्म वस्त्र) भगवान

का स्मरण अपने आसन पर बैठें। आचमन करें। पवित्र धारण करें। गुरु गणेश को नमस्कार करें। पहले लिखित ''ॐ ह्ही स्फुर स्फुर-अस्त्र मन्त्र से हाथ धो लेवें। तीन बार ताल (हाथ) से हाथ मिलाने पर होन वाला)शब्द करें। फिर दिग्बन्ध अग्निप्राकार को करें।

सूक्ष्म मध्य महाशब्दाः दक्षसव्योम्योद्भवाः। बोधासेचनिकोद्दीप्ति करा वह्नेस्त्रितालकाः॥ *(अनुष्ठान पद्धति-टिप्पणी)*

तीन प्रकार के ताळ (ताली) शब्द पहले सूक्ष्म, फिर मध्यम, एवं फिर अधिक शब्द का होना चाहिये। सूक्ष्म ताल दाहिने हाथ नीचे रखें उस पर बायें हाथ से ताली बजायें। इससे दाहिने हाथ में अग्नि उत्पन्न हुआ। मध्यम ताल में बायें हथेली नीचे उस पर दाहिने हाथ से ताल करें। तब दाहिने हाथ की अग्नि बायें हाथ में रखकर उसमें घी की हवन की कल्पना करनी चाहिये। फिर महाताल से दोनों हाथ को मिलाने से अग्नि प्रज्वलन की कल्पना करनी चाहिये। यह अग्नि का त्रिताल कहलाता है।

इसके पश्चात् दश दिशाओं का दिग्बन्धन करें ताकि कोई असुर यज्ञ में बाधा न पहुँचा सके। जहाँ बैठे हैं हवीं पर अस्त्र मन्त्र को पढते हुए चिटकी बजाकर दस दिशाओं का दिग्बन्धन करें। ''ॐ ह्री स्फुर स्फुर मन्त्र को पढकर अन्त में **प्राचीं दिशं बध्नामि** कहकर चिटकी बजायें। **फिर** ॐ ह्ही स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तरतनूरूप चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुँ फट्'' आग्नेयीं दिशं बध्नामि कहकर चिटकी बजायें*(प्रपञ्चसार)*। **फिर** याम्यां दिशं बध्नामि। नैऋतीं दिशं बध्नामि। वारुणीं दिशं बध्नामि। वायवीं दिशं बाध्नामि। साम्यं दिशं बध्नामि। ऐशानीं दिशं बध्नामि। ऊर्ध्वा दिशं बध्नामि। अधरां दिशं बध्नामि। प्रत्येक दिशा में इन मन्त्रों में पहले अस्त्र मन्त्र पढें एवं दिशं बध्नामि कहकर उस-उस दिशा में चिटकी बजायें। करयोः उद्दीप्त अग्निं दशदिक्षु विकिरेत्। हथ में उत्पन्न अग्नि को चारों ओर फेंकना चाहिय। (इसकी कल्पना करनी चाहिये) इससे यज्ञ एवं यज्ञशाला की रक्षा संपन्न हुआ।

अब अपने शरीर शुद्धि के लिए **नाडी शोधन करें।** इसके लिए द्वादशवारं प्रणवं संजप्य प्राणायामान् कृत्वा स्वस्य विराड्रूपं संकल्प्य अं इति त्रिवारुमुच्चार्य

पिङ्गलया वायु विमुच्य ष्वडवारेण पिङ्गलया प्रपूर्य द्वादशवारेण परिकुम्य इडया तं वायुं विमुञ्चेत् पुनः उं इति त्रिवारमुच्चार्य इडया वायुं विमुच्य षड्वारेण वायुं इडया प्रपूर्य द्वादशवारेण इडां प्रकुम्य तं वायुं पिङ्गलया मुञ्चेत्। पुनः तद् वायुं सुषुम्ना मुखे आकृष्य मं इति षड्वारं प्रजप्य अं उं इति षड्वारं प्रजाय पिङ्गलया इडया च प्रपूर्य पुनः सुषुम्नां आपूर्य द्वादशवारं प्रजप्य सुषुम्नां परिकुम्य तद्वायुं व्यत्यस्य बहिस्त्यजेत्।

इति नाडी शुद्धि प्रकारः।

१२ बार ॐकार का जप करें। प्राणायाम (संमंत्रक) करें। यहाँ मन्त्र केवल ॐकार। अपने को विराट पुरुष की कल्पना करें। अं को तीन बार कहते हुए पिङ्गला से (नाक के दाहिने छिद्र) अन्दर के कश्मल पूरित वायु को बाहर छोडें। फिर पिङ्गला से (नाक के दाहिने छिद्र से) ६ बार अं कहते हुए वायु को अन्दर लेना चाहिये। १२ बार अं कहते हुए उस वायु का कुम्भक (स्तम्भन) करें। इडा से (बायें नाक के छिद्र से) बाहर छोडें। फिर उं का तीन बार कहते हुए इडा से (नाक के बायें छेद से) वायुं को छोडें। फिर ६ बार उं कहते हुए इडा से वायु को अन्दर लेना चाहिये। १२ बार उं कहते हुए उस वायु का कुम्भक (स्तम्भन) करें। उस वायु को पिङ्गल से (नाक के दाहिने छिद्र से)बाहर करें। फिर अं उं कहकर छः बार पिङ्गल एवं इडा दोनों नाक के छिद्रों से वायु को खीच, फिर उस वायु को ब्रह्मरन्ध्र के सुषुम्ना में खींचकर अर्थात् मस्तिष्क नाडि से वायु को भरें। १२ बार मं का जप करते हुए सुषुम्ना में कुम्भक (स्तम्भन करें) उस वायु को उलटी नाक से। दाहिने नाक से खीचे वायु को बाये छिद्र से एवं बायें छिद्र से खीचें वायु को दाहिने छिद्र से छोडें।

यहाँ पर नाडि शोधन संपन्न हुआ। इससे शरीर शुद्धि होती है। जब तक शरीर शुद्धि नहीं होती है तब तक शरीर में देवता नहीं आते हैं। कर्म सफल नहीं होता है। अतः नाडी शोधन आवश्यक हैं। अभ्यास से यह क्रिया बहुत सरल है। **प्रणवेन षोडशवारं प्राणायामं कृत्वा पिङ्गलया वायुं विमुच्य द्वात्रिंशद्वारं प्राणायामं कृत्वा इडया वायुं प्रपूर्य चतुःषष्टिवारेण सुषुम्ना नाड्यां कुम्भकं कुर्यात्॥**

इति रेचक पूरक कुम्भक प्रकारः

ॐकार से १६ बार कहते हुए पिङ्गल। (नाक से दाहिने छिद्र से) वायु को बाहर छोडे। ३२ बार ॐकार कहते हुए इडा से नाक के बायें छिद्र से ..वायु को अन्दर भर लेवें। ६४ बार ॐकार कहते हुए सुषुम्ना नाडि में (ब्रह्मरन्ध्र मस्तिष्क में) कुम्भक (स्तम्भन) करें। साधना करने से यह सम्भव है। **अनेन अत्यन्त दुरितनिवृत्तिः स्यात्।** इसके अत्यधिक पापों का निवारण होता है।

एवं रेचकादिना जीवपरमात्मनोः ऐक्यं मनसा ध्यात्वा पुनः ॐ ह्रीं हं सः इत्यनेन मूलाधारस्थं जीवं, सुषुम्ना मार्गेण द्वादशांतस्थ परमात्मनि संयोज्य लं इति पादाग्रं वं इति नाभिं रं इति हृदयं यं इति कण्ठं हं इति तालुदेशं संस्पृश्य क्रमेण पृथ्वी अप् तेज वायु आकाशानां मण्डलानि संकल्प्य ह्लां इति पञ्चविंशति संख्यं पञ्चप्राणायामान् कृत्वा ह्लां हुँ फट् इति पादागादि नाभ्यन्तं व्याप्य पृथिवीं अप्सु संहरामि। पुनः ह्वीं इति पञ्चविंशति संख्य चतुर्वारं प्राणायामान् कृत्वा ह्वीं हुं फट् इति नाभ्यादि हृदयान्तं व्याप्य अपः अग्नौ संहरामि। पुनः ॠूं इति पञ्चविंशति संख्यं त्रिवारं प्राणायामान् कृत्वा ॠूं हुं फट् इति हृदयादि कण्ठां व्याप्य अग्निं वायौ संहरामि। पुनः ह्यौं इति पञ्चविंशति संख्यं द्विवारं प्राणायामं कृत्वा ह्यौं हुं फट् इति कण्ठादि ताल्वन्तं व्याप्य वायुं आकाशे संहरामि। पुनः हौं इति पञ्चविंशति संख्यं सकृत् प्राणायामं कृत्वा ह्यौं हुं फट् इति ताल्वादि द्वादशान्तं व्याप्य आकाशं परमात्मनि संहरामि। *(अनुष्ठान पद्धति)*

इति भूत संहारः

यह भूत संहार प्रक्रिया यह महत्व पूर्ण अङ्ग है। इसमें पञ्च महाभूतों का संहार कर उन्हें परमात्मा में लन करा देते हैं। तब शरीर में केवल परमात्मा का शुद्ध रूप मात्र रहता है। कोई कश्मल नहीं। रेचक पूरक कुम्भकों से जीव एवं परमात्मा की एकता का चिन्तन करना चाहिये। फिर ॐ ह्रीं हं सः कहते

हुए मूलाधार .. शरीर के नीचले हिस्से में विद्यमान जीव को सुषुम्ना मार्ग से ब्रह्मरन्ध्र में स्थित परमात्मा में मिलाना चाहिये। लं कहकर पैर के अग्र भाग को, वं कहकर नाभि को, रं कहकर हृदय को, यं कहकर कण्ठ को एवं हं कहकर तालु प्रदेश को स्पर्श करें। फिर मन में पृथ्वी, जल, तेज, वायु एवं आकाश मण्डलों का चिन्तन करें।

२५ बार ह्लां कहते हुए ५ प्राणायाम करते हुए ह्लां हुं फट् कहते हुए पैर से नाभि तक हाथ फिराते हुए वायु तत्व को नाभि में स्थित जल तत्व में मिलाने का संकल्प करना चाहिये। २५ बार ह्लीं करते हुए ४ प्राणायाम करते हुए ह्लीं हुं फट् कहते हुए नाभि से हृदय तक हाथ फिराते हुए जल तत्व को हृदय स्थित अग्नितत्व में मिलाने का संकल्प करना चाहिये। फिर २५ बार ह्लीं कहते हुए ३ प्राणायाम करते हुए ह्लूं हुं फट् कहते हुए हृदय से कण्ठ तक हाथ फिराते हुए अग्नितत्व को वायु तत्व में (कण्ठ में स्थित) मिलाने का संकल्प करना चाहिये। फिर २५ बार हौं कहते हुए दो प्राणायाम करते हुए हौं हुं फट् कहते हुए कण्ठ से तालु प्रदेश तक हाथ फिराते हुए वायु तत्व को तालु स्थित आकाश तत्व में मिलाने का संकल्प करना चाहिये। फिर २५ वा हौं कहते हुए एक प्राणायाम करते हुए हौं हुं फट् कहते हुए तालु प्रदेश से ब्रह्मरन्ध्र तक फिराते हुए आकाश तत्व को ब्रहन्ध्र स्थित परमात्म तत्व में लीन करना चाहिये। **अब मात्र निर्विकार परमात्मा शरीर में है।**

शोषण विधान—इस विधान से शरीर में विद्यमान सभी कल्मशों का शोषण होता है।

यं इति वायु बीजेन षोडशवारं प्राणायामं कृत्वा वायुं इडया विमुच्च इडामुखे नाभिपषे च षड् बिन्दु सहितं धम्रं वायुमण्डलं तस्मिन् धुम्रं यं बीजं च ध्यात्वा, तद् बीजेन द्वात्रिंशद्वारं प्राणायामं कृत्वा इडया तद् वायुमण्डलेन सह वायुमापूर्य मण्डल द्वयं एकीकृतं ध्यात्वा, चतुःषष्टि वारं प्राणायामं कृत्वा परिकुम्भ्य एकीकृत वायुमण्डलात् संजातेन वायुना देहं संशोषितं ध्यात्वा तद् वायुं पिङ्गलया मुञ्चेत। *(अनुष्ठान पद्धति)*

इति शोषणं

यं नामक वायुतत्व के बीच मन्त्र को १६ बार कहते हुए इडा (नाक के बायें छिद्र) से सॉस छोड़ते हुए प्राणायाम करें। बायें नाक के छेद में एवं नाभि के नंध्र में छः बिन्दु युक्त वायुमण्डल को एवं उसमें धूम्र वर्ण के यं बीच का ध्यान करें उस बीजमन्त्र को ३२ बार कहते हुए प्राणायाम करें। इडा (बायें नाक के छेद) से वायु को भरकर दोनों मण्डलों का एकीकृत मानकर इडा मण्डल यानि बायें नाक के छिद्र में स्थित मण्डल एवं नाभिप) यानि नाभि में स्थित मण्डल) फिर ६४ बार बीज मन्त्र को जपते हुए कुम्भक (स्तम्भन) करते हुए एकीकृत वायुमण्डल से उत्पन्न वायु से देह सूख गया है समझकर उस वायु को पिङ्गला (दाहिने नाक के छिद्र) से छोडना चाहिये। इससे शरीर में विद्यमान समस्त कश्मलों का शोषण होता है।

दाहन—इस विधान से शरीर में शोषित (सुखाये गये) सभी कश्मलों का दहन हो जाता है।

पुनरग्निबीजेन षोषशबारं प्राणायामं विधाय पिङ्गलया वायुं विमुच्य पिङ्गलामुखे हृदिपषे च स्वस्तिकसहितं त्रिकोणं रक्तं अग्निमण्डलं तन्मध्ये रक्तं रं इति च ध्यात्वा, तद् बीजेन हात्रिंशद्वारं प्राणायामं कृत्वा पिङ्गलया तद् अग्निमण्डलेन सह वायुमापूर्य मण्डलद्वयं एकीकृतं ध्यात्वा, चतुःषष्टिवारं प्राणायामं कृत्वा परिकुम्भ्य एकीकृत अग्निमण्डलात् संजातेन अग्निना देहं दग्धं ध्यात्वा तद् वांयु इडया विमुञ्चेत्। *(अनुष्ठान पद्धति)*

इति दाहानं

पिर रं नामक अग्नि बीज मन्त्र को १६ बार जपते हुए पिङ्गला से (नाक के दाहिने छिद्र) सॉस छोड़ते हुए प्राणायाम करें। नाक के दक्षिण छिद्र में एवं हृदय प.. में स्वस्तिक सहित त्रिकोणाकार रक्तवर्णीया अग्निमण्डल को एवं उसमें रक्त वर्णीय रं बीज मन्त्र का ध्यान रकें। उस बीज मन्त्र का ३२ बार जप करते हुए प्राणायाम करें। पिङ्गला से वायु को भरकर दोनों मण्डलों को एकीकृत मानकर (पिङ्गला मण्डल यानि दाहिने नाक के छिद्र का मण्डल एवं

हृदि पद्म यादि हृदय में स्थित मण्डल, फिर ६४ बार बीज मन्त्र को जपते हुए, कुम्भक (स्तम्भन) करते हुए, एकीकृत अग्निमण्डल से उत्पन्न अग्नि से देह जल गया है समझकर उस वायु को इडा नाक के बायें छिद्र से छोडना चाहिये। इससे शरीर में विद्यमान समस्त कल्मश जो पहले सूख गये थे अब जल गये है।

प्लावन—इस विधान में शरीर में दग्ध (जलायें गये सभी कल्मशों का) निराकरण हो गया है। साथ ही शरीर भी जल गया है। फिर से कश्मल रहित शरीर का निर्माण करने का विधान है।

वं इति अमृतबीजेन षोडशवारं प्राणायामं कृत्वा इडया वायुं विमुच्य इडामुखे द्वादशांतपद्मे च पद्म सहितं अर्धचन्द्रात्मकं सितं आप्यं मण्डलं तन्मध्ये शुभ्र वं इति च ध्यात्वा, तद् बीजेन द्वात्रिंशद्वारं प्राणायामं कृत्वा इडया तद् अमृतमण्डलेन सह वायुमापूर्य मण्डलद्वयं एकीकृतं ध्यात्वा, चतुःक्षष्टिवारं प्राणायामं कृत्वा परिकुम्भ्य एकीकृत अमृतमण्डलात् संजातेन अमृतेन देहं द्वादशांतपद्मात् गलितैः परचैतन्यामृतजलैः प्रपञ्चैकीकृतं आप्लावितं ध्यायेत्। *(अनुष्ठान पद्धति)*

वं नामक अमृत तत्व के बीज मन्त्र को १६ बार जपते हुए इडा से साँस छोडते हुए प्राणायाम करें। इडा में एवं द्रादशान्त पद्म (ब्रह्मरन्ध्र) में पद्म सहित अर्धचन्द्रकार शुक्ल (सफेद) रंग का अमृत मण्डल को, एवं उसके बीच में शुक्ल वर्ण के वं बीज मन्त्र का ध्यान रकें। फिर उस बीज से ३२ बार जपते हुए इडा एवं अमृत मण्डल से वायु को भरकर प्राणायाम करते हुए, दोनों मण्डलों को एकीकृत मानकर (इडा मण्डल एवं पद्म सहित अर्धचन्द्रकार अमृत मण्डल) फिर ६४ बार वं बीजाक्षर को जपते हुए कुम्भक (स्तम्भन) करें। एकीकृत अमृत मण्डल से उत्पन्न अमृत से देह को, द्वादशान्त (सहस्त्रार) पद्म से गिर रहे परमात्म वस्तु अमृत जल से आप्लावित शरीर अमृतमय हो गया है। इस प्रकार पहले कश्मलों का विनाश होकर फिर अमृतमय शरीर की प्राप्ति हो गयी।

यहाँ पर अमृतमय शरीर प्राप्त हुआ

आगे पञ्चभूतसृष्टि—लं इति पृथ्वी बीजेन बुद्बुदाभं ब्रह्माराडं संकल्प्य हं इति सुरीकरणांकृत्वा सोहं इति द्वादशान्तपश्चात् जीवं स्वहृदये संयोज्य, हौं इति पञ्चविंशति संख्यं सकृत प्राणायामं कृत्वा, हौं नमः इति द्वादशान्तादि ताल्वन्तं व्याप्य आत्मनः आकाशं सृजामि, पुनः ह्यौं इति पञ्चविंशति संख्यं द्विवारं प्राणायामं कृत्वा ह्यौं नमः इति ताल्वादि कराडान्तं व्याप्य आकाशात् वायुं सृजामि, पुनः ॠ्रूं इति पञ्चविंशति संख्यं त्रिवारं प्राणायामं कृत्वा ॠ्रूं इति पञ्चविंशति संख्यं चतुर्वारं प्राणायामं कृत्वा ह्वीं नमः इति हृदयामि नाभ्यन्तं व्याप्य अग्नेः अपः सृजामि, पुनः ह्लां इति पञ्चविंशति संख्यं पञ्च प्राणायामान् कृत्वा ह्लां नम इति नाभ्यादि पादान्तं व्याप्य अद्भ्यः पृथिवीं सृजामि। *(अनुष्ठान पद्धति)*

इस प्रक्रिया में नष्ट हुए शरीर की पञ्चभूत सृष्टि विधान है। लं नामक पृथ्वी बीज से बद्बुदाकार के ब्रह्माराड सृष्टि का चिन्तन करें। हं नामक आकाश बीज का स्मरण करते हुए उसमें आकाश का चिन्तन करें। मैं परमात्मा हूँ मानते हुए सहस्रार से (ब्रह्मरन्ध्र) जीव को हृदय पद्म में स्थपित करें। हौं आकाश बीज का २५ बार जप करते हुए एक प्राणायाम करें। हौं नमः कहकर ब्रह्मरन्ध्र से तालु पर्यन्त हाथ फेरते हुए परमात्मा से आकाश सृष्टि की कल्पना करें। फिर ह्यौं नमः वायु बीज का २५ बार जप करते हुए दो प्राणायाम करें। ह्यौं नमः कहकर तालू से कराड तक हाथ फेरते हुए आकाश से वायु सृष्टि का चिन्तन करें। फिर ह्रूं अग्नि बीज का २५ बार जप करते हुए तीन प्राणायाम करें। ॠ्रूं नमः कहकर कराठ से हृदय तक हाथ फेरते हुए वायु से अग्नि सृष्टि का चिन्तन करें। फिर ह्वीं जल बीज का २५ बार जप करते हुए चार प्राणायाम करें। ह्वीं नमः कहकर हृदय से नाभितक हाथ फेरते हुए अग्नि से जल सृष्टि का चिन्तन करें। फिर ह्लां पृथ्वी बीज का २५ बार जप करते हुए पाञ्च प्राणायाम करें। ह्लां नमः कहकर नाभि से पॉव तक हाथ फेरते हुए जल से पृथ्वी सृष्टि का चिन्तन करें।

पुनः षष्टयुत्तर त्रिशत प्रणव प्राणायामं कृत्वा, संवत्सरोषितं संकल्प्य फडन्त प्रणवेन अराड भेदं कृत्वा तत् शकले

द्यावापृथिव्यौ ध्यात्वा तदन्तर्वर्तिनं जीवं विराड्रूपं ध्यात्वा पुनः लिपि प्राणायामं कृत्वा पीठन्यासं कृत्वा स्वहृदये लिपि आवाह्य तत्रैव सकलीकृत्य मानसपूजां विधय पुनः प्राणायामं कृत्वा लिप्या करन्यासं कृत्वा देहे व्याप्य लिपिन्यासं कृत्वा अङ्गन्यासं कृत्वा ऋषिछन्दोदेवताः न्यस्य यथाशक्ति लिपिं संजप्य व्याप्य लयाङ्गं कृत्वा गणानान्त्वेति गणपति मन्त्रं दुर्गा मन्त्रं च जप्त्वा पुनः मन्त्रोदयं कुर्यात्। *(अनुष्ठान पद्धति)*

३६० बार ॐकार का जप करते हुए प्राणायाम करें एक वर्ष बीता है समझकर (ब्रह्माण्ड सृष्टि का) ॐ फट् कहते हुए ब्रह्माण्ड भेदन की कल्पना कर उन दो टुकडो को भूमि एवं आकाश मानते हुए उसके बीच में स्थित जीव को विराट् स्वरूप मानते हुए **लिपि प्राणायाम** को करें। "अं आं इं ईं उं ऊं ऋं ॠं लं लृं एं ऐं ओं औं अं अः। कं खं गं घं ङं। चं छं जं झं ञं। टं ठं डं ढं णं। तं थं दं धं नं। पं फं बं भं मं। यं रं लं वं शं षं सं हं ळं क्षं" यह लिपि प्राणायाम मन्त्र है। फिर पीठ न्यास करें। गुं गुरवे नमः—इति मूर्धनि (मस्तक में) गं गणपतये नमः-इति मूलाधार में (मूल में)

आधारशक्त्यै नमः। मूल प्रकृत्यै नमः। आदि कूर्माय नमः। अनन्ताय नमः। पृथिव्यै नमः। कहते हुए मूलाधार से नाभितक न्यास करें।

धर्माय नमः-दक्षिण ऊरु (दाहिना जाँघ), ज्ञानाय नमः-दक्षिण अंसे (दाहिनी भुजा), वैराग्याय नमः-वाग अंसे (बायें भुजा), ऐश्वर्याय नमः-वाम ऊरु (बायें जाँघ), अधर्माय मनः-नाभि मूले (नाभि के मूल में), अज्ञानाय नमः-दक्षिण पार्श्वे (दाहिने पार्श्व में), अवैराग्याय नमः-मुखे (मुख में), अनैश्वर्याय नमः-वाम पार्श्वे (बायें पार्श्व में), सं सत्वाय नमः-मध्ये सूत्ररूपेण (बीच में धागे के रूप में नाभि के पास), रं रजसे नमः-मध्ये सूत्ररूपेण (बीच में धागे के रूप में नाभि के पास), तं तमसे नमः-मध्ये सूत्ररूपेण (बीच में धागे के रूप में नाभि के पास), मां मायायै नमः-वितान रूपेण (छत के रूप मे सिर के ऊपर), विं विद्यायै नमः-वितान रूपेण (छत के रूप मे सिर के ऊपर), पं पद्माय नमः-हृदय (हृदय में), अं अर्कमण्डलाय नमः-हृदय (हृदय में), उं सोममण्डलाय नमः-हृदय (हृदय में), मं वह्निमण्डलाय नमः-हृदय (हृदय में), अं आत्मने नमः-(हृदय में), उं अन्तरात्मने नमः-(हृदय में), मं

परमात्मने नमः-(हृदय में), ॐवामायै नमः। हृदय पद्म के आठ दलों में, ॐज्येष्ठायै नमः। हृदय पद्म के आठ दलों में, ॐरौद्र्यै नमः। हृदय पद्म के आठ दलों में, ॐकाल्यै नमः। हृदय पद्म के आठ दलों में, ॐकलविकलिन्यै नमः। हृदय पद्म के आठ दलों में, ॐबल विकलिन्यै नमः। हृदय पद्म के आठ दलों में, ॐबल प्रमथिन्यै नमः। हृदय पद्म के आठ दलों में, ॐसर्व भूत दमन्यै नमः। हृदय पद्म के आठ दलों में, (हृदय पद्म के बीच में।, ॐमनोन्मन्यै नमः (हृदय पद्म कर्णिकायां), ॐनमो भगवते सकल गुणात्म शक्ति युक्ताय अनन्ताय येगपीठात्मने नमः। *(अनुष्ठान पद्धति)*

पीठ न्यास पूरा हुआ

अपने हृदय में अकारादि सभी लिपियों का आवाहन करें। वहीं पर सभी का मानस पूजा करें। उससे पूर्व **सकलीकरण न्यास** कर लें।

ॐहृदयाय नमः। ॐशिरसे स्वाहा। ॐशिखायै वषट्। ॐकवचाय हुम्। ॐनेत्रत्रयाय वौषट्। ॐअस्त्रायफट्। न्यास के बाद आत्मा का मानस पूजन करें। ॐलं पृथिव्यात्मना गन्धं कल्पयामि। ॐहं आकाशात्मना पुष्पं कल्पयामि। ॐयं वाय्वात्मना धूपं कल्पयामि। ॐरं अग्न्यात्मना दीपं कल्पयामि। ॐवं अबात्मना नैवेद्यं कल्पयामि। ॐमं परमात्मना सर्वोपचार पूजां कल्पयामि। फिर प्राणायाम करें। पिपि से करन्यास करें

ॐअं कं खं गं घं ङं आं-अङ्गुष्ठाभ्यां नमः। ॐइञ्चं छं जं झं ञं ई-तर्जनीभ्यां नमः। ॐउं टं ठं डं ढं णं ऊं- मध्यमाभ्यां नमः। ॐएं तं थं दं धं नं ऐं-अनामिकाभ्यां नमः। ॐओं पं फं बं भं मं औं - कनिष्ठिकाभ्यां नमः। ॐअं यं रं लं वं शं षं हं ळं क्षं अः करतल करपृष्ठाभ्यां नमः। फिर पिपि को देह में व्याप्य करें।

अंनमः आं नमः इं नमः ईं नमः उं नमः ऊं नमः करतलपृष्ठपार्श्वेषु न्यासं कुर्यात्। ऋं नमः-दाहिना अङ्गुष्ठा, ॠं नमः-दाहिना तर्जनी, लृं नमः- दाहिना मध्यमा, लॄं नमः- दाहिना अनामिका, एं नमः-दाहिना कनिष्ठिका *(अनुष्ठान पद्धति)*, ऐं नमः-वाम कनिष्ठिका, ओं नमः-वाम अनामिका, औं नमः-वाम

मध्यमा, अं नमः- वाम तर्जनी, आं नमः-वाम अङ्गुष्ठ, कं नः-दाहिने हाथ के तर्जनी मूल से अग्र तक (पर्व सन्धियों के अग्र में।), खं नमः-दाहिने हाथ के तर्जनी मूल से अग्र तक (पर्व सन्धियों के अग्र में।), गं नमः-दाहिने हाथ के तर्जनी मूल से अग्र तक (पर्व सन्धियों के अग्र में।), घं नमः-दाहिने हाथ के तर्जनी मूल से अग्र तक (पर्व सन्धियों के अग्र में।), ङं नमः-दाहिने हाथ के मध्यमा मूल से अग्र तक, चं नमः-दाहिने हाथ के मध्यमा मूल से अग्र तक, छं नमः-दाहिने हाथ के मध्यमा मूल से अग्र तक, जं नमः-दाहिने हाथ के मध्यमा मूल से अग्र तक, झं नमः-दाहिने हाथ के अनामिका के मूल से अग्र तक, ञां नमः-दाहिने हाथ के अनामिका के मूल से अग्र तक, टं नमः-दाहिने हाथ के अनामिका के मूल से अग्र तक, ठं नमः-दाहिने हाथ के अनामिका के मूल से अग्र तक, डं नमः-दाहिने हाथ के कनिष्ठिका मूल से अग्र तक, ढं नमः-दाहिने हाथ के कनिष्ठिका मूल से अग्र तक, णं नमः-दाहिने हाथ के कनिष्ठिका मूल से अग्र तक, तं नमः-दाहिने हाथ के कनिष्ठिका मूल से अग्र तक, थं नमः-बाये हाथ के कनिष्ठिका मूल से अग्र तक, दं नमः-बाये हाथ के कनिष्ठिका मूल से अग्र तक, धं नमः-बाये हाथ के कनिष्ठिका मूल से अग्र तक, नं नमः-बाये हाथ के कनिष्ठिका मूल से अग्र तक, पं नमः-बाये हाथ के अनामिका मूल से अग्र तक, फं नमः-बाये हाथ के अनामिका मूल से अग्र तक, बं नमः-बाये हाथ के अनामिका मूल से अग्र तक, भं नमः-बाये हाथ के अनामिका मूल से अग्र तक, मं नमः- बाये हाथ के मध्यमा के मूल से अग्र तक, यं नमः-बाये हाथ के मध्यमा के मूल से अग्र तक, रं नमः-बाये हाथ के मध्यमा के मूल से अग्र तक, लं नमः-बाये हाथ के मध्यमा के मूल से अग्र तक, वं नमः- बाये हाथ के तर्जनी के मूल से अग्र तक, शं नमः-बाये हाथ के तर्जनी के मूल से अग्र तक, षं नमः-बाये हाथ के तर्जनी के मूल से अग्र तक, सं नमः-बाये हाथ के तर्जनी के मूल से अग्र तक, हं नमः-अङ्गुष्ठ के मूल, (दोनों हाथ), ळं नमः-अङ्गुष्ठ के मध्य, (दोनों हाथ), क्षं नमः-अङ्गुष्ठ के अग्र, (दोनों हाथ)

अङ्गन्यास—ॐ अं कं खं गं घं ङं आं - हृदयाय नमः, ॐ इं चं छं जं झं ञं ईं-शिरसे स्वाहा, ॐ उं टं ठं डं ढं णं ऊं-शिखायै वषट्, ॐ ऐं तं थं दं धं नं ऐं-कवचाय हुम्, ॐ ओं पं फं बं भं मं औं -नैत्रत्रयाय वौषट्, ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः-अस्त्रायट्

ऋषि छन्द देवता न्यास—शब्द ब्रह्म ऋषिः गायत्री छन्दः मातृका सरस्वती देवता शिरसि ऋषिः, मुखे छन्दः, हृदये देवता का स्मरण कर लेवे। ऋषि देवता छन्द न्यास करने के बाद यथा शक्ति लिपि का पजकर उसे समस्त शरी में व्यासकर अङ्गन्यास का लयाङ्ग यानि उलटा करके न्यास करें।

ॐ अं यं रं लं वं षं षं सं हं ळं क्षं अः - अस्त्राय फुट्, ॐ ओं पं फं बं भं मं औं - नेत्रत्रयाय वौषट्, ॐ ऐं तं थं दं धं नं ऐं - कवचाय हुम्, ॐ उं टं ठं डं ढं णं ऊं - शिखायै वषट् , ॐ इं चं छं जं झं ञं ईं - शिरसे स्वाहा, ॐ अं कं खं गं घं ङं आं-हृदयाय नमः *(अनुष्ठान पद्धति)*

ॐ इमा या ब्रह्मणस्पते विषूचीर्वात ईरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि

स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु॥ *(अथर्ववेद १९.८.६)*

इस मन्त्र से गणपति की प्रार्थना करें।

ॐ देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।

याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु ॥ *(अथर्ववेद ७.४९.१)*

इस मन्त्र से दुर्गा देवी की प्रार्थना करें।

मन्त्रोदय विधान—ह ह ह इति प्रजप्य मूलाधारस्थं पीवंपरमात्मनि लाप्य तन्मंत्रात्मकं ध्यात्वा पुनः प्रणवसहित मूलमन्त्रं उक्त्वा हृदय प.. सुयोज्य मूल मंत्रेण पञ्चविशति संख्यं प्राणायाम त्रयं कृत्वा क्रमेण पर सूक्ष्म स्थूलात्मकं ध्यात्वा

तस्य विराड्रूपस्य आधारार्थं पीठन्यासं कृत्वा स्वहृदये मूर्ति संकल्प्य आवाह्य सकलीकृत्य मानस पूजां विधाय पूज्य पूजकयोः ऐक्यं संभाव्य मूलेन पञ्च विंशति संख्यं प्राणायामं कृत्वा तेजः कणां पिङ्गलया अंजलो निपात्य करन्यास कृतवा ताभ्यां हस्ताभ्यां मूलेन देहे त्रिवारं व्याप्य तत्वन्यासं कुर्यात्। *(अनुष्ठान पद्धति)*

ह ह ह इसका जप कर मूलाधार में स्थित जी को परमात्म में मिलाना चाहिये। अब जीव मन्त्रात्मक हो गया मानना चाहिये। फिर प्रणव सहित मूल मन्त्र का जप करें। ॐ नमो नारायणाय।'' देवता को हृदय में स्थापित करें। फिर २५ बार मूल मन्त्र का जप करते हुए तीन बार प्राणायाम करें। पहले प्राणायाम से परब्रह्म रूपी, दूसरे प्राणायाम से जीव सूक्ष्मरूप, एवं तीसरे प्राणायाम से जीव स्थूल रूप को प्राप्त करता है। उस विराट् स्वरूप के जीव के आधार के लिए पीठ न्यास करें पं पद्माय नमः कहकर पीठन्यास करें। अपने हृदय मे विष्णु मूर्ति का चिन्तन करें, आवाहन करें ''ॐनमो नारायणाय। विष्णुं आवाहयामि।'' सकलीकरण कर ॐहृदयाय नमः। ॐशिरसे स्वाहा। ॐशिखायै वषट् ॐकवचाय हुम् ॐनेत्रत्रयाय वौषट् ॐअस्त्राय फट्

मानस पूहां कृत्वा—ॐलं पृथिव्यात्मना गन्धं कल्पयामि। ॐआकाशात्मना पुष्पं कल्पयामि। ॐयं वाय्वात्मना धूपं कल्पयामि। ॐरं अग्न्यात्मना दीपं कल्पयामि। ॐवं अबात्मना नैवेद्यं कल्पयामि। ॐमं परमात्मना सर्वोपचार पूजां समर्पयामि। *(अनुष्ठान पद्धति)*

पूजन करने वाला एवं पूजित देवता दोनों उपरोक्त क्रियाओं से एक हुए मानकर मूल मन्त्र ''ॐनमो नारायणाय।'' इसे २५ बार जपते हुए प्राणायाम करें। तेज कणों को पिङ्गला से (नाक के दाहिने छिद्र से) अंजली में भरकर विष्णु मूल मन्त्र से करन्यास करें।

ॐनमो नारायणाय अङ्गुष्ठाभ्यां नमः। ॐनमो नारायणाय तर्जनीभ्यां नमः। ॐनमो नारायणाय मध्यमाभ्यां नमः। ॐनमो नारायणाय अनामिकाभ्यां नमः। ॐनमो नारायणाय कनिष्ठिकाभ्यां नमः। ॐनमो नारायणाय करतल करपृष्ठाभ्यां नमः। दोनों हाथों से तीन बार देह पर हाथ फिराये तत्वन्यास को करें।

तत्वन्यास-कलाध्वा—ॐहौं नमः पराय शान्त्यतीत कलात्मने नमः मूर्धनि। ॐहौं नमः पराय शान्तिकलात्मने नमः मुखे। ॐहौं नमः पराय विद्या

कलात्मने नमः हीदये। ॐ हौं नमः पराय प्रतिष्ठा कलात्मने नमः गुह्ये। ॐ ह्लां नमः पराय निवृत्ति कलात्मने नमः पादयोः कहकर कला न्यास करें।

ॐ मं नमः पराय जीवात्मने नमः सर्वाङ्गे, ॐ भं नमः पराय प्राणात्मने नमः हृदये, ॐ बं नमः पराय बुध्यात्मने नमः हृदये, ॐ फं नमः पराय अहंकारात्मने नमः हृदये, ॐ पं नमः पराय मन आत्मने नमः हृदये, ॐ नं नमः पराय शब्दतन्मात्रात्मने नमः मूर्धनि, ॐ धं नमः पराय स्पर्शतन्मात्रात्मने नमः मुखे, ॐ दं नमः पराय रूप तन्मात्रात्मने नमः हृदये, ॐ थं नमः पराय रस तन्मात्रात्मने नमः गुह्ये, ॐ तं नमः पराय गन्ध तन्मात्रात्मने नमः पादयोः, ॐ णं नमः पराय श्रोत्रात्मने नमः श्रोत्रयोः

ॐ ढं नमः पराय त्वगात्मने नमः त्वचि। ॐ डं नमः पराय चक्षुरात्मने नमः चक्षुषि। ॐ ठं नमः पराय जिह्वात्मने नमः जिह्वायां। ॐ टं नमः पराय घ्राणात्मने नमः नासिकायोः। ॐ ञां नमः पराय वागात्मने नमः वाचि। ॐ झं नमः पराय पाणयात्मने नमः हस्तयोः। ॐ जं नमः पराय पादात्मने नमः पादयोः। ॐ छं नमः पराय पाय्वात्मने नमः अपाने। ॐ चं नमः पराय उपस्थात्मने नमः गुह्ये। ॐ ङ. नमः पराय आकाशात्मने नमः मूर्धनि। ॐ घं नमः पराय वाय्वात्मने नमः मुखे। ॐ गं नमः पाया तेज आत्मने नमः हृदये। ॐ खं नमः पराय अबात्मने नमः हुह्ये। ॐ कं नमः पराय पृथिव्यात्मने नमः पादयोः। ॐ शं नमः पराय हृत्पुण्डरीकात्मने नमः हृदये। ॐ हं नमः पराय सूर्यमण्डलाय द्वादशकलात्मने नमः हृदये। ॐ सं नमः पराय सोममण्डलाय षोडशकलात्मने नमः हृदये। ॐ रं नमः पराय वह्निमण्डलाय दशकलात्मने नमः हृदये। ॐ हौं पराय शान्त्यतीतात्मने नमः मूर्धनि। ॐ ह्यैं नमः पराय शान्त्यात्मने नमः मुखे ॐ हृं नमः पराय विद्यात्मने नमः हृदये। ॐ ह्लीं नमः पराय प्रतिष्ठात्मने नमः गुह्ये। ॐ ह्लां नमः पराय निवृत्यात्मने नमः पादयोः *(अनुष्ठान पद्धति)*। इति तत्व न्यासः।

शंखपूरणम्—अग्रतः गोमय जलेन चतुरस्त्र मण्डलं कृत्वा प्रणवेन तत्र गन्धपुष्पाक्षतान् न्यस्य अस्त्रेण शंखं शंखपादमपि प्रक्षाल्य वह्नि मण्डलेन शंखपादं, सूर्य मण्डलेन शंखं च न्यस्य हृदय मन्त्रेण शंखे गन्धपुष्पाक्षतान् न्यस्य शिरोमन्त्रेण शुद्धजलैः शंखमापूर्य गन्धपुष्पं निक्षिप्य वह्नि मण्डलेन शंखपादं सूर्यमण्डलेन शंखं, सोम मण्डलेन जलं संपूज्य, शिखा

मन्त्रेण गालिनी मुद्रया जलस्य उत्पवनं कृत्वा आलोड्य आपूर्य गुरुड मुद्रया निर्विषीकृत्य, सुरभिमुद्रया अमृतीकृत्य, नेत्र मन्त्रेण जल निरीक्ष्य कवचमन्त्रेण हस्ताभ्यां अच्छाद्य, अस्त्र मन्त्रेण संरक्ष्य, गङ्गे इत्यादिना तीर्थमावाह्य किंचित् पीठं संपूज्य मूलेन स्वहृदयात् देवमावाह्य सकलीकृत्य निवेद्य मुद्रा प्रदर्श्य वारं मूलमन्त्रं प्रजप्य वर्धन्यां किंचित् परिषिच्य शिष्टजलेन प्रणवेन पूजा द्रव्याणि आत्मानं च त्रिः प्रोक्षेत्। *(अनुष्ठान पद्धति)*

सामने गोमय जल से चतुरस्र मण्डल को बनाकर **ॐ कार** जपते हुए गन्ध पुष्प अक्षतों को डालकर **ॐ अस्त्राय फट्** रते हुए शंख को एवं खंख के आसन को धोवें। **ॐ रं वह्निमण्डलाय दश कलात्मने नमः** कहकर शंख पाद को मण्डल पर रखें। **ॐ हं सूर्यमण्डलाय द्वादश कलात्मने नमः** ''कहकर शंख को मण्डल पर रखें।

ॐ हृदयाय नमः कहते हुए शंख पर गन्ध पुष्प एवं अक्षत चडाये। **ॐ शिरसे स्वाहा** कहते हुए शुद्ध जल से शंख में जल भरें। उसमें गन्ध पुष्प डालें। **ॐ रं वह्निमण्डलाय नमः** कहकर शंखपाद का पूजन करें। **ॐ हं सूर्यमण्डलाय नमः** कहकर शंख का पूजन करें। **ॐ सं सोममण्डलाय नमः** कहकर जल का पूजन करें। **ॐ शिखायै वषट्** कहकर गालिनी मुद्रा से जल का उत्पवन (शुद्धीकरण करना) कर, हिलाकर, भरकर, गरुड मुद्रा से जल के विष का निवारण कर, सुरभिमुद्रा से अमृत बनाकर। **ॐ नेत्रायाय वौषट्** कहकर जल को देखें। **ॐ कवचाय हुम्** कहकर दोनों हाथों से उसे ढककर **ॐ अस्त्राय फट्** कहकर उसकी रक्षा की कल्पना करें। ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु।

(अनुष्ठान पद्धति)

कहकर जल में तीर्थ का आवाहन करें। **पं पद्माय नमः** कहकर पीठ का पूजन करें।

शंख तीर्थ में अपने हृदय से विष्णु देवता का आवाहन कर ॐ हृदयाय नमः। ॐ शिरसे स्वाहा। ॐ शिखाये वषट्। ॐ कवचाय हुम्। ॐ नेत्रात्रयास वौषट्

ॐ अस्त्राय फट् **कहकर सकलीकरण कर** नैवेद्य मुद्रा को दिखाकर **ॐ नमो नारायणाय** इस मूल मन्त्र को ८ बार जपने हुए कलश जल में किंचित् शंख जल को डालें शेष जल से तीन बार पूजा सामग्रियों को एवं अपने को ॐकार कहते हुए प्रोक्षण करें।

कलश प्रसङ्गे आत्माराधनम्—हृदये पीठं संपूज्य प्रणवाक्षरैः मूलाधार हृदय द्वादशान्त स्थित तेजांसि संपूज्य प्रणवेद तानि हृदयपद्मे नियोज्य मूलेन प्राणायामं कृत्वा व्याप्य आसनमिदं स्वागतमिदं पाद्यमिद, अर्घ्यमिदं आचमनमिदं स्नानमिदं वस्त्रमिदं आभारणमिदं इत्यादि उपहारान् दत्वा जलगन्धाभ्यां आत्मानं संपूज्य सद्योजातादि पञ्च ब्रह्मभिः ललाट कण्ठ अंसद्वय हृदय उदरेषु अष्टगंधेन तिर्यग् पुण्ड्राणि विलिप्य स्थाणु मंत्रण मूर्ध्नि पञ्चवारं पुष्पांजलि विधाय अं अर्कद्वयं कल्पयामि, इति पादाग्रदिनाभ्यन्तं कंलल्प्य पुष्पाजलिं कुर्यात्। ॐ करवीर द्वयं कल्पयामि इति नाभ्यादि हृदयान्तं संकल्प्य पुष्पांजलिं कुर्यात्। ॐ षट् कुसुमानि कल्पयामि इतिशिरसि। शेष कुसुमानि कल्पयामि इति सर्वाङ्गे च पुष्पांजलिं कुर्यात्। धूपं मुद्रां दीप मुद्रां प्रदर्श्य नैवेद्य काले अर्घ्यं दत्वा प्रसन्न पूजां विधाय पूजां समापयेत्। इति आत्मपूजा। *(अनुष्ठान पद्धति)*

हृदय में पी पूजा करें। **पं पद्माय नमः** इस मन्त्र से पीठ पूजा करें। प्रणवाक्षर अं उं मं इसी क्रम से मूलाधार हृदय एवं द्वादशान्त पत्र के तेज का पूजन करें। ॐकार से तीनों को मिलायें। ॐनमो नारायणाय इस मूल मन्त्र से प्राणायाम करके आसनं समर्पयामि। स्वागतं समर्पयामि। अर्घ्यं समर्पयामि। पाद्यं समर्पयामि। आचमनं समर्पयामि। स्नानं समर्पयामि। वस्त्रं समर्पयामि। आचमनं समर्पयामि। आभरणं समर्पयामि। गन्धं समर्पयामि। अक्षतान् समर्पयामि। पुष्पाणि समर्पयामि। धूपं समर्पयामि। दीपं दर्शयामि। इतना कहने के बाद जल एवं गन्ध से अपना पूजन करें।

ॐ स॒द्योजा॒तं प्रप॑द्या॒मि स॒द्योजा॒ताय॒ वै नमो॒ नमः। भ॒वेभ॑वे॒नाति॑ भ॒वे भ॑वस्व॒ मां भ॒वोद्भ॑वाय॒ नमः। *(यजुर्वेद-महानारायणोपनिषद्)*

कहकर ललाट में गन्ध धारण करें।

ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। *(यजुर्वेद-महानारायणोपनिषद्)*

कहकर कण्ठ में तिर्यक् त्रिपुण्ड्र गन्ध धारण करें।

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ *(यजुर्वेद-महानारायणोपनिषद्)*

कहकर दोनों भुजाओं पर गन्ध धारण करें।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। *(यजुर्वेद-महानारायणोपनिषद्)*

कहकर हृदय में गन्ध धारण करें।

ॐ ईशानः सर्वविद्यानामीश्वरः सर्व भूतानां ब्रह्माधिपति ब्रह्मणोधि पतिर्ब्रह्मा शिवो मे अस्तु सदाशिवों।

(यजुर्वेद-महानारायणोपनिषद्)

कहकर उदर में अष्टगन्ध धारण करें। स्थाणु मन्त्र से **पाँच बार पुष्पांजलि सिर पर डाल लेवे।**

स्थाणुमन्त्र—नमोस्तु स्थाणु भूताय ज्योतिर्लिंगावृतात्मने चतुर्मूर्तिवपुच्छाया भासिताङ्गाय शंभवे॥ *(क्रियासार)*

ॐ अं अर्क द्वयं कल्पयामि कहकर पैरों के तले से नाभिपर्यन्त कल्पना कर सि पर पुष्पांजलि डाल लेवें। **ॐ उं करवीर द्वयं कल्पयामि** कहकर नाभि से हृदय पर्यन्त कल्पना करें सिर पर पुष्पांजलि डाल लेवें। **ॐ मं पद्मद्वयं कल्पयामि** कहकर हृदय से भ्रू मध्य तक कल्पना करें सिर पर पुष्पांजलि डाल लेवें। **ॐ षट् कुसुमानि कल्पयामि** कहकर पुष्पांजलि करें। **शेष कुसुमानि कल्पयामि** कहकर सिर पर एवं सभी अंङ्गों पर पुष्पांजलि करें। **धूप**

मुद्रा-(अङ्गुष्ठाग्र एवं अनामिकाग्र मिलाने से दीप मुद्रा) इन्हें दिखाकर। नैवेद्य के बदले अर्ध्य देवें। **प्रसन्न पूजां समर्पयामि** कहकर आत्मापूजा को संपन्न करें। इसके बाद संकल्प करें (प्रमाण श्लोक)

फलभिसंधानबुद्धिस्थिरीकरणसिद्धये। संकल्पस्तु पुराकार्यः श्रोते स्मार्ते च कर्मणि॥ *(प्रयोगरत्नाकर:)*

श्रौत स्मार्त कर्म करने से पहलें फल सिद्धि की स्थिर भावना की प्राप्ति के लिए कर्म से पहले संकल्प करना चाहिये।

संकल्प्यैव च कर्तव्यं स्नानदान व्रतादिकम्। अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति हि॥ *(प्रयोगरत्नाकर:)*

स्नान दान कर्मादियों को संकल्प लेकर ही करना चाहिये। नहीं तो पुण्यकर्म फल रहित हो जाते हैं। मास पक्ष तिथीनां च निमित्तानां च सर्वशः। उल्लेखन कुर्वाणो न तस्य फलभाग् भवेत्॥ सभी कर्मो में महिना,पक्ष,तिथि, एवं किस लिए कर रहे हैं (निमित) इसका जो उल्लेख नहीं करते हैं वे फल को प्राप्त नहीं करते हैं।

संकल्प—देशाकालौ संकीर्त्य विश्वशान्त्यर्थं सर्वाद्भत उत्पात जनित दोष परिहारार्थं आदित्यादि नवानां ग्रहाणां शुभ एकादश स्थान फलावाप्त्यर्थं कलशस्थापनं नवग्रहाराधनं यथाशक्ति कल्पोक्त षोडशोपचार पूजां करिष्ये।

गुरु पूजन—गुं गुरुभ्यो नमः। लं पृथिव्यात्मना गन्धं कल्पयामि। हं आकाशात्मना पुष्पं कल्पयामि। यं वाय्वात्मना धूपं कल्पयामि। रं अग्न्यात्मना दीपं कल्पयामि। वं अमृतात्मना नैवेद्यं कल्पयामि। पं परमात्मना सर्वोपचार पूजां समर्पयामि। गुं गुरवे नमः सुवर्ण दक्षिणां समर्पयामि।

गणेश पूजन—गं गणपतये नमः। ॐलं पृथिव्यात्मना गन्धं कल्पयामि। ॐहं आकाशात्मना पुष्पं कल्पयामि। ॐयं वाय्वात्मना धूपं कल्पयामि। ॐरं अग्न्यात्मना दीपं कल्पयामि। ॐवं अमृतात्मना नैवेद्यं कल्पयामि। ॐपं परमात्मना सर्वोपचार पूजा समर्पयामि। गं गंणपतये नमः सुवर्णपुष्पं समर्पयामि।

ॐ इ॒मा या ब्र॑ह्मणस्पते॒ विषू॑ची॒र्वात॒ ईर॑ते। स॒ध्रीचीं॒रिन्द्र ताः कृ॒त्वा मह्यं॑ शि॒वतं॑मास्कृधि

स्वस्ति नों अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु॥ *(अथर्ववेद १९.८.६)*

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। गं गणपतये नमः प्रार्थयामि। नमस्करोमि।

दीपाराधनम्—ॐ अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु। अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः। *(अथर्ववेद १२.१.१९)*

ॐ रं नमः इति दीपमाराध्यामि। कहकर पुष्प से दीप का पूजन करें।

पीठपूजनम्—ॐ आधार शक्त्यै नमः। ॐ अज्ञानाय नमः। ॐ मूल प्रकृत्यै नमः। ॐ अवैराग्याय नमः। ॐ आदिकूर्माय नमः। ॐ अनैश्वर्याय नमः। ॐ अनन्ताय नमः। ॐ सं सत्वाय नमः। ॐ पृथिव्यै नमः। ॐ रं रजसे नमः। ॐ धर्माय नमः। ॐ तं तमसे नमः। ॐ ज्ञानाय नमः। ॐ मं मायायै नमः। ॐ वैराग्याय नमः। ॐ विं विद्यायै नमः। ॐ ऐश्वर्याय नमः। ॐ पं पद्माय नमः। ॐ अधर्माय नमः। ॐ वामायै नमः। ॐ ज्येष्ठायै नमः। ॐ अं अर्कमण्डलाय नमः। ॐ रौद्र्यै नमः। ॐ उं सोमदलाय नमः। ॐ कालयै नमः। ॐ रं वह्निमण्डलाय नमः। ॐ बल विकलिन्यै नमः। ॐ अं आत्मने नमः। ॐ कलविकलिन्यै नमः। ॐ उं अन्तरात्मने नमः। ॐ बल प्रमथिन्यै नमः। ॐ मं परमात्मने नमः। ॐ सर्वभूतदमन्यै नमः। ॐ ह्रीं ज्ञानात्मने नमः। ॐ मनोन्मन्यै नमः।

ॐ नमो भगवते सकलगुणात्म शक्तियुक्ताय अनन्ताय योगपीठात्मने नमः। *(अनुष्ठान पद्धति)*

यहाँ पर कलश रखने वाला पीठ का पूजन पुष्पों से अक्षतों से करें।

भुवनेश्वरी पूजन (पीठ मध्ये)—ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूँ शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ॐ लं पृथिव्यात्मना गन्धं कल्पयामि। ॐ हं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अमृतात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्पना सर्वोपचार पूजां समर्पयामि। ॐ ह्रीं भुवनेश्वर्यै नमः सुवर्णपुष्पं समर्पयामि। ॐ ह्रीं भुवनेश्वर्यै नमः प्रसन्नार्ध्यं समर्पयामि। वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थां। बालार्क कोटिप्रतिमां त्रिनेत्रां भजेहमाद्यां जगदीश्वरीं तां॥ पुष्पांजलि

समर्पयामि। नमस्करोमि।

पद्मपुद्रां पदर्श्य, कलशं सङ्गृह्य, अस्त्रेण संक्षाल्य कवचेन त्रिगुणीकृत सूत्रेण वेष्टयित्वा मूलमन्त्रेण अष्टागन्धेन लेपयित्वा प्रणवेन धूपयित्वा मूलेन पीठे अधोमुखं न्यसेत्। *(अनुष्ठान पद्धति)*

पद्ममुद्रा (कमलाकार) को दिखाकर, प्रधान एवं शेष कलशों को हाथ में लेवें। **ॐ अस्त्राय फट्** कहते हुए तीन धागों वाले सूत्र से उसे लपेटना चाहिये। ॐनमो नारायणाय इस मूल मन्त्र से अष्टगंध से लेपन करें। ॐकहते हुए धूप दिखायें। ॐनमो नारायणाय कहते हुए उस कलश को पीठ पर उल्टा करके रखें।

शोषण दाहन प्लावन काठिन्य सुषरीकरणानि कृत्वा—यं बीजमन्त्र को षोडश बार जपकर शोषण की कल्पना करें। **रं** बीजमन्त्र से षोषश (१६) बार जपकर दाहन की कल्पना करें। **रं** बीजमन्त्र से षोडश बार जपकर प्लावन की कल्पना करें। **लं** बीजमन्त्र से षोडश बार जपकर काठिन्य की कल्पना करें। **हं** बीजमन्त्र से षौडश बार जपकर सुषरीकरण की कल्पना करें। (सुषरीकरण यानि ब्रह्माण्ड के बीज में जगह बनाना।) इन सभी क्रियाओं को कुशों से कलशों का छूकर करना चाहिये। **हौं नमः पराय शान्त्यतीतात्मने नमः।**

इति दर्भ विन्यासं

जहाँ प्रधान कलश रखना है वहाँ उपरोक्त मन्त्र कहकर दो कुशा बिछायें। अन्य **कलशों के पास भी कुश बिछायें। ह्यौं नमः पराय शान्त्यात्मने नमः।** इति अष्टगंध प्रोक्षणं कहकर कुशों पर अष्टगंध का प्रोक्षण करें। ह्रूं नमः पराय विद्यात्मने नमः इति अक्षतं विकीर्य कहकर कुशों पर अक्षात डालें। ॐनमो नारायणाय कहकर कलशों की पुष्पाक्षतों से पूजन करें। ॐह्रीं नमः पराय प्रतिष्ठात्मने नमः। कहकर कलशों को उठायें। **ॐ ह्लां नमः पराय निवृत्यात्मने नमः** ॐनमो नारायणाय कहकर कलशों को पीठ पर कुशों के ऊपर रखें। **प्रणवेन घट मुखं प्रोक्ष्य**

ॐकारसे कलशों के मुख को प्रोक्षण करें। **कुम्भस्य मूले दश वह्निकलाः न्यस्य ऋचा च व्यापयेत्।** ॐ ह्रीं यं धूम्रार्चिषे नमः। ॐ ह्रीं रं ऊष्मायै नमः। ॐ ह्रीं लं ज्वलिन्यै नमः। ॐ ह्रीं वं ज्वालिन्यै नमः। ॐ ह्रीं शं विष्फुलिंगिन्यै नमः। ॐ ह्रीं षं सुश्रियै नमः। ॐ ह्रीं सं सुरूपायै नमः। ॐ ह्रीं हं कपिलायै नमः। ॐ ह्रीं ळं हव्यवाहायै नमः। ॐ ह्रीं क्षं कव्यवाहायै नमः। इन्हे कहते हुए कुशों से कुभ के चारों ओर छूकर वह्निकलाओं की कलश के मूल में स्थापना की कल्पना करें।

ॐ देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु ॥ *(अथर्ववेद ७.४९.१)*

कहते हुए कलश के मूल को कुशा से छूऐं। **ॐ मं वह्निमण्डलाय दश धर्मप्रद कलात्मने नमः।** कहकर समष्टि व्यापन यानि कुशों से कलश के चारों ओर छूना चाहिये। कुम्भस्य मध्ये द्वादशदफं पद्मं संकल्प्य प्रागादि दलेषु सूर्यकलाः न्यस्य तत् ऋचा समष्ट्या च व्यापयेत्।

कलश के बीच में द्वादशदल पद्म की कल्पना कर पूर्व दिशा से प्रारम्भकर द्वादश दलों में १२ सूर्य कलाओं को रखने की कल्पना करें। ॐ ह्रीं कं भं तपिन्यै नमः। ॐ ह्रीं खं बं तापिन्यै नमः। ॐ ह्रीं गं फं धूम्रायै नमः। ॐ ह्रीं घं पं मरीच्यै नमः। ॐ ह्रीं ङं नं ज्वालिन्यै नमः। ॐ ह्रीं चं धं रुच्यै नमः। ॐ ह्रीं छं दं सुषुम्नायै नमः। ॐ ह्रीं जं थं भोगदायै नमः। ॐ ह्रीं झं तं विश्वायै नमः। ॐ ह्रीं ञं णं बोधिन्यै नमः। ॐ ह्रीं टं ढं धरिण्यै नमः। ॐ ह्रीं ठं डं क्षमायै नमः।

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। *(ऋग्वेद ३.६२.१०)*

कहते हुए कलशों के मध्य में कुशा से छुऐं।

ॐ अं सूर्यमण्डलाय वसुप्रद कलात्मने नमः।

कहकर समष्टि व्यापन यानि कुशों से कलश के चारों ओर छूना चाहिये।

कुम्भस्य मुखे षोडशदलं पद्म संकल्प्य प्रागादि दलेषु षोडश सोमकलाः न्यस्य तत् ऋचा समष्ट्या व्यापयेत्। *(अनुष्ठान पद्धति)*

कुम्भो के मुख में षोडशदल पद्म की कल्पना करें पूर्वादि क्रम से दलों में सोलह सोमकलाओं को रखने की कल्पना करें। फिर ऋक् एवं समष्टि से व्याप्त करें। ॐ ह्रीं अं अमृतायै नमः। ॐ ह्रीं आं मानदायै न मः। ॐ ह्रीं इं पूषायै नमः। ॐ ह्रीं ईं तुष्टयै नमः। ॐ ह्रीं ऊँ रत्यै नमः। ॐ ह्रीं ऋं धृत्यै नमः। ॐ ह्रीं ॠं शशिन्यै नमः। ॐ ह्रीं लृं चन्द्रिकायै नमः। ॐ ह्रीं लॄं कान्त्यै नमः। ॐ ह्रीं ऐं ज्योत्स्नायै नमः। ॐ ह्रीं ऐं श्रियै नमः। ॐ ह्रीं ओं प्रीत्यै नमः। ॐ ह्रीं औं अङ्गदायै नमः। ॐ ह्रीं अं पूर्णायै नमः। ॐ ह्रीं अः पूर्णामृतायै नमः।

ॐ त्र्यँबकं यजामहे सुगन्धिं पुंष्टिवर्धनम्। उर्वारुकमिंव बन्धंनान्मृत्योर्मुक्षीयमामृतांत्॥ *(ऋग्वेद ७.५६.१२)*

कहते हुए कलशों के मुख में कुश से छूऐं। **ॐ उं सोममण्डलाय षोडश का मप्रद कलात्मने नमः।** कहकर समष्टि व्यापन यानि कुशों से कलश के चारों ओर छूना चाहिये। **ॐ ह्रीं हं सः इति मन्त्रेण कुम्भावाहनं कृत्वा।** इस मन्त्र से कुम्भा का आवाहन कर षडंग न्यास करें। ॐ ह्रां हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूँ शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट्। कहकर कलश को न्यास करें। **कुम्भस्य मुखे**—कुम्भ के मुख में पाञ्च कलाओं का आवाहन करें। ॐ ह्रीं शं पीतायै नमः। ॐ ह्रीं सं श्वेतायै नमः। ॐ ह्रीं हं अरुणायै नमः। ॐ ह्रीं ळं असितायै नमः। ॐ ह्रीं क्षं नन्तायै नमः।

ॐ तत्संवितुर्वरेण्यं भर्गो देवस्यं धीमहि। धियो यो नंः प्रचोदयांत्॥ *(ऋग्वेद ३.६२.१०)*

कलशों के मुख में कुशों से छूकर बोलें।

कुम्भमुद्रां प्रदर्श्य कुम्भं जगदण्डं ध्यात्वा पञ्चविंशति दर्भैः कुर्च बध्वा तस्य शोषण, दाहन प्लावनानि कृत्वा अष्टगंधं विलिप्य अष्टवारं प्रणवं संजप्य कूर्च कुम्भे न्यस्य प्रणवेन संपूज्य नवरत्नादि द्रव्यं ॐ ह्रीं हं सः सोहं स्वाहा इति कुम्भे न्यस्य संपूज्य मानस पूरणं कुर्यात्। *(अनुष्ठान पद्धति)*

कुम्भमुद्रा (पद्मपुद्रा) को दिखाकर कुम्भ को ब्रह्माण्ड मानें। २५ कुशाग्रों से कूर्च बनायें।

उस कूर्च को—यं बीच मन्त्र को सोलह बार जप करते हुए शोषण की कल्पना करें। रं बीज मन्त्र से १६ बार जप करते हुए दाहन की कल्पना करें। वं बीज मन्त्र से १६ बार जपकर प्लावन की कल्पना करें। कूर्च को कुम्भ में डालें फिर ॐकार से पूजन करें। नवरत्नादियों को "ॐह्री हं सः सोहं स्वाहा" कहकर उन्हें कुम्भ में डालकर पूजा करें। फिर मानस पूरण करें। (मन में-कलश भरने की कल्पना करें।)

करे अमृत बीजं विलिख्य तेन करेण कुम्भ मुखमाच्छाद्य कूर्चमूलस्थित चैतन्यं द्वादशान्त पद्म स्थित परमात्मनि विलाप्य प्रणवं शिरोमन्त्रं च उक्त्वा द्वादशान्त पद्म स्थित परमात्मनः परचैतन्यरूपं अमृतजलं कुम्भे पातयेत्। *(अनुष्ठान पद्धति)*

दाहिने हाथ में वं बीज मन्त्र को लिखकर उसी दाहिने हाथ से कलशों के मुख को ढक देवें। कूर्च के मूल में स्थित चैतन्य को द्वादशान्त पद्म (ब्रह्मरन्ध्र) में स्थित पामात्मा में मिलाने की कल्पना करें। ॐशिरसे स्वाहा कहकर-(प्रणव-ॐशिरोमन्त्र-शिरसे स्वाहा) द्वादशान्तपद्मस्थित परमात्मा के परचैतन्य रूप अमृत जल को कुम्भ में गिराने की कल्पना करें।

यत् किंचित् पत्रेण कुम्भमुखमाच्छाद्य अन्यस्मिन् पात्रे स्वस्तिकोपरि गालितजलं उत्तरभगे न्यस्य जलस्य शोषण दाहन प्लावनानि कृत्वा पीठं संपूज्य तत्र वरुणमावाह्य संपूज्य मूलेन च आवाह्य सकलीकृत्य संपूज्य नैवेद्य काले अर्घ्यं दत्वा पुष्पांजलिं कृत्वा पञ्चवारुणां प्रजप्य तज्जलं शंखे आदाय अष्टगंधं विलिप्य पद्मंमूर्ति च संकल्प्य मूलेन स्वहृदयात् आवाह्य किंचित् संपूज्यतज्जलं कुम्भे निषिच्य शेष जलैः कुम्भं अर्धोत्तरं परिपूर्य लिपि पंकजं पूजयेत्। *(अनुष्ठान पद्धति)*

यज्ञीय वृक्ष के पत्ते से कलशों के मुख को ढकें ताकि कलश में विद्यमान अमृत बाहर न जा सकें। उत्तर दिशा में एक स्वस्तिक मण्डल बनायें। उस पर एक ताम्र पात्र रखें। उसका मुख वस्त्र से बांधें। उसमें तीर्थ जल भरें।

ताम्र पात्र मे स्थत जल का शोषण दाहन प्लावन करें। यं बीजमन्त्र को १६ बार जपकर शोषण की कल्पना करें। रं बीजमन्त्र को १६ बार जप कर दाहन की कल्पना करें। वं बीज मन्त्र को १६ बार जपकर प्लावन की कल्पना करें। पं पद्माय नमः कहकर ताम्रपात्र के पीठ का पूजन करें। ॐ वं वरुणाय नमः कहकर वरुण देव का ताम्रपात्र में आवाहन करें। ॐ नमो नारायणाय कहकर प्रधान देवता विष्णु का मूल मन्त्र से आवाहन करें। सकली करण कर ॐ हृदयाय नमः। ॐ शिरसे स्वाहा। ॐ शिखायैं वषट्। ॐ कवचाय हुम्। ॐ नेत्रत्रयाय वौषट्। ॐ अस्त्राय फट्। पूजन करें। लं पृथिव्यात्मना गंधं कल्पयामि। हं आकाशात्मना पुष्पं कल्पयामि। यं वाय्वात्मना धूपं कल्पयामि। रं अग्न्यात्मना दीपं कल्पयामि। वं अमृतात्मना नैवेद्य काले अर्ध्यं समर्पयामि। पं परमात्मना सर्वोपचार पूजां कल्पयामि। ॐ वं वरुणाय नमः। ॐ नमो नारायणाय पुष्पांजलिं समर्पयामि। कहकर पुष्पांजलि देवें। पात्र को छूकर मन्त्रों को (वारुण) पढें।

ॐ अप्सु तें राजन् वरुण गृहो हिंरण्ययों मिथः। ततों धृतव्रंतो राजा सर्वा धामांनि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

ॐ प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उंत्तमा अंधमा वांरुणा ये।
दुष्वन्यँ दुरितं नि ष्वास्मदथं गच्छेम सुकृतस्यं लोकम्॥ *(अथर्ववेद ७.८३.४)*

इमा आपः शिवाः सन्तु शुभाः शुद्धाश्च निर्मलाः। पावन नाः शीलताश्चैव पूताः सूर्यस्य रश्मिमिः। इससे पात्र जल शुद्ध हुआ। उस पात्र जल को शंख में भर लेवें। अष्टगंध डालें। पं पद्माय नमः। कहकर पद्मका पूजन करें। ॐ नमो नारायणाय। कहकर विष्णु मूर्ति का पूजन करें। ॐ नमो नारायणाय। कहकर अपने हृदय में स्थित प्रधान देवता को जल में स्थापित करें। ॐ पं परमात्मने नमः। सर्वोपचार पूजां कल्पयामि। कहकर शंख जल को कलशों में भरें फिर कलशों में मन्त्रोंच्चार पूर्वक जल भरें।

ॐ आपो हि ष्ठा मंयोभुवस्ता नं ऊर्जे दंधातन। महे रणांय चक्षंसे॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

ॐ इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः। गृहानुप प्र सीदाम्यमृतेन सहाग्निना॥ *(अथर्ववेद ३.१२.९)*

कलशों में जल भरने के बाद लिपि पंकज यानि अक्षरों से बने कमल की कल्पना कर कलश का पूजन करें। ॐक्षं नमः पराय मूर्त्यात्मने नमः। ॐळं नमः पराय शिफात्मने नमः। ॐहं नमः पराय नाळात्मने नमः। ॐसं नमः पराय सर आत्मने नमः। ॐषं नमः पराय कराटकात्मने नमः। ॐशं नमः पराय रंध्रात्मने नमः। ॐवं नमः पराय धर्माय आग्नेय ग्रन्थ्यात्मने नमः। ॐलं नमः पराय ज्ञानाय नैऋत्य ग्रन्थ्यात्मने नमः। ॐरं नमः पराय वैराग्याय वायव्य ग्रन्थ्यात्मने नमः। ॐयं नमः पराय ऐश्वर्याय ऐश ग्रन्थ्यात्मने नमः। ॐॠं नमः पराय अज्ञानाय दक्षिण ग्रन्थ्यात्मने नमः। ॐलृं नमः पराय अवैराग्याय वारुण ग्रन्थ्यात्मने नमः। ॐलृं नमः पराय अनैश्वर्याय सौम्य ग्रन्थ्यात्मने नमः। ॐकं खं गं नमः पराय पूर्वपत्रात्मने नमः। ॐघं ङं च नमः पराय आग्नेय पत्रात्मने नमः। ॐछं जं झं नमः पराय याम्य पत्रात्मने नमः। ॐञां टं ठं नमः पराय वारुण पत्रात्मने नमः। ॐडं ढं णं नमः पराय वारुण पत्रात्मने नमः। ॐतं थं दं नमः पराय वायव्य पत्रात्मने नमः। ॐफं बं भं नमः पराय ऐश पत्रात्मने नमः। ॐमं नमः पराय कर्तिर्णकात्मने नमः। ॐअः आं नमः पराय पूर्वकेसरात्मने नमः। ॐइः ईं नमः पराय आग्नेय केसरात्मने नमः। ॐउः ऊं नमः पराय याम्य केसरात्मने नमः। ॐॠं नमः पराय नैऋतय केसरात्मने नमः। ॐलृः लृं नमः पराय वारुण केसरात्मने नमः। ॐऐः ऐं नमः पराय वायव्य केसरात्मने नमः। ॐओः औं नमः पराय सौम्य केसरात्मने नमः। ॐअः अं नमः पराय ऐश केसरात्मने नमः। ॐअं नमः पराय आत्मतत्वात्मने नमः। ॐउं नमः पराय विद्यातत्वात्मने नमः। ॐमं नमः पराय विद्यातत्वात्मने नमः। ॐसं नमः पराय बिन्द्वात्मने नमः। ॐहं नमः पराय नादात्मने नमः। ॐह्रींनमः पराय शक्त्यात्मने नमः। ॐनमः पराय शान्त्यात्मने नमः। *(अनुष्ठान पद्धति)*

इति लिपि पंकजम्

वैदिक परम्परा में पिपियों का अत्यधिक महत्व है। लिपियों में ही सभी मन्त्र एवं सभी वेद है। उनमें सभी देवता भी विद्यमान है। कलश में लिपि पद्म की कल्पना कर उसमें सभी मन्त्रों का, सभी वेदों का एवं सभी देवताओं का पूजन होता है। लिपि का अत्यधिक महत्व होने के कारण पिपिन्यास विस्तार से किया जाता है। बड़े यज्ञों में इनका करना अनिवार्य है। पहले दिन ये सभी करते हैं। दूसरे दिन से पूजन कुछ कम होता है। बड़े यज्ञों में कलश पूजन के लिए एक पंरिडत अलग रहते हैं। अतः शेष कार्य में विलम्ब नहीं होता है। अभ्याय हो जाने पर इन सभी को करने में अधिक समय नहीं लगता है।

कलशे प्रधान देवता आवाहन—ॐनमो नारायणाय। श्री विष्णु मूर्तये नमः। ॐभूः विष्णुमूर्तिमावाहयामि। ॐभुवः विष्णुमूर्तिमावाहयामि। ॐस्वः विष्णुमूर्तिमावाहयामि। ॐभूर्भुवः स्वः विष्णुमूर्तिमावाहयामि। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवरिठतो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। इतना कहकर विविभिन्न मुद्राओं से प्रधान देवता का आवाहन करें। **मूलाक्षराणि न्यस्य।** मूलक्षरों से न्यास करें। ॐऊं नमः। ॐमोनमः। ॐना नमः। ॐरा नमः। ॐय नमः। ॐणां नमः। ॐयं नमः। **ॐ नमो नारायणाय।** कहकर पुष्पों से पूजन करें। ॐनमो नारायणाय। इदं प्रसन्नार्घ्यं समर्पयामि। कहकर प्रसन्नार्घ्य जल छोडें। ॐनमो नारायणाय। पुष्पांजलिं समर्पयामि। कहकर पुष्पांजलि देवें।

कलशे पञ्चामृत क्षेपः—कलश में पञ्चामृत डाले।

ॐ सं सिंञ्चामि गवाँ क्षीरं समाज्यैंन बलं रसंम्।
संसिक्ता अस्माकँ वीरा ध्रुवा गावो मयि गोपंतौ॥ *(अथर्ववेद २.२६.४)* कहकर कलशों में दूध डालें।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वंस्यवाजिनंः।
सुरभि नो मुखां करत्प्र णा आयूंषि तारिषत्॥ *(अथर्ववेद २०.१३७.३)* कहकर दहि डालें।

ॐ घृतं तें अग्ने दिव्ये सधस्थें घृतेन त्वां मनुंरद्या समिंन्धे।

घृतं ते देवीर्नप्त्यं१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने ॥ (अथर्ववेद ७.८२.६) कहकर **घी** डालें।

ॐ मधुमान् भवति मधुमदस्याहार्यं भवति।
ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातरं इव दुह्रामस्मा अरिष्टतातये॥ *(अथर्ववेद ८.७.२७)*

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविणवे नमः। पुष्पाणि समर्पयामि।

प्रथमावरण पूजनम्—पूर्वादिक्रमेण ॐविमलायै नमः १। ॐ उत्कर्षिण्यै नमः २। ॐ ज्ञानायै नमः ३। ॐ क्रियायै नमः ४। ॐ योगायै नमः ५। ॐ प्रह्व्यै नमः ६। ॐ सत्यायै नमः ७। ॐ ईशानायै नमः ८। मध्ये ॐ अनुग्रहायै नमः ९।

द्वितीयावरण पूजनम्—ॐब्राह्म्यै नमः। पूर्वे ॐमाहेश्वर्यै नमः। आग्नेय दिशि। ॐकौमार्यै नमः। दक्षिण दिशि। ॐवैष्णव्यै नमः। नैऋत्यां दिशि। ॐवाराह्यै नमः पश्चिम दिशि। ॐइन्द्राण्यै नमः। वायव्यां दिशि। ॐचामुण्डायै नमः। उत्तरस्यां दिशि। ॐगिरिजायै नमः ऐशान्यां दिशि। *(अनुष्ठान पद्धति)*

तृतीयावरण पूजनम्—ॐइन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावत वाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवारायश्री महाविष्णुमूर्ति पार्षदाय नमः। ॐअग्नये तेजोधिपतये पिंगलवर्णाय शाक्ति हस्ताय मेष वाहनाय सशक्तिकाय सांगाय सायुधाय स वाहनाय स परिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐयमाय प्रेताधिपतये कृष्णवर्णाय दण्ड हस्ताय महिष वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐनिषतये रक्षोधिपतये रक्तवर्णाय खड्ग हस्ताय नरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय

श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐवरुणाय जलाधितये कुंदवर्णाय पाशहस्ताय मकरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय महाविष्णुमूर्ति पार्षदाय नमः। ॐवायवे प्राणाधिपतये धूम्रवर्णाय अंकुश हस्ताय हरिणवाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐसोमाय नक्षत्राधिपतये शुक्लवर्णाय गदा हस्ताय अश्व वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐईशानाय विद्याधिपतये स्फटिकवर्णाय त्रिशूल हस्ताय वृषभ वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्तिपार्षदाय नमः। ॐअनंताय नागाधिपतये क्षीरवर्णाय चक्रहस्ताय गरुड वाहनाय स शक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। नैर्ऋत्यं एवं पश्चिम दिशा के बीच में अनन्त का पूजन करें। ॐब्रह्मणे लोकाधिपतये कंजवर्णाय पषहस्ताय हंसवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। पूर्व एवं ईशान दिशा के बीच में ब्रह्मा जी का पूजन करें। *(अनुष्ठान पद्धति)*

चतुर्थावरणपूजनम्—ॐवज्राय नमः। (पूर्व में) ॐशक्त्यै नमः। (आग्नेय में) ॐदण्डाय नमः। (दक्षिण में) ॐखड्गाय नमः। (नैऋत्य) ॐपाशाय नमः। (पश्चिम में) ॐअंकुशाय नमः। (वायव्य में) ॐगदायै नमः। (उत्तर में) ॐत्रिशूलाय नमः। (ईशान में) ॐचक्राय न मः। (पश्चिम नैऋत्य के बीच में) ॐपद्माय नमः। (पूर्व ईशान के बीच में) *(अनुष्ठान पद्धति)*

अष्टोत्तर शतनाम पूजा

ॐविष्णवे नमः। ॐलक्ष्मीपतये नमः। ॐ कृष्णाय नमः। ॐ वैकुण्ठाय नमः। ॐ गरुडध्वजाय नमः। ॐ जगन्नाथाय नमः। ॐपरब्रह्मणे नमः।ॐवासुदेवाय नमः। ॐत्रिविक्रमाय नमः। ॐ दैत्यान्तकाय नमः। ॐ मधुरिपवे नमः। ॐ तार्क्ष्यवाहनाय नमः। ॐसनातनाय नमः। ॐनारायणाय नमः। ॐपद्मनाभाय

नमः। ॐ हृषीकेशाय नमः। ॐ सुधाप्रदाय नमः। ॐ माधवाय नमः। ॐ पुण्डरीकाक्षाय नमः। ॐ स्थितिकर्त्रे नमः। ॐ परात्पराय नमः। ॐ वनकालिने नमः। ॐ यज्ञ रूपाय नमः। ॐ चक्र पाणये नमः। ॐ गदाधराय नमः। ॐ उपेन्द्राय नमः। ॐ केशवाय नमः। ॐ हंसाय नमः। ॐ समुद्रमथनाय नमः। ॐ हरये नमः। ॐ गोविन्दाय नमः। ॐ ब्रह्मजनकाय नमः ॐ कैटभासुरमर्दनाय नमः। ॐ श्रीधराय नमः। ॐ कामजनकाय नमः ॐ शेषाशायिने नमः। ॐ चतुर्भजाय नमः। ॐ पाञ्चजन्यधराय नमः। ॐ श्रीमते नमः। ॐ शार्ङ्गपाणये नमः। ॐ जनार्दनाय नमः। ॐ पीताम्बरधराय नमः। ॐ देवाय नमः। ॐ सूर्यचन्द्रविलोचनाय नमः। ॐ मत्स्यरूपाय नमः। ॐ कूर्मतनवे नमः। ॐ क्रोडरूपाय नमः। ॐ नृकेसरिणे नमः। ॐ वामनाय नमः। ॐ भार्गवाय नमः। ॐ रामाय नमः। ॐ बलिने नमः। ॐ कल्किने नमः। ॐ हयाननाय नमः। ॐ विश्वम्भराय नमः। ॐ शिशुमाराय नमः। ॐ श्रीकराय नमः। ॐ कपिलाय नमः। ॐ ध्रुवाय नमः। ॐ दत्तात्रेयाय नमः। ॐ अच्युत्ताय नमः। ॐ अनन्ताय नमः। ॐ मुकुन्दाय नमः। ॐ दधिवामनाय नमः। ॐ धन्वन्तरये नमः। ॐ श्रीनिवासाय नमः। ॐ प्रद्युम्नाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ श्रीवत्सकौस्तुभधराय नमः। ॐ मुरारातये नमः। ॐ अधोक्षजाय नमः। ॐ ऋषभाय नमः। ॐ मोहिनी रुप धारिणे नमः। ॐ सङ्कर्षणाय नमः। ॐ पृथवे नमः। ॐ क्षीराब्धिशायिने नमः। ॐ भूतात्मने नमः। ॐ अनिरुद्धाय नमः। ॐ भक्तवत्सलाय नमः। ॐ नराय नमः। ॐ गजेन्द्रवरदाय नमः। ॐ त्रिधाम्ने नमः। ॐ भूतभावनाय नमः। ॐ श्वेतद्वीपसुवास्तव्याय नमः। ॐ सनकादिमुनिध्येयाय नमः। ॐ भगवते नमः। ॐ शङ्करप्रियाय नमः। ॐ नीलकान्ताय नमः। ॐ धराकान्ताय नमः। ॐ वेदात्मने नमः। ॐ बादरायणाय नमः। ॐ भागीरथीजन्मभूमि पादपद्माय नमः। ॐ सतांप्रभवे नमः। ॐ स्वभुवे नमः। ॐ विभवे नमः। ॐ घनश्यामाय नमः। ॐ जगत्कारणाय नमः। ॐ अव्ययाय नमः। ॐ बुद्धावताराय नमः। ॐ शान्तात्मने नमः। ॐ लीलामानुष विग्रहाय नमः। ॐ दामोदराय नमः। ॐ विराड्रूपाय नमः। ॐ भूतभव्यभवत्प्रभवे नमः। ॐ आदिदेवाय नमः। ॐ प्रह्लादपरिपालकाय नमः। ॐ श्रीमहाविष्णवे नमः। अष्टोत्तर शतनाम पूजां समर्पयामि। *(अनुष्ठान पद्धति)*

धूपम्—ॐ वनस्पति रसोत्पन्नो गंधाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ *(अथर्ववेद १९.६.१०)*

ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महा विष्णवे नमः। धूपं आघ्रापयामि।

दीपम्— आज्य त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मंगलं दीपं त्रैलोक्य तिमिरापह ॥ *(स्मृति संग्रह)*

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये ॥ *(अथर्ववेद १९.६.११)*

ॐ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले ॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्रीमहा विष्णवे नमः। दीपं दर्शयामि। धूप दीपानंतरं आचमनीयं समर्पयामि।

नैवेद्यम्—देवस्याग्रे स्थलं संशोध्य गोमयेन मण्डलं कृत्वा तत्र शुद्धं पात्रं न्यस्य अभिघार्य निर्मलं हवि तदुपरि न्यस्य आज्येन द्रवीभूतं कृत्वा "ॐ भू र्भुवः स्वः इति गायत्र्या च प्रोक्ष्य वायु बीजं जप्त्वा निवेद्यान्नं संशोध्य दक्षिणहस्ते अग्निबीजं विलिख्य तेन हस्तेन संदह्यवामहस्ते अमृतबीजं विलिख्य तेत हस्तेन हविराप्लाव्य मूलमंत्रमष्टवारं संजप्य मंत्रामृतमयं संकल्प्य सुरभिमुद्रां बध्वा अमृतमयं भावयित्वा मल धातु रसांशं विभज्य देवस्य निवेद्य ग्रहणेच्छां कुर्यात्।

(अनुष्ठान पद्धति)

"सत्यं त्वर्तेन परिषिञ्चामि" इत्यनेन

परिषिच्य हस्ताभ्यां पुष्पैः "देवस्य जिह्वार्चीरुचि निवेद्ये निपात्य निवेदयामि भवते जुषाणेदं हविर्विभो" इति वामहस्तेन ग्रासमुद्रा प्रदर्श्य दक्षिण हस्तेन प्राणादि मुद्राः प्रदर्शयेत्। अन्नात् मलांशं धात्वंशं च परित्यज्य रसांशं देवस्य वदनार्चिषि समर्पयेत्। वं अबात्मना इति नैवेद्य मुद्रां प्रदर्शयेत्।

नैवेद्य सारं रससमर्पणात् जातं सुधांशं देवे समर्प्य अंललिमुद्रां बध्वा नैवेद्यसार रससमर्पित जातामृतमय सुधांशुना पुनः पुनः वर्धितं देवं हृन्मूर्ति देवं ध्यायन् स्व स्व मूलमन्त्रं यथा शक्ति जप्त्वा।

कलश के आगे स्थल शुद्धिकर गोमय से शुद्धिकर चतुरस्त्र मण्डल को बनाकर उस पर शुद्ध पात्र को रखें। पात्र में थोडा सा घी डालें। उस पात्र में निर्मल हविस् (नैवेद्य पदार्थ को) को घी पर रखें उस हविस् को घी से भिगोयें। गायत्री मंत्र से नैवेद्य का प्रोक्षण करें। यंयं यं'' इस वायु बीज को जपकर हविस् को शुद्ध करें। दाहिने हाथ में (रं) अग्नि बीज को लिखकर उस अग्नि से हविस् में विद्यमान कश्मलों को लजायें। (कल्पना करें) बायें हाथ में अमृत बीज (वं) को लिखकर उस हाथ से हविस् को शुद्ध करें। धोने की कल्पना करें। ॐ नमो नारायणाय। इस मन्त्र का आठ बार जप करें। हविस् को मत्रमय एवं अमृतमय होने की कल्पना करें। सुरभि मुद्रा से अमृतमय हुआ है मानकर मलांश, धातु अंश एवं रसांश को अलग-अलग करने की कल्पना करें।

देवता को नैवेद्य ग्रहण करने की इच्छा उत्पन्न करनी चाहिये। ''सत्यं त्वर्तेन परिषिञ्चामि'' इससे परिषिञ्चन करें। दोनों हाथों में पुष्प लेकर देवता का जीभ नैवेद्य तक पहुँचने का चिन्तन करें। ''निवेदयामि भवते जुषाण हविर्विभो'' कहकर नैवेद्य स्वीकार करने की प्रार्थना करते हुए बायें हाथ से ग्रास मुद्रा (जैसे बछडे को घास देते हैं) को दिखाकर दाहिने हाथ से—

प्राणाय स्वाहा-अङ्गुष्ठ कनिष्ठिका मिलाकर, अपानाय स्वाहा-अङ्गुष्ठ एवं तर्जनी मिलाकर, व्यानाय स्वहा-अङ्गुष्ठ एवं मध्यमा मिलाकर, उदानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर, समानाय स्वाहा। सभी अङ्गुलियों को लिाकर। अन्न से मलांश एवं धातु के अंश को अलग कर केवल रसांश को अर्पित करने की कल्पना करें।

''वं अबात्मना नैवेद्यं कल्पयामि'' कहकर नैवेद्य मुद्रा का प्रदर्शन करें। अंगुष्ट एवं अनामिका मिलाने से नैवेद्य मुद्रा। नैवेद्य का सार जो रसांश था उसका भी सार अमृत का जो अंश है उसे देवता को समर्पित कर, हाथ जोडकर, नैवेद्य के सार अमृत से भगवान् को बढते हुए मानकर उसे हृदय में स्थित

मानकर यथाशक्ति ॐनमो नारायणाय'' इस मूल मंत्र का जप करें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ *(अथर्ववेद ५.२.३)*

ॐ तस्मादश्वा अजायन्त ये च के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ *(अथर्ववेद १९.६.१२)*

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

यथा संभव नैवेद्यं निवेदयामि। **अमृतापिधानमसि** कहकर उत्तरापोशन देवें। हस्ताप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूल—पूगीफल समायुक्तं नागवल्या दलैर्युतं। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ *(स्मृति संग्रह-देवपूजा)*

ॐसपरिवार श्री महा विष्णवे नमः। क्रमुक तांबूलं समर्पयामि।

नीराजन (आरति)—ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ *(अथर्ववेद १९.६.१३)*

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥ *(अथर्ववेद ६.७३.१)*

ॐसपरिवाराय श्री महा विष्णवे नमः। मंगल नीराजनंसमर्पयामि।

मंत्रपुष्प—ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताश्चक्रे वायव्यां नारण्या ग्राम्याश्च ये ॥ *(अथर्ववेद १९.६.१४)*

ॐ आ॒र्द्रां यः॒ करि॑णीं य॒ष्टिं सु॒वर्णां यु॒वर्णां हेम॒मालि॑नीम्। सूर्या हि॒रण्म॑यीं ल॒क्ष्मीं जा॒तवे॑दो म॒ आव॑ह॥

ॐ इ॒दं विष्णु॒र्वि च॑क्रमे त्रे॒धा नि द॑धे प॒दा। समू॑ढमस्य पांसु॒रे। *(अथर्ववेद ७.२६.४)*

ॐ सपरिवाराय श्री महा विष्णवे नमः। मंत्रपुष्पं समर्पयामि।

प्रदक्षिणा नमस्कार—यानि कानि च पापानि जन्मांतर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिणा पदे पदे॥ *(देवपूजा-स्मृति संग्रह)*

ॐ स॒प्तास्यांसन्परि॒धय॒स्त्रिः स॒प्त स॒मिधः॑ कृ॒ताः। दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न्पुरु॑षं प॒शुम्॥ *(अथर्ववेद १९.६.१५)*

ॐ तां म॒ आव॑ह जातवेदो लक्ष्मीमन॑पगा॒मिनी॑म्।

यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं गावो॑दा॒स्योऽश्वा॑न् विं॒देयं॒ पुरु॑षान॒हम्॥ *(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महा विष्णवे नमः। प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्य—ॐ ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासुदे॒वाय॑ धीमहि। तन्नो॑ विष्णुः॒ प्रचो॒दया॑त्॥

इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यम् (कहकर तीन बार पुष्पमिश्रित जल छोड़ें।)

सर्वोपचार पूजनम्—ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आंदोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचार पूजां समर्पयामि।

ॐ मू॒र्ध्नो दे॒वस्य॑ बृ॒हतो अं॒शवः॑ स॒प्त स॒प्ततीः। रा॒ज्ञः सोम॑स्याजायन्त जा॒तस्य॒ पुरु॑षा॒दधि॥ *(अथर्ववेद १९.६.१६)*

ॐ यः शुचि॒ः प्रय॑तो भू॒त्वा जु॒हया॑दाज्य॒मन्व॑हम्। सूक्तं॑ पं॒चद॑शर्चं च॒ श्री॒कामः सत॒तं ज॑पेत्॥ *(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महा विष्णवे नमः। सर्वोपचार पूजां समर्पयामि।

प्रार्थना—विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ *(पौराणिकम्)*
ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गंतव्यं बंह्मकर्म समाधिना॥ *(श्री भगवद्गीते)*

ॐ सपरिवाराय श्री महा विष्णवे नमः। अनेन पूजनेन सपरिवारः श्री महा विष्णुः प्रीयताम्।

पीठ पर नवग्रह पूजन

प्रमाण— वर्तुलं चतुरस्त्रं च त्रिकोणं बाण एव च। सुदीर्घ चतुरस्त्रं च पञ्चकोणं धनुस्तथा।
शूर्पाकारं ध्वजाकारं भान्वादीनां तु मण्डलम्। मध्ये तु भास्करं विद्यात् शशिनं पर्व दक्षिणे॥
दक्षिणे लोहितं विद्यात् बुधं पूर्वोत्तरेण तु। उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम्॥
पश्चिमे तु शनिं विद्यात् राहुं दक्षिण पश्चिमे। पश्चिमोत्तरतः केतुः स्थापनीयाः प्रयत्नतः॥ *(स्कान्दंमूलं प्रयोगरत्नाकर)*

नवग्रह मण्डल वर्तुलाकार पष के जैसे रहता है। उसके आठ दल होते हैं। मध्य भग कर्णिका कहताला है। मध्य कर्णिका वर्तुलाकार मण्डल में सूर्य को मानना चाहिये। आग्नेय दिशा में चतुरस्त्र मण्डल में चन्द्र देवता को मानें। दक्षिण पषदल के त्रिकोणमण्डल में अंगारक को मानें। ऐशान्य दिशा में बाण की चिह्न में बुध को मानें। उत्तर दिशा में दीर्घ चतुरस्त्र मण्डल में गुरु को मानें। पूर्व दिशा में पञ्चकोण मण्डल में शुक्र को मानें। पश्चिम दल में धनुष आकार मण्डल में शनि को मानें। नैऋत्य दिशा में शूर्पाकार मण्डल में राहु को माने। वायव्य दिशा में ध्वजाकार मण्डल में केतु को मानें। एवं ग्रहों की इसी क्रम

सें स्थापना करें।

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहा स्मृताः॥ उपरोक्त नौ ग्रह कहलाते हैं।

ताम्रेण कारयेद् भानुं रजतेन निशाकरम्। कुजज्ञ जीवरूपाणि सुवर्णो प्रकल्पयेत्॥

रजतेन ततः शुक्रं कृष्णलोहेने सूर्यजम्। सीसेन कारयेत् राहुं केतुं कांस्येन कांरयेत्॥ *(ग्रहमख पद्धति)*

सूर्य की प्रतिमा ताम्र से, चाँदी से चन्द्र की प्रतिमा को, कुज, बुध एवं गुरु की प्रतिमा को सेने से, शुक्र की प्रतिमा चॉदी से, शनि की प्रतिमा काले लोहे से, राहु की प्रतिमा सीस से एवं केतु की प्रतिमा काञ्च से बनाना चाहिये।

स्वांगुलेनोच्छ्रितास्सर्वे ग्रहाः कार्या विधानतः। अथवा स्वर्णमात्रेण कारयेत् प्रतिमाः सुधीः॥

सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः॥ *(ग्रहमख पद्धति)*

सभी ग्रहों को एक अंगुल (लगभग एक इञ्च) से कम ऊँचे न बनाये। उन लोहों से या साने से शास्त्र विधि के अनुसार बनायें। सभी को किरीट अवश्य रहना चाहिये।

आदित्यांगाराकौ रक्तौ बुध जीवौ च पीतकौ। सोमशुक्रौ विदुः श्वेतौ कृष्णौ राहु शरीश्वरौ॥

धूम्रः के तुगणाश्चैषां वस्त्राण्याभरणानि च। ग्रहवर्णानि गृह्णीयात् गंधं पुष्पं तथैव च॥ *(ग्रहमख पद्धति)*

सूर्य एवं अंगारक लाल रंग के है। बुध एवं गुरु दोनों पीले रंग के हैं। चन्द्र एवं शुक्र सफेद रंग के हैं। राहु एवं शनी काले रंग के हैं। केतु गणों का रंगा धूम्र है। इनके वस्त्र एवं आभारण, गंध एवं पुष्प भी उनके रंग के समान होने चाहिये।

गोधूमास्तण्डुलाश्चैव ह्याढकाः कुद्गकास्तथा। चणकाश्चैव निष्पावाः तिलमाष कुळित्थकाः॥

ग्रहाणां धान्य जातानि कीर्तितानि मनीषिभिः। *(स्मृति संग्रह)*

सूर्य के लिए गेंहु, चन्द्र के लिए चावल, कुज के लिए अरहर दाल, बुध के लिए साबूत मूँग, गुरु के लिए चना, शुक्र के लिए सफेद राजमा, शनि के लिए तिल, राहु के लिए उडद दाल, केतु के लिए कुळित्थ धान्य।

अर्कः पलाशखदिरावंपामार्गोऽथ पिप्लः। उदुंबरः शमी दूर्वा कुशाश्च समिधः स्मृताः॥ *(प्रयोगरत्नाकर)*

सूर्य के लिए अर्क समित्, चन्द्र के लिए पलाश समित्, कुज के लिए खदिर समित्, बुध के लिए अपामार्ग समित्, गृरु के लिए पीपल का समित्, शुक्र के लिए ऊदुम्बर समित्, शनि के लिए शमी समित्, राहु के लिए दूर्वा समित्, केतु के लिए कुशा समित् हैं।

गुडोदनं पायसान्नं संयावं क्षीरपिकम्। दध्योदनं घृतान्नं च कृसरं मांसचित्रितम्॥ *(स्मृति संग्रह)*

सूर्य के लिए गूड का चावल, चन्द्र के लिए खीर, सेवई खीर कुज के लिए, बुध के लिए पेढा, गुरु के लिए दही चावल, शुक्र के लिए घी चावल, शनि के लिए दही चावल, राहु के लिए उडद का चावल, केतु के लिए चित्रा (खिचडी) नैन्नद्य है। धेनुः शंखस्तथाऽनड्वान् हेम वासो हयः क्रकात्। कृष्णागौ रायससीसः एतावै दक्षिणाः क्रमात्॥ सूर्य के लिए गोदान, चन्द्र के लिए शख दान, कुज के लिए बैल, बुध के लिए सोना, गुरु के लिए पीला वस्त्र, शुक्र के लिए घोडा, शनि के लिए कायीगाय, राहु के लिए लोहा एवं केतु के लिए सीसा का दान करें।

संकल्प—देशकालौ संकीर्त्य सर्वेषां महाजनानां जन्मनक्षत्रे जन्मादि द्वादश भावेषु ये ग्रहाः अरिष्टस्थान स्थिताः तेषा ग्रहाणां एकादशफलावाप्त्यर्थ दुःस्थान स्थित ग्रहात् सुस्थान फलावाप्त्यर्थ, सुस्थान स्थित ग्रहात् अतिशय शुभफलावाप्त्यर्थ, महादशा अन्तर्दशा अन्तरन्तरर्दशा सूक्ष्मदशा प्राणदशासु तत्रागत अप मृत्यु व्याळमृत्यु घोरमृत्यु क्षुद्र मृत्यु पैशाच मृत्यु समस्त मृत्यु पीडा परिहारार्थ परैः कृत कारयिष्यमाण मन्त्र तन्त्र विषचूर्णादि आभिचार कृत्रिमादि सर्वोपद्रव शान्त्यर्थ

सर्वाद्भुत शान्तियागाङ्गत्वेन आदित्यादि नवग्रहाराधनं करिष्ये। *(प्रयोगरत्नकार)*

त्दंगत्वेन कलश पूजां करिष्ये। जल पूरित कलश को बायें ओर रख लोवें। कलश को गंध पुष्पादिकों से पूजन करें।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सर्वो सप्तद्वीपा वसुंधरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥
अंगैश्च सहिताः सर्वे कलशं तु समश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
आयान्तु कर्म सिद्ध्यर्थ दुरितक्षयकारकाः। सर्वे समुद्रा सरितः तीर्थानि जलदा नदाः॥
गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥
कलशोदकं गृहीत्वा देवताः प्रोक्ष्य, पूजा द्रव्याणि प्रोक्ष्य, आत्मनं प्रोक्षयेत्। *(ब्रह्मकर्म समुच्चय-देवपूजा प्रकरण)*

उस कलश जल से देवताओं को प्रोक्षण करें। पूजा द्रव्यों का एवं अपना भी प्रोक्षण करें।

ईशान्यं शुक्लतण्डुलैः सकर्णिकं अष्टदलं अंबुजं उल्लिख्य कर्णिकायां दलेषु च वर्तुलादि तत् तत् ग्रहपीठानि कुर्यात् यथा मध्ये रक्ताक्षतैः वर्तुलं आदित्याय, आग्नेय दले शुक्लाक्षतैः चतुरस्त्रंसोमाय, दक्षिणदले रक्ताक्षतैः त्रिकोणं मंगलाय ईशान दले हरिताक्षतैः बाणाकारं बुधाय, उत्तरदले पीताक्षतैः दीर्घ उचुरस्त्रं गुरवे, पूर्व दले शुक्लक्षतैः पञ्चकोणं शुक्राय, पश्चिमदलेकृष्णाक्षतैः चापाकारंशनैश्चराय, नैऋत्यदलेकृष्णाक्ष तैः शूर्पाकारं राहवे, वायव्यदले चित्राक्षतैः ध्वजाकारं केतवे इति विलिख्यततः उदीचं रंगवल्लीपङ्क्ते धान्येन कुंभ योग्यं पीठं प्रकल्प्य तत्र नवं औरणं तेजसं मृणमयं वा अनुलिप्तं अक्षतपुष्पमालाद्यलंकृतं शुभ अभिषेक कुंभं स्थापयेत्। *(ब्रह्मकर्म समुच्चय)*

ईशान्य दिशा में सफेद चावलों से कर्णिका युक्त अष्टदलपद्म को लिखें। उसके कर्णिका (बीच वाला भाग) एवं दलों में उन उन ग्रहों का पीठ बनायें। जैसे कि लाल क्षतों से बीच में सूर्य का पीठ, आग्नेय दल में सफेद चावलों से चौकाकार पीठ चन्द्र के लिए, दक्षिणदल में लाल अक्षतों से मंगल के त्रिकोणाकार पीठ, ईशान्य ल में हरे अक्षतों से बाणाकार पीठ बुध के लिए, उत्तर दल में पीले चावलों से दीर्घ चौकाकार पीठ गुरु के लिए, पूर्वदल में सफेद अक्षताओं से पञ्च कोण पीठ शुक्र के लिए, पश्चिम दल में काले अक्षतों से धनुष के आकार वाला पीठ शनैश्चर के लिए, नैऋत्य दल में काले अक्षतों से शूर्पाकार पीठ राहु के लिए, वायव्य दल में रंगबिरंगे अक्षतों से ध्वजाकार पीठ केतु के लिए बनायें। इस मण्डल के उत्तर दिशा में रंगोली से बनाये प... के ऊपर धान्य से कलश रखने योग्य पीठ बनाकर, उस पर नया, शुद्ध, मिट्टी का या धातुओं से निर्मित बिना छिद्र के कलश को गंध पुष्पा-क्षतों से अलंकृत कर उस पवित्र अभिषेक कलश को रखें।

पीठ पूजन

ॐ गुं गुरुभ्यो नमः। ॐ गं गणपतये नमः। ॐ आधार शक्त्यै नमः। ॐ मूल प्रकृत्यै नमः। ॐ आदि कूर्माय नमः। ॐ अनंताय नमः। ॐ पृथिव्यै नमः। ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः। ॐ सं सत्वाय नमः। ॐ रं रजसे नमः। ॐ तं तमसे नमः। ॐ मं मायायै नमः। ॐ विं विद्यायै नमः। ॐ पं पद्मायै नमः। ॐ अं कर्ममण्डलाय नमः। ॐ उं सोममण्डलाय नमः। ॐ मं वह्निमण्डलाय नमः। ॐ अं आत्मने नमः। ॐ उं अंतरात्मने नमः। ॐ मं परमात्मने नमः। अं ह्रींज्ञानात्मने नमः। कहकर पीठ का पूजन करें।

ॐ भूमें मातुर्नि धेंहि मा भुद्रया सुप्रंतिष्ठितम्। संविदाना दिवा कंवे श्रियां मां धेहि भूत्यांम् ॥ *(अथर्ववेद १२.१.६३)*

कहकर भूमि की प्रार्थना करें।

ॐ अक्षिंतास्त उपुसदोऽक्षिंताः सन्तु राशयंः। पृणन्तो अक्षिंताः सन्त्वृत्तारंः सुन्त्वक्षिंताः ॥ *(अथर्ववेद ६.१४२.३)*

कहकर वस्त्र बिछाकर उस पर धान की राशि फैलाएं।

ॐ एमां कुमारस्तरुण आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः॥ *(अथर्ववेद ३.१२.७)*

कहकर धान्य राशि पर कलश को रखें।

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

कहकर कलश को तीर्थजल से भरें।

पञ्चगव्य क्षेप—

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। *(ऋग्वेद ३.६२.१०)* कहकर कलश में गोमूत्र डालें।

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

कहकर कलश में गोमय डालें।

ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्। संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ॥ *(अथर्ववेद २.२६.४)*

कहकर कलश में गाय का दूध डालें।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥ *(अथर्ववेद २०.१३७.३)*

कहकर कलश में दहि डालें।

ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।

घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुहतां गावो अग्ने ॥ (अथर्ववेद ७.८२.६)

कहकर कलश में घी डालें।

कलश में पञ्चामृत निक्षेप—ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।
संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ॥ (अथर्ववेद २.२६.४)

कहकर कलश में दूध डाले।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ (अथर्ववेद २०.१३७.३)

कहकर कलश में दहि डालें।

ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुहतां गावो अग्ने ॥ (अथर्ववेद ७.८२.६)

कहकर कलश में घी डालें।

ॐ मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद ॥ (अथर्ववेद ९.१.२३)

कहकर कलश में शहद डालें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ (अथर्ववेद ५.२.३)

कहकर कलश में शक्कर डालें। हय, गज, वल्मीक, ह्रद, गोष्ठ, राजद्वार, चतुष्पद, मृदः। (घोडा, हाथी, बल्मीक, खड्डा, गोशला, राजद्वार, चौराहे की मिट्टी)।

ॐ स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः॥ *(अथर्ववेद १८.२.१९)*

कहकर कलश में मिट्टी डालें।

ॐ पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया। संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे॥ *(अथर्ववेद ३.५.८)*

कहकर वट, पीपल, पलाश, जामून एवं आम के वृक्षों का त्वक् (छिलका) कलश में डालें।

ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये॥ *(अथर्ववेद ८.७.२७)*

कहकर कलश में पुष्प फल डालें।

ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।
तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ *(अथर्ववेद १९.२६.२)*

कहकर कलश में रत्न डालें।

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीमुत द्यां कस्मै देवाय हविषा विधेम॥ *(अथर्ववेद ४.२.७)*

कहकर कलश में हिरण्य (सिक्का) डालें।

ॐ या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः। असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि॥ *(अथर्ववेद ८.७.१)*

कहकर कलश में औषधि डालें।

ॐ गंधद्वारां दुराधर्षां नित्यपुष्टांकरीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

कहकर कलश में चन्दन डालें।

ॐ आयने ते परायणे दूर्वा रोहंतु पुष्पिणीः। उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्॥ *(अथर्ववेद ६.१०६.१)*

कहकर कलश में दर्वा डालें।

ॐ पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया। संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे॥ *(अथर्ववेद ३.५.८)*

कहकर वट, वश्वत्थ, पलाश, जामून एवं आम के वृक्षों के पत्तें से कलश का मुख ढकें। उस पर फल सहित पूर्ण पात्र रखें।

ॐ परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः।

बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ॥ *(अथर्ववेद २.१३.२)* कहकर कलश को वस्त्रों से लपेटें।

सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः। आयांतु देवपूजार्थं दुरितक्षयकारकाः॥

गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधु कावेरि जलेस्मिन्सन्निधिं कुरु॥ *(ब्रह्मकर्म समुच्चय-देवपूजा प्रकरण)*

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

कहकर कलश में तीर्थो का आवाहन करें। कलश को कुशाग्रों से छूकर मन्त्र पाठ करें। आपोहिष्ठेति तिसृणामांबरीषः सिंधुद्वीप आपो गायत्री। जपे विनियोगः।

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

इन मंत्रों से कलश का अभिमंत्रण करें। अभिमंत्रण मन्त्रों का अर्थ मनन करते हुए देवता को छूकर सान्निध्य की कल्पना करने की क्रिया है। ध्यायामि। ध्यानं समर्पयामि। आवाहयामि। आसनं समर्पयामि। स्वागतम्। पादारविंदयोः पाद्यं पाद्यं समर्पयामि। हस्तयोः अर्ध्यमर्ध्यं समर्पयामि। पञ्चामृत स्नानं समर्पयामि। शुद्धोदक स्नानं समर्पयामि। वस्त्रं समर्पयामि। आभरणं समर्पयामि। गंधं समर्पयामि। अक्षतान् समर्पयामि। पुष्पाणि समर्पयामि। धूपमाघ्रापयामि। दीपं दर्शयामि। कदलीफलं निवेदयामि। क्रमुक ताम्बूलं समर्पयामि। मंगल नीराजनं समर्पयामि। मंत्रपुष्पं समर्पयामि। प्रदक्षिणा नकस्कारन् समर्पयामि।। सर्वोपचार पूजां समर्पयामि। अनेन कलशस्थापनेन आदित्यादि नवग्रहाः प्रीयंताम्।

पीठ पर नवग्रहों की स्थापना—गुं गुरुभ्यो नमः। गं गणपतये नमः। आधारशक्त्यै नमः मूल प्रकृत्यै नमः। आदि कूर्माय नमः। अनन्ताय नमः। पृथिव्यै नमः। धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय नमः। सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः।। मं मायायै नमः। विं विद्यायै नमः। पं पद्माय नमः। अं अर्कमण्डलाय नमः। उं सोममण्डलाय नमः। मं वह्निमण्डलाय नमः। अं आत्मने नमः। उं अंतरात्मने नमः। मं परमात्मने नमः।। ॐ ह्रीं ज्ञानात्मने नमः। पीठपूजां समर्पयामि। *(अनुष्ठान पद्धति)*

नवग्रह प्रतिमाओं का अग्न्युत्तारण—अग्न्युत्तारणे विनियोगः।

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः। द्युमत्तमा सुप्रतीकः ससंनुस्तनूनपादसुरो भूरिपाणिः।
देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन।
मध्वा यज्ञं नक्षति प्रैणानो नराशंसो अग्निः सुकृद् देवः सविता विश्ववारः।

अच्छायमेति शवसा घृता चिदीडानो वह्निर्नमसा। अग्निः स्रुचो अध्वरेषु प्रयक्षु स यक्षदस्य महिमानमग्नेः। तरी मन्द्रासु प्रयक्षु वसवश्चातिष्ठन् वसुधातरश्च। द्वारो देवीरन्वस्य विश्वे व्रतं रक्षन्ति विश्वहा। उरुव्यचसाऽग्नेर्धाम्ना पत्यमाने। *(अथर्ववेद ५.२७.१-७)*

इन अग्न्युत्तारण सूक्तों से प्रतिमा पर सतत जल धारा करने से प्रतिमा की शुद्धि होती है। पूर्वनिर्मित पीठेषु यथास्थान मुखैः ग्रहप्रतिमाः स्थापयित्वा पहले बनाये गये ग्रहपीठों में स्थान एवं मुख की दिशा को ध्यान में रखकर प्रतिमाओं की स्थापना करें।

तद्दक्षिणवामपार्श्वयोः अधिदेवता प्रत्यधिदेवता प्रतिमे तदभिमुख्यौ स्थापयेत्। प्रतिमानां असंभवे पुष्पाक्षतादिषु देवता आवाहयेत्। ग्रह देवताओं के दायें बायें ग्रहों की ओर देखते हुए अधिदेवता प्रत्यधिदेवता मूर्तियों की स्थापना करें। प्रतिमाओं के अभाव में पुष्प अक्षतों में उनका आवाहन कर पूजन करें। प्रत्येक ग्रह के आवाहन में उस प्रतिमा पर पुष्पांजलि अर्पित करें। प्रणवस्य परब्रह्म परमात्मा गायत्री व्यस्त समस्त व्यातीनां अत्रि भृगु भरद्वाजप्रजापतयः अग्नि वायु सूर्य प्रजापतयो गाय=युष्णिम् अनुष्टुप् बृहत्यः ग्रहावाहने विनियोगः।

सूर्य देवता आवाहन—कर्णिकायां वर्तुल पीठस्थ गोधूम धान्यस्थ आदित्य प्रतिमायाञ्चादित्यावाहनंकुर्यात्। ॐ पं पद्माय नमः। पीठं संपूज्य।

ॐ उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।
पश्याम त्वा सवितारं यमाहुरजस्त्रं ज्योतिर्यदविन्दुदत्रिः॥ *(अथर्ववेद १३.२.३६)*

ॐभूः आदित्यग्रहमावाहयामि। ॐभुवः आदित्यग्रहमावाहयामि। ॐस्वः आदित्य ग्रहमावाहयामि। ॐभूर्भुवः स्वः आदित्यग्रहमावाहयामि। स्थापयामि। पूजयामि।

भगवन्नादित्य ग्रहाधिपते काश्यपगोत्रकलिंगदेशेश्वर जपापुष्पोपमांगद्युते द्विभुज पद्माभयहस्त सिंदूरवर्णांबरमाल्यानुलेपन ज्वलन्माणिक्यखचित सर्वा गाभ

भास्करतेजोनिधे त्रिलोकप्रकाशकत्रिदेवतामयमूर्ते नमस्ते सन्नद्धारुण ध्वजपताकोप शोभितेन सप्ताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन् आगच्छ अग्निरुद्राभ्यां सह पद्म कर्णिकायां ताम्र प्रतिमां प्राङ्मुखीं वर्तुलपीठेऽधितिष्ठपूजार्थं त्वामावा हयामि। कहकर मध्य के कर्णिका में सूर्य देवता का आवाहन करें।

सूर्य के आगे दाहिने ओर अग्नि का आवाहन करें। आदित्य अधिदेवता अगन्यावाहने विनियोगः। ॐभूः अधिदेवता अग्निं आवाहयामि। ॐभुवः अधिदेवता अग्निं आवाहयामि। ॐस्वः अधिदेवता अग्निं आवाहयामि। ॐभूर्भुवः स्वः अधिदेवता अग्निं आवाहयामि। स्थापयामि। पूजयामि। पिंगश्मश्रुकेशं पिंगाक्षित्रितयं अरुणावर्णांगं छागस्थं साक्षसुत्रं सप्तार्चिषं शक्तिधरवरदहस्तद्वयं आदित्याधिदेवतं अग्निं आवाहयामि। सूर्य के आगे बायें ओर रुद्र का आवाहन करें।

ॐभूरादित्यप्रत्यधिदेवं रुद्रमावाहयामि। ॐभुवदादित्यप्रत्यधिदेवं रुद्रमावाहयामि। ॐस्वरादित्यप्रत्यधिदेवं रुद्रमावाहयामि। ॐभूर्भुवः स्वरादित्यप्रत्यधिदेवं रुद्रमावाहयामि। स्थापयामि। पूजायामि। त्रिलोचनोपेतं पञ्चवक्त्रं वृषारूढं कपालशूल खट्वांगधारिणं चन्द्रमौलिं सदाशिवं आदित्यप्रत्यधिदेवं रुद्रमावाहयामि।

नवशक्ति पूजा—ॐदीप्तायै नमः। ॐसूक्ष्मायै नमः। ॐजयायै नमः।। ॐभद्रायै नमः। ॐविभूत्यै नमः। ॐविमलायै नमः। ॐअमोघायै नमः। ॐविद्युतायै नमः। ॐसर्वतोमुख्यै नमः। ॐनमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताययोगपीठात्मने नमः। सुवर्ण पीठं कल्पयामि। स्वात्मसंस्थमजंशुद्धं त्वामद्य ग्रहनायक। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥ *(अनुष्ठान पद्धति)*

ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः दिवाकरण प्राण इह प्राणः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः दिवाकर जीव इह स्थितः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः दिवाकरस्य सर्वेन्द्रियाणि वाङ्मनः चक्षुः श्रोत्र घ्राण प्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म॑ आ॒सन् न॒सोः प्रा॒णश्च॒क्षु॑र॒क्ष्णोः श्रोत्रं॒ कर्ण॑योः।
अप॑लिताः केशा॒ अशो॑णा॒ दन्ता॑ ब॒हु बा॒ह्वोर्बल॑म्
ऊ॒र्वोरोजो॒ जङ्घ॑योर्ज॒वः पाद॑योः। प्रति॒ष्ठा अरि॑ष्टानि मे॒ सर्वा॒त्मानि॑भृष्टः॥ *(अथर्ववेद १९.६०.१-२)*

सशक्ति सांगसायुधसवाहन सपरिवार श्री भास्कर भगवन् अत्रैवागच्छागच्छ। आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवगुण्ठितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। क्षमस्व। ॐ प्रभाकराय विद्महे दिवाकराय धीमिहि। तन्नः सूर्यः प्रचोदयात्॥

इसका तीन बार जप करते हुए अर्घ्य देवें।

वेदगर्भ ऋषिः। सविता देवता। गायत्री छन्दः।

ध्यानम्— कालिंगं ग्रहमध्य भागनिलयं प्राचीमुखं वर्तुलं,। रक्तं रक्तविभूषणाध्वजरथच्छत्रश्रियाशेभितम्॥
सप्ताश्वं कमलद्वयान्वितकरं पद्मासनं काश्यपं। मेरोर्दिव्य गिरेः प्रदक्षिणाकरं सेवामहे भास्करम्॥

"ॐ घृणिः सूर्यआदित्यः" इस मूल मंत्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंधं कल्पयामि। ॐ हं आकाशत्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचार पूजां समर्पयामि।

प्रार्थना— दिवाकरं दीप्तसहस्त्ररश्मिं तेजोमयं जगतः कर्मसाक्षिं। अंशु भानुं सूर्यमाद्यं ग्रहाणां रविंसदा शरणमहं प्रपद्ये॥

(नवग्रह पूजाविधान-सूर्य पूजा प्रकरणम्)

पद्मासनः पद्मकरः पद्मगर्भ समद्युतिः। सप्ताश्वः सप्तरज्जुश्च द्विभुजः 'स्यात् सदा रविः॥ *(स्मृति संग्रह)*
जपा कुसुम संकाशं काश्यपेयं महाद्युतिं। ध्वांतारिं सर्वपापघ्नं प्रणतोस्मि दिवाकरम्॥

ॐ आदित्याय नमः। ॐ अधिदेवता प्रत्यधिदेवता सहित आदित्य पूजां समर्पयामि।

चन्द्र देवता आवाहन—आग्नेय दले चतुरस्रपीठस्य तण्डुलधान्योपरि चन्द्र प्रतिमायां चन्द्र देवता आवाहनं कुर्यात्। पं पद्माय नमः। पीठं संपूज्य।

ॐ सुतासो मधुमत्तमाः सोमा इन्द्रांय मन्दिनः। पवित्रंवन्तो अक्षरन्देवानांच्छन्तु वो मदाः॥ *(अथर्ववेद २०.१३७.४)*

ॐभूः चन्द्राग्रहमावाहयामि। ॐभुवः चन्द्राग्रहमावाहयामि। ॐस्वः चन्द्रग्रहमावाहयामि। ॐभूर्भुवः स्वः चन्द्र ग्रहमावाहयामि। स्थापयामि। पूजयामि। भगवान् सोम द्विजाधिपते सुधामयशरीर अत्रिगोत्र यामुनदेशेश्वर गोक्षीरधवलांगकांते द्विभुजगदावरदानांकिंतकर शुक्लांबर माल्यानुलेपनसर्वाग मुक्तौमौकिकाभरण रमणीय समस्तलोकाप्यायनक देवतास्वाद्यमूर्ते नमस्ते सन्नद्धधवलध्वज पताकोपशोभितेन दशश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छाद्भिरुमया च सहपश्चाग्नेय दल मध्ये स्फाटिक प्रतिमां प्रत्यड़मुखीं चतुरस्त्रपीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि। चन्द्र के आगे दाहिने ओर अपः का आवाहन करें।

ॐभूः सोमाधिदेवता अपः आवाहयामि। ॐभुवः सोमाधिदेवता अपः आवाहयामि। ॐस्वः सोमाधिदेवता अपः आवाहयामि। ॐभूर्भुवः स्वः सोमाधिदेवता अपः आवाहयामि। स्थापयामि। पूजयामि। स्त्रीरूपधारिणीः श्वेतवर्णामकरवाहनाः पाशकलश धरिणीर्कुक्ताभरण भूषिताः सोमाधिदेवता अपः अवाहयामि। चन्द्र देवता के आगे बायें ओर गौरी का आवाहन करें।

ॐभूः सोमप्रत्यधिदेवतां गौरीं आवाहयामि। ॐभुवः सोमप्रत्यधिदेवतां गौरीं आवाहयामि। ॐस्वः सोमप्रत्यधिदेवतां गौरीं अवाहयामि। ॐभू र्भुवः स्वः सोमप्रत्यधिदेवतां गौरीं आवाहयामि। स्थापयामि। पूजायामि। अक्षसूत्र कमल दर्पण कमण्डलुधारिणीं त्रिदशपूजितां सोमप्रत्यधि देवतां गौरीं आवाहयामि।

नव शक्ति पूजा

ॐराकायै नमः। ॐकुमुद्वत्यै नमः। ॐनंदायै नमः। ॐसंध्यायै नमः। ॐसंजीविन्यै नमः। ॐक्षमायै नमः। ॐज्योत्स्नायै नमः। ॐनित्यायै नमः। ॐप्रभायै नमः। ॐनमो भगवते सकलगुणात्म शक्तियुक्ताय अनंत योग पीठात्मे नमः। सुवर्ण पीठ कल्पयामि। स्वत्मसंस्थमजं शुद्धं त्वामद्य कुमुदाधिप अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥

ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः चन्द्र प्राण इह प्राणः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः चन्द्र जीव इह स्थितः। ॐआं ह्रीं क्रों

य र ल व श ष स हों सं हं सः चन्द्रस्य सर्वेन्द्रियाणि वाङ्मनः चक्षुः श्रोत्रघ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म॑ आ॒सन् न॒सोः प्रा॒णश्चक्षु॑र॒क्ष्णोः श्रोत्रं॒ कर्णयोः।

अप॑लि॒ताः केशा॒ अशो॑णा॒ दन्ता॑ ब॒हु बा॒ह्वोर्बल॑म्

ऊ॒र्वोरोजो॒ जङ्घ॑योर्ज॒वः पाद॑योः। प्र॒ति॒ष्ठा अरि॑ष्टानि मे॒ सर्वा॒त्मानि॑भृष्टः॥ *(अथर्ववेद १९.६०.१-२)*

सशक्ति सांगसायुधसवाहन सपरिवार श्री चन्द्र भगवान् अत्रैवागच्छागच्छ आवाहयिष्ये। आवाहितो भव संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवगुण्डितो भव। अमृतीकृतो भ। व्याप्तो भव। सुप्रसन्नो भव। क्षमस्व। ॐ **अत्रिपुत्राय॑ वि॒द्महे॑ अमृतोद्भवाय॑ धीमहि। तन्नः॑ सोमः प्रचो॒दया॑त्।** इसका तीन बार जप करते हुए अर्घ्य देवें।

ध्यानं— **आत्रेयं यमुनाप्रभुं ग्रहगणस्याग्नेय भागस्थितं। श्वेतं श्वेतसुगंधमाल्यवसनं श्वेतांबुजोद्यत् करं।**
श्वेतच्छत्रविभूषणं ध्वजरथच्छत्रश्रिया शोभितं। मेरोर्दिव्यगिरेः प्रदक्षिणाकरं सेवामहे शीतलम्म्।

(नवग्रह पूजाविधान-चन्द्रपूजा प्रकरणम्)

ॐ चं चद्राय नमः "इति मूल मंत्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंध कल्पयामि। ॐ हं आकाशत्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं गग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचार पूजां समर्पयामि।

प्रार्थना— **यः कालहेतोः क्षयवृद्धिमेति यंदेवताः पितरः संपिबन्ति। तं वै वरेण्यं सुरसंघवंद्यं सोमं सदा शरणमहं प्रपद्ये।**
श्वेतः श्वेताम्बरधरो दशश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च स्मर्तव्यो वरदः शशी॥

श्वेतं श्वेतांबरधरं दशाश्वं श्वेतभूषणम्। द्विभंजं साभ्यगद मात्रेयं सामृतं विभुम्॥
दिव्यशङ्खतुषाराभं क्षीरोदार्णवसंभवम्। नमामि शशिनं भक्त्या शंभोर्मुकुटभूषणम्॥
ॐ सोमाय नमः। अधिदेवता प्रत्यधिदेवता सहित चन्द्र पूजां समर्पयामि। *(नवग्रह पूजाविधान-चन्द्रपूजा प्रकरणम्)*

अंगारक देवता आवाहन—दक्षिणदले त्रिकोणपीठोपरि आढक राशौ रक्त चन्दन प्रतिमायां अंगारकावाहनं कुर्यात् ॐपं पद्माय नमः। पीठं संपूज्य।

ॐ अग्निर्वासाः पृथिव्यं सितज्ञूस्त्विषींमन्तं संशितं मा कृणोतु॥ *(अथर्ववेद १२.१.२१)*

ॐभूः अंगारक ग्रहमावाहयामि। ॐभुवः अंगारक ग्रहमावाहयामि। ॐस्वः अंगारक ग्रहमावाहयामि। ॐभूर्भुवः स्वः अंगारकग्रहमावाहयामि। स्थापयामि। पूजयामि।

भगवन्नंगारक अग्न्याकृते भारद्वाजगोत्र अवंति देशेश्वर ज्वालापुंजोपमांगद्युते चतुर्भुज शक्तिशूलगदाखड्गधारिन् रक्तांबर माल्यानुलेपोपमांगद्युते रक्तांबर माल्यानुलेपनप्रवालभूषिताभरण सर्वागदुर्धरालोकदीप्तेनमस्ते सन्नद्धरक्त ध्वज पताकोपशोभितेन रक्तमेषरथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छ भूमिस्कंदाभ्यां सहपद्मदक्षिणदलमध्ये रक्तचंदन प्रतिमां दक्षिणामुखीं त्रिकोणपीठेऽधितिष्ठ पूजार्थं त्वां आवाहयामि। अंगारक के आगे दाहिने ओर भूमि का आवाहन करें।

ॐभूरंगारकाधिदेवतांभूमिमावाहामि। ॐभुवोंगारकाधिदेवतां भूमिमावाहयामि। ॐस्वरंगारकाधिदेवतां भूमिमावाहयामि। ॐभूर्भुवः स्वरंगारकाधिदेवतां भूमिमावाहयामि। स्थापयामि। पूजयामि। शुक्लवर्णां दिव्याभरणभूषितां चतुर्भुजां सौम्य वपुषं चण्डांशुसदृशां बरां रत्नात्र सस्यपात्रौषधिपात्रपद्मोपेत करां चतुर्दिग्भागपृष्टगतां अंगारकाधिदेवतां भूमिमावाहयामि। अंगारक के आगे बायें ओर स्कन्द का आवाहन करें।

ॐभूरंगारकप्रत्यधिदेवतां स्कंदमावाहयामि। ॐभुवोंऽगारक प्रत्यधिदेवतां स्कंदमावाहयमि। ॐस्वरंगारक प्रत्यधिदेवतां स्कंदमावाहयामि। भू भुर्वः स्वरंगारक

प्रत्यधिदेवतां स्कंदमावाहयामि। स्थापयामि। पूजयामि। षष्मुखं शिखराडक विभूषणं रक्तांबरधरं मयूरयान कुक्कुट घंटा पताका शक्त्युपेतं चक्षुर्भुजं अंगारक प्रत्यधिदेवं स्कंद मावाहयामि।

नवशक्ति पूजा—ॐ रोहितायै नमः। ॐ ज्वालिन्यै नमः। ॐ रौद्रयै नमः। ॐ तीक्ष्णायै नमः। ॐ सूक्ष्मायै नमः। ॐ जयायै नमः। ॐ क्षुधायै नमः। ॐ सारायै नमः। ॐ निर्मलायै नमः। ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योग पीठात्मने नमः। सुवर्ण पीठं कल्पयामि। स्वात्मसंस्थमजं शुद्धं त्वामद्य भूमिनन्दन। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥ ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः अंगारक प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः अंगारक जीव इह स्थितः। ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः अंगारकस्य सर्वेन्द्रियाणि वाङ्मनः चक्षुश्रोत्रघ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म॑ आ॒सन् न॒सोः प्रा॒णश्चक्षु॑र॒क्ष्णोः श्रोत्रं॒ कर्णयोः।
अप॑लिताः केशा॒ अशो॑णा॒ दन्ता॑ ब॒हु बा॒ह्वोर्बलम्
ऊ॒र्वोरोजो॒ जङ्घ॑योर्ज॒वः पाद॑योः। प्र॒ति॒ष्ठा अरि॑ष्टानि मे॒ सर्वा॒त्मानि॑भृष्टः॥ *(अथर्ववेद १९.६०.१-२)*

स शक्ति सांग सयुध सवाहन सपरिवार श्री अंगारक भगवन् अत्रैवागच्छागच्छ। आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। अमृतीकृतो भव। सन्निरुद्धो भव। अवगुण्ठितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। क्षमस्व। **ॐ भूमि॒पुत्राय॑ वि॒द्महे॑ भारद्वाजाय॑ धीमहि। तन्नः॑ कुजः प्रचो॒दयात्।** इसको तीन बार जपते हुए अर्घ्य देवें।

ध्यानम्— **विंध्येशं ग्रहदक्षिणाप्रतिमुखं रक्तं त्रिकोणाकृतिं। दोर्भिः स्वीकृत शक्तिशूल सुगदं चारूढमेषाधिपं॥**
भारद्वाजमुपेत रक्तवसनं छत्रश्रियाशोभितं।

मेरोर्दिव्यगिरेः प्रदक्षिणाकरं सेवामहे तं कुजम् ॥ *(नवग्रह पूजाविधान-अंगारक पूजा प्रकरणम्)*

ॐ अं अगारकाय नमः। इस मूल मंत्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंधं कल्पयामि। ॐ हं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना सर्वोपचार पूजां समर्पयामि।

प्रार्थना—महेश्वरस्यानन स्वेदबिन्दोर्भूमौ जातं रक्तमाल्ल्याम्बराड्यं।
सुरश्मिनं लोहिताङ्ग कुमारं अंगारकं सदा शरणमहं प्रपद्ये ॥
रक्त माल्यांबरधरः शक्तिशूल गदाधरः। चतर्भुजो मेषगमो भारद्वाजो धरासुतः ॥
रक्तस्त्रगंबरालेपं गदाशक्त्यसिशूलिनं। चतुर्भजं मेषगमं भारद्वाजं धरासुतम् ॥
धरणीगर्भसंभूतं विद्युत्काञ्चनसन्निभम्। कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥

ॐ अंगारकाय नमः। अधिदेवता प्रत्यधिदेवता सहित अंगारक पूजां समर्पयामि।

बुध देवता आवाहनम्—ईशान्यदले बाणाकार पीठे मुद्गधान्ये बुध प्रतिमायां बुधावाहनं कुर्यात्। ॐ पं पद्माय नमः। पीठं संपूज्य।

ॐ कपृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजंसातये।
निष्टिग्र्यः पुत्रमा च्यांवयोतय इन्द्रं सबाधं इह सोमंपतये ॥ *(अथर्ववेद २०.१३७.२)*

ॐ भूः बुध ग्रहमावाहयामि। ॐ भुवः बुध ग्रहमावाहयामि। ॐ स्वः बुध ग्रहमावाहयामि। ॐ भूर्भुवः स्वः बुध ग्रहमावाहयामि। स्थापयामि। पूजयामि। भगवन्सौम्यसौम्याकृते सर्वज्ञानमय अत्रिगोत्र मगधदेशेश्वर कुंकुमवर्णोपमांगद्युते चतुर्भुज खड्गखेटकगदावरदानांकित पीतांबरमाल्यानुलेपन मरकताभरणालंकृत सर्वाङ्गविबुधपते नमस्ते सन्नद्ध पीतध्वजपताकोपशोभितेन चतुः सिहस्थवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छ विष्णुपुरुषाभ्यां सहैशान दलमध्ये सुवर्णप्रतिमां

उदङ्मुखीं बाणाकार पीठेधितिष्ठ पूजार्थ त्वां आवाहयामि। बुध के आगे दाहिने ओर अधिदेवता विष्णु का आवाहन करें।

ॐ भूः बुध अधिदेवतां विष्णुं आवाहयामि। ॐ भुवः बुध अधिदेवतां विष्णुं आवाहयामि। ॐ स्वः बुध अधिदेवतां विष्णुं आवाहयामि। ॐ भूभुवः स्वः बुध अधिदेवतां विष्णुं आवाहयामि। स्थापयामि पूजयामि। कौमोदकी पद्मशंख चक्रोपेतं चतुर्भुजं सौम्याधिदेवं विष्णुमावाहयामि। बुध के आगे बायें ओर पुरुष का आवाहन करें।

ॐ भूर्बुधप्रत्यधिदेवं पुरुषमावाहयामि। ॐ भुवर्बुधप्रत्यधिदेवं पुरुषमावाहयामि। ॐ भूर्भुवः स्वर्बुधप्रत्यधिदेवं पुरुष्मावाहयामि। स्थापयामि। पूजयामि। कौमोद कीपद्मशंखचक्रोपेतं चतुर्भुजं सौम्यप्रत्यधि देवं पुरुषमावाहयामि।

नवशक्ति पूजा—ॐ चंद्रिकायै नमः। ॐ कौमुद्यै नमः। ॐ ज्योत्स्नयै नमः। ॐ संध्यायै नमः। ॐ विद्यायै नमः। ॐ सरस्वत्यै नमः। ॐ मेधायै नमः। ॐ प्रज्ञायै नमः। ॐ प्रभायै नमः। ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताययोगपीठात्मने नमः। सुवर्णपीठं कल्पयामि। स्वात्मसंस्थमजं शुद्धं त्वामद्येन्दुसुतोत्तम। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥ ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः बुध प्राण इह प्राणाः। ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः बुध जीव इह स्थितः। ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः बुधस्य सर्वेन्द्रियाणि बाङ्मनः चक्षुः श्रोत्र घ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

वाङ्म॑ आ॒सन् न॒सोः प्रा॒णश्चक्षु॑र॒क्ष्णोः श्रोत्रं॒ कर्णयोः।
अप॑लिता॒ः केशा॒ अशो॑णा॒ दन्ता॒ ब॒हु बा॒ह्वोर्बलम्
ऊ॒र्वोरोजो॒ जङ्घ॑योर्ज॒वः पाद॑योः। प्र॒ति॒ष्ठा अरि॑ष्टानि मे॒ सर्वा॒त्मानि॑भृष्टः॥ *(अथर्ववेद १९.६०.१-२)*

स शक्ति सांग सायुध सवाहनसपरिवार श्री बुध भगवान् अत्रैवागच्छागच्छ। आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो

भव। अवगुण्डितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। ॐ **तारासुताय विद्महे। सोमपुत्राय धीमहि। तन्नो बुधः प्रचोदयात्।** इसका तीन बार जप करते हुए अर्ध्य देवें।

ध्यानम्— **आत्रेयं मगधाधिपं ग्रहगणस्येशानभागस्थितं बाणाकारमुदङ्मुखं कर लसत् तोणीर बाणासनम्।**
पीतस्त्रग्वसन द्वयध्वजरथ छत्रश्रिया शोभितं मेरोर्दिव्यगिरेः प्रदक्षिणाकरं सेवामहे तं बुधम्॥

ॐ बुं बुधाय नमः। इस मन्त्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंधं कल्पयामि। ॐ अं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचार पूजां समर्पयामि।

प्रार्थना— **विशुद्धबुद्धिं श्रुतिकालबोधं सत्यावाचं सोमवंशप्रदीपम्। सुवर्चसं छन्दसो विश्वरूपं बुधं सदा शरणमहं प्रपद्ये॥**
पीतमाल्यांबरधरः कर्णिकार समुद्युतिः। खड्गचर्म गदापाणिः सिंहस्थो वरदो बुधः॥
पीतमाल्यांबरधरं कर्णिकार समद्युतिम्। खड्गचर्मगदापाणिमात्रेयं सिंहगं बुधम्॥
प्रियंगुकलिकाभासं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्युणोपेतं नमानि शशिनन्दनम्॥ *(नवग्रह पूजाविधान-बुध पूजा प्रकरणम्)*

ॐ बुधाय नमः। अधिदेवता प्रत्यधिदेवता सहित बुध पूजां समर्पयामि।

बृहस्पति देवता आवाहन—उत्तरदले दीर्घ चतुरस्रपीठे चणाकराशिस्थ बृहस्पति प्रतिमायां बृहस्पत्यावाहनं कुर्यात्। ॐ पं पद्माय नमः। पीठं संपूज्य।

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु॥ *(अथर्ववेद ७.५१.१)*

ॐ भूः बृहस्पति ग्रहमावाहयामि। ॐ भुवः बृहस्पति ग्रहमावाहयामि। ॐ स्वः बृहस्पति ग्रहमावाहयामि। ॐ भूर्भुवः स्वः बृहस्पति ग्रहमावाहयामि। स्थापयामि। पूजयामि।

भगवन् बृहस्पे समस्तदेवताचार्य आंगिरस गोत्र सिंधुदेशेश्वर तप्तसुवर्णसदृशांगदीप्ते चतुर्भुज दण्ड कमाण्डल्वक्षसूत्र वरदानांकित पीतांबर माल्यानुलेपन पुष्परागमयाभरणरमणीय सर्वविद्याधिपते नमस्ते सन्द्धपीत ध्वजपताकोपशोभितेन पीताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेन्द्र ब्रह्मभ्यां सह पद्मोत्तर दलमध्ये सुवर्णप्रतिमामुदङ्मुखीं दीर्घ चतुरस्र पीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि। बृहस्पति के आगे दाहिने ओर इन्द्र का आवाहन करें।

ॐ भूः बृहस्पति अधिदेवतां इन्द्रमावाहयामि। ॐ भुवः बृहस्पति अधिदेवतां इन्द्रमावाहयामि। ॐ स्वः बृहस्पति अधिदेवतां इन्द्रमावाहयामि। ॐ भूर्भुवः स्वः बृहस्पति अधिदेवतां इन्द्रं आवाहयामि। स्थापयामि। पूजयामि। चतुर्दन्तं गजारूढं बज्रांकुशधरं शचीपतिं नानाभ्रणभूषितं बृहस्पत्यधि देवं इन्दं आवाहयामि। बृहस्पति के आगे बायें ओर ब्रह्मा का आवाहन करें।

ॐ भूः बृहस्पति प्रत्यधिदेवतां ब्रह्माणमावाहयामि। ॐ भुवः बृहस्पति प्रत्यधिदेवतां ब्रह्माणमावाहयामि। ॐ स्वः बृहस्पति प्रत्यधिदेवतां ब्रह्माणमावाहयामि। ॐ भूर्भुवः स्वः बृहस्पति प्रत्यधिदेवतां ब्रह्माणमावाहयामि। स्थापयामि। पूजयामि। पद्मासनस्थं जटिलं चतुर्मुखं अक्षमाला स्रुव पुस्तक कमण्डलु धारिणं कृष्णाजिन वाससं पार्श्वस्थित हंसं बृहस्पति प्रत्यधिदेवं ब्रह्माणं आवाहयामि।

नव शक्ति पूजा—ॐ धृत्यै नमः। ॐ कांत्यै नमः। ॐ दयायै नमः। ॐ मेधयै नमः। ॐ प्रज्ञायै नमः। ॐ विद्यायै नमः। ॐ यशस्विन्यै नमः। ॐ स्थिरायै नमः। ॐ सुप्रभायै नमः। ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योग पीठात्मने नमः। सुवर्ण पीठं कल्पयामि।

स्वात्मसंस्थमजं शुद्धं त्वामद्य सुरपूजित। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरू॥

ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः बृहस्पति प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों य र ल व श ष स हों सं हं सः बृहस्पति जीव इह स्थितः। ॐ आं

ह्रीं क्रों य र ल व श ष स हों सं हं सः बृहस्पतेः सर्वेन्द्रियाणि वाङ्मनः चक्षुः श्रोत्रघ्राण प्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म आसन् नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः।

अपलिताः केशा अशोणा दन्ता बहु बाह्वोर्बलम्

ऊर्वोरोजो जङ्घयोर्जवः पादयोः। प्रतिष्ठा अरिष्टानि मे सर्वात्मानिभृष्टः॥ *(अथर्ववेद १६.६०.१-२)*

सशक्ति साङ्ग सायुधसवाहन सपरिवार श्री बृहस्पति भगवान् अत्रैवागच्छागच्छ। आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवगुण्ठितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। ॐ **देवाचार्याय विद्महे। वाचस्पत्याय धीमहि। तन्नो गुरुः प्रचोदयात्।** इसका तीन बार जप करते हुए अर्घ्य देवें।

ध्यानम्—सिंधूनामधिपं ग्रहोत्तरगतं दीर्घं चतुष्कोणगम्, प्राप्तं मण्डलमङ्गिरान्वयभुवं दण्डं दधानं करे।
सौवर्णं ध्वजवस्त्र भूषणरथछत्र श्रिया शोभितं, मेरोर्दिव्यगिरेः प्रदक्षिणकरं सेवामहे वाक्पतिम्॥

ॐ बृं बृहस्पतये नमः। इस मूल मंत्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंधं कल्पयामि। ॐ हं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचार पूजां समर्पयामि।

प्रार्थना— बुध्यासमो यस्य न कश्चिदन्यो मतिं देवा उपजीवन्ति यस्य। प्रजापतेरात्मजं धर्मनित्यं गुरुं सदा शरणमहं प्रपद्ये॥
देवदैत्य गुरुश्चैव पीतः साक्षात् चतुर्भुजः। दण्डी च वरदश्चैव साक्षसूत्रकमण्डलुः॥
आङ्गिरसं देवगुरुं पीतस्त्रग्गन्धवस्त्रकम्। दण्डिनं वरदं पीतं साक्षसूत्रकमण्डलुम्॥
देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम्। वन्ध्यं च त्रिषु लोकेषु प्रणमामि बृहस्पतिम्॥ *(नवग्रह पूजा विधान-बृहस्पति पूजा प्रकरणम्)*

ॐ बृहस्पतये नमः। अधिदेवता प्रत्यधिदेवता सहित बृहस्पति पूजां समर्पयामि।

शुक्र देवता आवाहन—पूर्वदले पञ्चकोण पीठस्थ निष्पावधान्यस्थ शुक्र प्रतिमायां शुक्रावाहनं कुर्यात्। ॐ पं. पद्माय नमः। पीठं संपूज्य।

ॐ द्यौश्चं म इदं पृंथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पिपर्तु।
अनुं स्वधा चिंकितां सोमों अग्निर्वायुर्नः पातु सविता भगंश्च॥ (अथर्ववेद ६.५३.१)

ॐ भूः शुक्रग्रहमावाहयामि। ॐ भुवः शुक्रग्रहमावाहयामि। ॐ स्वः शुक्रग्रहमावाहयामि। ॐ भूर्भुवः स्वः शुक्रग्रहमावाहयामि, स्थापयामि, पूजयामि।
भगवन् भार्गव समस्य दैत्यगुरो भार्गव गोत्र भोजकट देशेश्वर रजतोज्वलाङ्गकांते चतुर्भुज दण्ड कमण्डल्वक्ष सूत्र वरदानांकित शुक्लांबरमाल्यानुलेपन वज्राभरण भूषित सर्वाङ्गसमस्त नीतिशास्त्र निपुणमते नमस्ते सन्नद्धशुक्लध्वज पताकोपशोभितेन शुक्लाश्व सहितेन रथेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेन्द्राणींद्राभ्यां सह पूर्वदलमध्ये रजतप्रतिमां प्राङ्मुखीं पञ्चकोणपीठेऽधितिष्ठ पूजार्थं त्वां आवाहयामि। कहकर शुक्र का आवाहन करें। शुक्र के आगे दाहिने ओर इंद्राणी का आवाहन करें।

ॐ भूः शुक्राधिदेवतां इंद्राणीमावाहयामि। ॐ भुवः शुक्राधिदेवतां इंद्राणीमावाहयामि। ॐ स्वः शुक्रधिदेवतां इंद्राणीमावाहयामि। ॐ भूर्भुवः स्वः शुक्राधिदेवतां इंद्राणीमावाहयामि, स्थापयामि, पूजयामि। ॐ संतानमंजरीवरदानधर द्विभुजांशुक्राधिदेवतां इंद्राणीं आवाहयामि। शुक्र के आगे बायें ओर इन्द्र का आवाहन करें।

ॐ भूः शुक्र प्रत्यधिदेवतां इन्द्रं आवाहयामि। ॐ भुवः शुक्र प्रत्यधिदेवतां इन्द्रं आवाहयामि। ॐ स्वः शुक्र प्रत्यधिदेवतां इन्द्रं आवाहयामि। ॐ भूर्भुवः स्वः शुक्र प्रत्यधिदेवतां इन्द्रं आवाहयामि, स्थापयामि, पूजयामि। चतुर्दन्तगजारूढं वज्रांकुशधरं शचीपतिं नानाभरणभूषितं भार्गव प्रत्यधिदेवं इन्द्रं आवाहयामि।

नव शक्ति पूजा—ॐ शान्तायै नमः। ॐ नन्दायै नमः। ॐ स्मृत्यै नमः। ॐ कांत्यै नमः। ॐ लक्ष्म्यै नमः। ॐ प्रीत्यै नमः। ॐ कलायै नमः। ॐ अमलायै

नमः। ॐसर्वसंपत्कार्यै नमः। ॐनमो भगवते सकलगुणात्मशक्तियुक्ताय अनंतायायोगपीठात्मने नमः। सुवर्णपीठं कल्पयामि। स्वात्मसंस्थमजं शुद्धं त्वामद्यासुरपूजित। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥ ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः शुक्र प्राण इह प्राणाः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः शुक्र जीव इह स्थितः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः शुक्रस्य सर्वेन्द्रियाणि वाङ्मनः चक्षुश्रोत्रध्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म॑ आ॒सन् न॒सोः प्रा॒णश्च॒क्षुर॒क्ष्णोः श्रोत्रं॒ कर्णयोः।

अप॑लिताः॒ केशा॒ अशो॑णा॒ दन्ता॑ ब॒हु बा॒ह्वोर्बलम्

ऊ॒र्वोरोजो॒ जङ्घ॑योर्ज॒वः पाद॑योः। प्र॒ति॒ष्ठा अरि॑ष्टानि मे॒ सर्वा॒त्मानि॑भृष्टः॥ *(अथर्ववेद १६.६०.१-२)*

सशक्ति साङ्ग सायुध सवाहन सपरिवार श्री शुक्र भगवान् अत्रैवागच्छागच्छ। आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवगुण्ठितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। क्षस्व। **ॐ दै॒त्या॒चा॒र्याय॑ वि॒द्महे॑ विद्यारू॒पाय॑ धीमहि। तन्नः॑ शुक्रः॒ प्रचो॒दया॑त्॥**

इसका तीन बार जप कर अर्घ्य देवें।

ध्यानम्—भोजेशं भृगुगोत्रजं ग्रहगणप्राचीन भागस्थितं, पञ्चश्रोज्वलमण्डलं करयुगे दण्डं च सत्कुंडिकाम्॥

बिभ्राणं सितवस्त्रभूषणरथच्छत्रश्रिया शोभितं, मेरोर्दिव्यगिरेः प्रदक्षिणाकरं सेवामहे भार्गवम्॥

(नवग्रह पूजा विधान-शुक्र पूजा प्रकरणम्)

ॐ शुं शुक्राय नमः। इस मूलमंत्र का आठ बार जप करें। ॐलं पृथिव्यात्मना गंधं कल्पयामि। ॐहं आकाशात्मना पुष्पं कल्पयामि। ॐआकाशात्मना

पुष्पं कल्पयामि। ॐयं वाय्वात्मना धूपं कल्पयामि। ॐरं अग्न्यात्मना दीपं कल्पयामि। ॐवं अबात्मना नैवेद्यं कल्पयामि। ॐपं परमात्मना पञ्चोपचारपूजां समर्पयामि।

प्रार्थना—वर्षप्रदं चिंतितार्थानुकूलं मौनाद्विशिष्टं विनयोपपन्नम्। तं भार्गवं योग विशुद्धसत्वं शुक्रं सदा शरणमहं प्रपद्ये॥
शुक्रं शुक्रतनुं श्वेत वस्त्राढ्यं दैत्यमंत्रिणम्। भार्गवं दण्डवरदं कमण्डल्वक्षसूत्रिणम्॥
हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम्। सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम्॥

ॐशुक्राय नमः अधिदेवता प्रत्यधिदेवता सहित शुक्रपूजां समर्पयामि।

शनैश्चर देवता आवाहन—मण्डलस्य पश्चिम दले धनुराकारपीठे तिलधान्यस्थ शनैश्चर प्रतिमायां शनैश्चरावाहनं कुर्यात्। ॐपं पद्माय नमः। पीठं संपूज्य।

ॐ शं नो॒ वातो॑ वातु॒ शं न॑स्तपतु॒ सूर्यः॑। अहा॑नि॒ शं भ॑वन्तु॒ नः॒ शं रात्री॒ प्रति॑ धीयता॒ं शमु॒षा नो॒ व्यु॑च्छतु॒॥ *(अथर्ववेद ७.६९.१)*

ॐभूः शनैश्चर ग्रहमावाहयामि। ॐभुवः शनैश्चर ग्रहमावाहयामि। ॐस्वः शनैश्चर ग्रहमावाहयामि। ॐभू र्भुवः स्वः शनैश्चर ग्रहमावाहयामि, स्थापयामि, पूजयामि।

भगवन् शनैश्चर भास्कर तनय काश्यप गोत्र सौराष्ट्र देशेश्वर कज्जल समानाङ्ग कांते चतुर्भुज चाप-तूणीर-कृपाणाभ्यांकित नीलांबर माल्यानुलेपन नीलरत्न भूषणालंकृतसर्वांग समस्त भुवन भीषणामर्षमूर्ते नमस्ते सन्नद्ध नीलध्वजपताकोपशोभितेन नील गृध्ररथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छ प्रजापति यमाभ्यां सह पश्चिम दलामध्ये कालायस प्रतिमां प्रत्यङ्मुखीं चापाकर पीठेऽधितिष्ठ पूजार्थ त्वां आवाहयामि। शनैश्चर के आगे दाहिने ओर प्रजापति का आवाहन करें।

ॐभूः शनैश्चराधिदेवतां प्रजापतिं आवाहयामि। ॐभुवः शनैश्चराधिदेवतां प्रजापतिं आवाहयामि। ॐस्वः शनैश्चराधिदेवतां प्रजापतिं आवाहयामि। ॐभू भुर्वः स्वः शनैश्चराधिदेवतां प्रजापतिं आवाहयामि, स्थापयामि, पूजयामि। यज्ञोपवीतिनं हंसस्थं एकवक्त्रं अक्षमालास्रुव पुस्तक कमण्डलु सहितं चतुर्भजं शनैश्चराधिदेवं प्रजापतिमावाहयामि। शनैश्चर के आगे बायें ओर यम का आवाहन करें।

ॐभूः शनैश्चर प्रत्यधिदेवतां यमं आवाहयामि। ॐभुवः शनैश्चर प्रत्यधिदेवतां यमं आवाहयामि। ॐस्वः शनैश्चर प्रत्यधिदेवतां यमं आवाहयामि। ॐशनैश्चर प्रत्यधिदेवतां यमं आवाहयामि। ॐभू भुर्वः स्वः शनैश्चर प्रत्यधिदेवतां यमं आवाहयमि, स्थापयामि, पूजयामि। ईशत्पीनं दण्डहस्तं रक्त सदृश पाशधरं कृष्णावर्ण महिषारूढं सर्वा भरण भूषितं शनैश्चर प्रत्यधिदेवतां यमं आवाहयामि।

नव शक्तिपूजा—ॐभद्रायै नमः। ॐतंद्रायै नमः। ॐक्षुधायै नमः। ॐमृत्यवे नमः। ॐजरायै नमः। ॐमायायै नमः। ॐमनोमयै नमः। ॐकामुकायै नमः। ॐवरदायै नमः। ॐनमो भगवते सकलगुणात्मशक्तियुक्ताय अनंत योगपीठात्मने नमः। सुवर्णपीठं कल्पयामि। स्वात्मसंस्थमजं शुद्धं त्वामद्य रविनन्दन। अरण्यामिव हव्याशं बिम्बेस्मिन् सन्निधिं कुरु॥

ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः शनैश्चर प्राण इह प्राणाः। ॐआं ह्रीं क्रों य र ल व श ष स हों सं हं सः शनैश्चर जीव इह स्थितः। ॐआं ह्रीं क्रों य र ल व श ष स हो सं हं सः शनैश्चरस्य सर्वेन्द्रियाणि वाङ्मनः चक्षुः श्रोत्र घ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

वाङ्म आसन् नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः।
अपलिताः केशा अशोणा दन्ता बहु बाह्वोर्बलम्
ऊर्वोरोजो जङ्घयोर्जवः पादयोः। प्रतिष्ठा अरिष्टानि मे सर्वात्मानिभृष्टः॥ *(अथर्ववेद १९.६०.१-२)*

स शक्ति साङ्ग सायुधसवाहन सपरिवार री शनैश्चर भगवन् अत्रैवागच्छागच्छ आवाहयिष्ये। आवाहितो भव। संस्थापितो भव। सन्निहितो भव। सन्निरूद्धो

भव। अवगुण्ठितो भव। अमृतीकृतो भव। व्याप्तो भव। सुप्रसन्नो भव। क्षमस्व। ॐ सूर्यपुत्राय विद्महे शनैश्चराय धीमहि। तन्नो मंदः प्रचोदयात्॥ इसका तीन बार जप करते हुए अर्घ्य देवें।

ध्यानम्—आन्ध्रेशं ग्रहपश्चिमं करलसत्तूणीर बाणासनं, कोदण्डाकृतिमण्डलं घननिभं गृध्रासनं काश्यपिम्॥
नीलच्छत्रविभूषणं ध्वजरथछत्रश्रिया शोभितं। मेरोर्दिव्यगिरेः प्रदक्षिण करं सेवामहे भानुजम्॥

ॐ शं शनैश्चराय नमः। इस मूल मन्त्र का आठ बार जप करें। ॐ लं पृथिव्यात्मना गंधं कल्पयामि। ॐ हं आकाशात्मना पुष्पं कल्पयामि। ॐ यं वाय्वात्मना धूपं कल्पयामि। ॐ रं अग्न्यात्मना दीपं कल्पयामि। ॐ वं अबात्मना नैवेद्यं कल्पयामि। ॐ पं परमात्मना पञ्चोपचार पूजां समर्पयामि।

प्रार्थना— शनैश्चरो राशितो राशिमेति शनैर्भोगो गमनं चेष्टितं च। सूर्यात्मजं क्रोधनं सुप्रसन्नं मंदं सदा शरणमहं प्रपद्ये॥
इंद्रनीलद्युतिः शूली सरथो गृध्रवाहनः। बाणबाणासनधरः स्मर्तव्योऽर्कसुतः सदा॥
इंद्रनीलनिभं मन्दं काश्यपिं चित्रभूषणम्। चापबाणधरं चर्मशूलिनं गृध्रवाहनम्॥
नीलांजन समाभासं रविपुत्रं यमाग्रजम्। छायामार्तण्ड संभूतं तं नमामि शनैश्चरम्॥ *(स्मृति सङ्ग्रह)*

ॐ शनैश्चराय नमः, अधिदेवता प्रत्यधिदेवता सहित शनैश्चर पूजां समर्पयामि।

राहु देवता आवाहनम्—मण्डलस्य नैऋत्यदले शूर्पाकार मण्डले माष धान्यस्थ राहुप्रतिमायां राहु आवाहनं कुर्यात्। पं पद्माय नमः पीठं संपूज्य।

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥ *(अथर्ववेद २०.१२४.१)*

ॐ पुण्यं पूर्वा फल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वाति सुखो मे अस्तु।
राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्ट मूलम् ॥ *(अथर्ववेद १९.७.३)*

मह्यं सकुटुम्बिनेमहाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्यकरिष्यमाणामुककर्मणः पुण्याहं भवंतो ब्रुवंत्विति त्रिर्वदेत्।
(यजमान अपने सकुटुम्ब प्रणाम करते हुए आज संपन्न होने वाले कर्म के लिए पुण्याह की याचना करते हुए तीन बार कहते हैं। जिसका प्रत्युत्तर ब्राह्मण

तीन बार देते हैं।)

१. ॐ पुण्याहं भवन्तो ब्रुवन्तु। ॐ अस्तु पुण्याहम्। २. ॐ पुण्याहं भवन्तो ब्रुवन्तु। ॐ अस्तु पुण्याहम्। ३. ॐ पुण्याहं भवन्तो ब्रुवन्तु। ॐ अस्तु पुण्याहम्।

ॐ वेदः स्वस्तिर्द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति।

हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम्॥ *(अथर्ववेद ७.२८.१)*

इसके बाद नीचे लिखा वाक्य का तीन बार यजमान कहें। एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्यक रिष्यमाणामुककर्मणः स्वस्ति भवन्तो ब्रुवन्तु। (ब्राह्मण कहते हैं)—ॐ आयुष्मते स्वत्ति। इन उपरोक्त वाक्यों को तीन बार दोहराना चाहिये। इसके बाद पुनः पहले जैसे उत्तर कलश से जल नीचे रखे बड़े पात्र में थोड़ा-थोड़ा कर गिराते हुए मंत्रपाठ करें।

ॐ ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा।

अदब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि॥ *(अथर्ववेद ५.१.१)*

इसके बाद पुनः नीचे लिखे वाक्यों को तीन बार यजमान कहें। एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्य करिष्यमाण अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।

(ब्राह्मण कहते हैं)—ॐ ऋध्यतां। इन उपरोक्त वाक्यों को तीन बार दोहराना चाहिये। इसके बाद मन्त्र पाठ करते हुए उत्तरकलश से नीचे रखे पात्र में जल छोड़ना चाहिये।

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः॥ *(अथर्ववेद ६.७३.१)*

इसके बाद पुनः नीचे लिखे वाक्यों को तीन बार यजमान कहें एवं ब्राह्मण प्रत्युत्तर दें। मह्यं सकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायाद्य करिष्यमाण अमुक कर्मणः श्रीरस्त्विति भवंतो ब्रुवन्तु। (ब्राह्मण कहते हैं)—ॐ अस्तु श्रीः। इन वाक्यों को तीन बार कहना चाहियें। वर्षशतं परि पूर्णमस्तु। गोत्राभिवृद्धिरस्तु। कर्माङ्ग देवता प्रीयताम्। (ब्राह्मण आशीर्वाद देते हैं—सौ साल पूर्ण हो। आप की वंश वृद्धि हो। कर्माङ्ग देवता आप पर प्रसन्न हो।)

मातृका पूजनम्—पान सुपारी दक्षिणा के ऊपर कूर्च (कुश से बना) रखकर उसमें मातृका आवाहन करके उनमें मातृका पूजन करना चाहिये। नान्दी मण्डल के आगे मातृका पूजन करना चाहिये।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णावी तथा। वाराही तथेन्द्राणी चामुण्डाः सप्तमातरः॥ *(ब्रह्मकर्म समुच्चय)*

सात मातृकायें।

गौरीपद्मा शचीमेधासावित्रीविजयाजया। देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ *(ब्रह्मकर्म समुच्चय)*

धृतिः पुष्टिस्तथातुष्टिरात्मनः कुलदेवताः (गौर्यादि षोडश मातृकायें)। ब्राह्म्यादि सप्त मातृः गौर्यादि षोडश मातृः आवाहयामि। विनायकं आवाहयामि। दुर्गा आवाहयामि। क्षेत्रपालं आवाहयामि। गणपतिं आवाहयामि। मातृस्वसारं आवाहयामि। पितृस्वसारं आवाहयामि। एताभ्यो देवताभ्यो नमः। ध्यायामि। ध्यानं समर्पयामि। इनका षोडशोपचार पूजन करना याहिये। **उदाहरण**—आवाहित देवताभ्यो नमः। आसनं समर्पयामि आदि। षोडशोपचार पूजन संक्षेप में करें। (गणेश पूजन में है।)

अन्त में पुष्पांजलि मन्त्र—ॐ देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।

याः पार्थिवासो या अपामपिं व्रते ता नों देवीः सुहवाः शर्मं यच्छन्तु ॥ *(अथर्ववेद ७.४६.१)*

ॐभूभुर्वः स्वः आवाहित देवताभ्यो नमः। मन्त्रपुष्पं समर्पयामि।

ॐ तदंस्तु मित्रावरुणा तदंग्ने शं योरस्मभ्यमिदमंस्तु शस्तम्।

अशीमहिं गाधमुत प्रंतिष्ठां नमों दिवे बृहते सादंनाय॥ *(अथर्ववेद १९.११.६)*

गृहावै सूक्तं, प्रतिवीतं तत्, प्रतिवीततमया वाचा शस्तव्यम्। स यद्यपि ह दूरात् पशूंल्लभते, गृहानेवैनानाजिगमिषति गृहाहिपशूनां प्रतिष्ठा।
(गो.ब्रा.) इन मन्त्रों को पढकर पुष्पाक्षत चढ़ायें।

मातृका पूजन समाप्तम्

आवाहित देवनान्दी पूजन—देवनान्दी में मातृका पूजन आवश्यक नहीं है। यज्ञ,(अतिरुद्र, सहस्रचण्डी) रथोत्सव आदि सार्वजनिक आचरणों में देवनान्दी ही करना चाहिये। **क्रतुदक्षावुत्सवे तु।** इस वाक्य से क्रतु एवं दक्ष नामक विश्वेदेव देवता हैं। देवनान्दी में पितृदेवता चार है। अमूर्त्य।

१. अग्निष्वात्ता, २. बर्हिषदः, ३. आज्यपाः, ४. सोमपाः

संकल्प—देशकालौ संकीर्त्य करिष्यमाण कर्माङ्ग भूतं नान्दीसमाराधनं करिष्ये। पहले दो मण्डल बनायें।

दत्वातण्डुलपूर्णपात्रयुगले संकल्प्य भुक्तिं तयोः।

ताम्बूलादि सुदक्षिणान्तिकमनुज्ञातः समुद्वाहयेत्॥ *(लक्षण संहिता)*

दो पात्रों में चावल, काजू किशमिश, फल, दाल, आदि दो मण्डलों पर रखें।

ॐ विश्वें देवा वसंवो रक्षंतेममुतादिंत्या जागृत यूयमस्मिन्।

मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः ॥ *(अथर्ववेद १.३०.१)*

ॐ क्रुतुदक्षसंज्ञका विश्वेदेदेवाः—नान्दीमुखाः उभाम्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूमुर्वस्वः इयं च वृद्धिः। इससे दुर्वा हाथ में रखकर उस पर से जल छोडें। अग्निष्वात्ताः पितृगणाः नान्दीमुखाः उभाम्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूभुर्वः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोड़ें।

बर्हिषदः पितृगणाः—नान्दीमुखाः उभाम्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोडें। **आज्यपाः पितृगणाः**—नान्दीमुखाः उभाम्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दुर्वा हाथ में रखकर उस पर से जल छोडें। **सोमपाः पितृगणाः** नान्दीमुखाः उभाम्यां ब्राह्मणाभ्यां इदं वः पाद्यं इदं नमः। भूर्भुवः स्वः इयं च वृद्धिः। इससे भी दूर्वा हाथ में रखकर उस पर से जल छोडें।

ॐ क्रतुदक्ष संज्ञका विश्वेदेवाः नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचार कल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दूर्वा हाथ में लेकर उस पर जल छोडें। **ॐ अग्निष्वात्ताः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणायोः इदं आसनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दूर्वा हाथ में लेकर उस पर जल छोडें। **बर्हिषदः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध अक्षत पुष्प दुर्वा हाथ में लेकर उस पर जल छोडें। **आज्यपाः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भुवः स्वः इयं च वृद्धिः। गन्ध, अक्षत, पुष्प, दुर्वा हाथ में लेकर उस पर जल छोडें। **सोमपाः पितृगणाः** नान्दीमुखाः उभयोः ब्राह्मणायोः इदमासनगंधाद्युपचारकल्पनं स्वाहा नमः। भूर्भूवः स्वः इयं च वृद्धिः। गन्ध, अक्षत, पुष्प, दुर्वा हाथ में लेकर उस पर जल छोडें। ॐभूर्भुवः स्वः सत्यं त्वर्तेन परिषिञ्चामि कहकर मराडल पर रखे दोनों पात्रों को परिषेचन कर दक्षिणादिशा के पात्र को "इदं

विश्वेभ्यो देवेभ्य:'' उत्तरदिशा के पात्र को ''इदं नान्दीमुख पितृभ्य:'' कहकर दान संकल्प कर ब्राह्मणों को दे देवें।

क्रतुदक्षसंज्ञका: विश्वेदेवा: नान्दीमुखा: युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नम:। भूर्भुव: स्व: इयं च वृद्धि:। कहकर ताम्बूल दक्षिणापर जल छोड़कर नीचे रखना चाहिये। **अग्निष्वात्ता: पितृगणा:** नान्दीमुखा: युग्म ब्राह्मण भोजन पर्याप्तं इदमामंसोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नम:। भूर्भुव: स्व: इयं च वृद्धि:। कहकर ताम्बूल दक्षिणापर जल छोडकर नीचे रखना चाहिये। **बर्हिषद: पितृगणा:** नान्दीमुखा: गुग्म ब्राह्मण भोजन पर्याप्तं दमनामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नम:। भूर्भुव: स्व: इयं च वृद्धि:। कहकर ताम्बूल दक्षिणापर जल छोड़कर नीचे रखना चाहिये। **आज्यपा: पितृगणा:** नान्दीमुखा युग्म ब्राह्मण भोजन पर्याप्तं इदमामंसोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नम:। भूर्भुव: स्व: इयं च वृद्धि:। कहकर ताम्बूल दक्षिणापर जल छोडकर नीचे रखना चाहिये।

सोमपा: पितृगणा: नान्दीमुखा: युग्म ब्राह्मण भोजन पर्याप्तं इदमामं सोपस्करं सताम्बूलं सदक्षिणाकं स्वाहा नम:। भूर्भुव: स्व: इयं च वृद्धि:। कहकर ताम्बूल दक्षिणा पर जल छोड़कर नीचे रखना चाहिये। आगे लिखे मन्त्रों से खड़े होकर उपस्थान करें।

एतद वै ब्रध्नस्यं विष्टपं यदोंदुन:

ब्रध्नलोंको भवति ब्रध्नस्यं विष्टपिं श्रयते य एवं वेदं

एतस्माद् वा ओंदुनात् त्रयंस्त्रिंशतं लोकान् निरंमिमीत प्रजापंति:

तेषां प्रज्ञानांय यज्ञमंसृजत

स य एवं विदुषं उपद्रष्टा भंवति प्राणं रुंणाद्धि

न च प्राणं रुणद्धि सर्वज्यानिं जीयते

न च सर्वज्यानिं जीयते पुरैनं जरसः प्राणो जहाति (अथर्ववेद ११.३.५०-५६)

कृतस्य देवनान्दी समाराधनस्य प्रतिठाफलसिद्ध्यर्थं द्राक्षामलक निष्क्रयिणीं दक्षिणां दातुमहमुत्सृये। कहकर हाथ में दक्षिणा लेकर उस पर जल छोडकर नीचे रख दें।

प्रार्थना—अग्निष्वात्वा बर्हिषदः आज्यपाः सोमपास्तथा। एते भवन्तु मे प्रीताः प्रयच्छन्तु च मङ्गलम्॥ कहकर जल छोड़ें। अनेन नान्दीसमाराधनेन नान्दीमुखदेवताः प्रीयंताम्। **आचम्य**—मंगल तिलक रकें। **विसर्जन**—यज्ञ के अन्तिम दिन विसर्जन करें।

ॐ इडायास्पदं घृतवत् सरीसृपं जातवेदः प्रति हव्या गृभाय।

ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु॥ (अथर्ववेद ६.७३.१)

यथाचारं हिरण्येन भाण्डवादनं। मन्त्र कहते हुए सिक्के से थाली के निचले भाग में शब्द करना चाहिये। (घण्टा वादन के बदले)

१. सर्वाद्भुत शान्ति याग के लिए-१—आचाय, एक कुण्ड में १-ब्रह्मा, ईशान्य में १-कलश पूजन, होमाङ्ग पूजन दक्षिण में १-इतर पूजन, पश्चिम में १-तर्पण के लिए, परिचारक (कर्मचारी) १-एक ब्राह्मण-कुल ५ पंण्डित रहने पर

१५ पण्डित से संपन्न कर्म में—२-१५ पण्डित कर्म में (एक कुण्ड में), २-१५ पण्डित से संपन्न याग में—१ आचार्य, १ ब्रह्मा, १-कलश पूजन, १-इतर पूजन, १-तर्पण पूजन, १-परिचारक ब्राह्मण, ९-ऋत्विज होम के लिए

३-५५ पण्डित से संपन्न याग में—१- आचार्य (५ कुण्ड में), १-ब्रह्मा, १-कलश पूजन, १-इतर पूजन, १-तर्पण के लिए, १-परिचारक ब्राह्मण, ४५-

ऋत्विज होम के लिए, ४-अग्निमुख जानकार उप आचार्य (९×५)

४-१०० पण्डित से संपन्न या में—१-आचार्य (९ कुण्ड में), १-ब्रह्मा, १-कलश पूजन, १-इतर पूजन, १-तर्पण के लिए, ५-परिचारक ब्राह्मण, ८१-ऋत्विज होम के लिए, ९-अग्निमुख जानकार उपआचार्य (९×९), इसी अनुपात में अधिक संख्या में कर सकते हैं।

ॐ उत्तिष्ठब्रह्मणस्पते देवान् यज्ञेन बोधय।

आयुः प्राणं प्रजां पशून् कीर्तिं यजमानं च वर्धय॥ *(अथर्ववेद १९.६३.१)*

यान्तु देवगणाः सर्वे पूजामादाय मत्कृताम्। इष्टकामार्थसिद्ध्यर्थं पुनरागमनाय च॥ *(ब्रह्मकर्म समुच्चय)*

(इन मन्त्रों से आवाहित देवताओं को उठाना चाहिये।)

देवनान्दी समाप्त

ब्राह्मण वन्दन— **ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यो भवत्।**

मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ *(अथर्ववेद १९.६.६)*

इस मन्त्र से ब्राह्मण पूजा करें। ''करिष्यमाण कर्मणः आरम्भमुहूर्तः सुमुहुर्तो अस्तु इति अनुगृणहन्तु''। यजमान पूछते है॥ ''सुमुहूर्तमस्तु''।

सर्वतोभद्र मण्डल पूजनम्—मध्ये ब्रह्माणं, (मध्य में ब्रह्मा का आवाहन करें।)।

ॐ ब्रह्म जज्ञानं प्रथमं पुरताद् वि सीमतः सुरुचो वेन आवः।

स बुध्न्यां उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः॥ *(अथर्ववेद ४.१.१)*

ॐभूर्भुवः स्वः ब्रह्मणे नमः। ब्रह्माणमावाहयामि। भो ब्रह्मन् इहागच्छ। इह तिष्ठ। पूजां गृहाण। वरदो भव। **उत्तरे सोमं—**(उत्तर में सोम का आवाहन

करें।)

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ (अथर्ववेद २०.१३७.४)

ॐभूर्भुवः स्वः सोमय नमः। सोमं आवाहयामि। भो सोम इहा गच्छ। इह तिष्ठ। पूजां गृहाण। वरदो भव। **ईशान्यं ईशानं**—(ईशान्य दिशा में ईशन का आवाहन करें।)

ॐ ईशानां त्वा भेषजानामुज्जेष आ रंभामहे। चक्रे सहस्रवीर्यं सर्वस्मा ओषधे त्वा॥ (अथर्ववेद ४.१७.१)

ॐभूर्भुवः स्वः ईशानाय नमः। ईशानमावाहयामि। भो ईशान इहा गच्छ। इह तिष्ठ। पूजा गृहाण वरदो भव। **पूर्वे इन्द्रं**—(पूर्व में इन्द्र का आवाहन करें।)

ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्॥
हुवे नु शक्रं पुरुहूतमिन्द्रं स्वस्ति न इन्द्रो मघवान् कृणोतु॥ (अथर्ववेद ७.८६.१)

ॐभूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि। भो इन्द्र इहा गच्छ। इह तिष्ठ पूजां गृहाण। वरदो भव॥ **आग्नेयामग्निं**—(आग्ने दिशा में अग्नि का आवाहन करें।)

ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुं॥ (अथर्ववेद २०.१०१.१)

ॐभूर्भुवः स्वः। अग्नेय नमः। अग्निमावाहयामि। भो अग्ने इहा गच्छ इह तिष्ठ। पूजां गृहाण। वरणो भव। **दक्षिणे यमं**—(दक्षिण दिशा में यम का आवाहन करें।)

ॐ यमाय सोमः पवते यमाय क्रियते हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥ (अथर्ववेद १८.२.१)

ॐभूर्भुवः स्वः यमाय नमः। यममावाहयामि। भो यम इहा गच्छ। इह तिष्ठ। पूजां गृहाण। वरदो भव। **नैऋत्यां निऋतिं**—(नैऋत्य दिशा में निऋति को।)

ॐ यत् तें देवी निर्ऋतिराबुबन्ध दामं ग्रीवास्वंविमोक्यं यत्।
तत् ते वि ष्याम्यायुषे वर्चसे बलांयादोमुदमन्नंमद्धि प्रसूंतः॥ *(अथर्ववेद ६.६३.१)*

ॐभूर्भुवः स्वः निर्ऋतये नमः। निर्ऋतिमावाहयामि। भो निऋति इहा गच्छ। इह तिष्ठ। पूहां गृहाण। वरदो भव। **पश्चिमे वरुणं**—(पश्चिम दिशा में वरुण का आवाहन करें।)

ॐ अप्सु तें राजन् वरुण गृहो हिंरण्ययों मिथः। ततों धृतव्रंतो राजा सर्वा धामांनि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*

ॐभूर्भुवः स्वः वरुणाय नमः। वरुणमावाहयामि। भो वरुण इहागच्छ। इह तिष्ठ। पूजां गृहाण। वरदो भव। **वायव्यां वायुं**—(वायव्य दिशा में वायु का आवाहन करें।)

ॐ गोसनिं वाचंमुदेयं वर्चसा माभ्युदिंहि। आ रुन्धां सर्वतों वायुस्त्वष्टा पोषं दधातु मे॥ *(अथर्ववेद ४.२०.१०)*

ॐभूर्भुवः स्वः वायवे नमः। वायुमावाहयामि। भो वायो इहा गच्छ। इह तिष्ठ। पूहां गृहाण। वरदो भव। **वायुसोममध्ये अष्टवसून्**—वायु एवं सोम के बीच में अष्ठ वसुओं को (वायव्य एवं उत्तर के बीच में)

ॐ अस्मिन् वसु वसंवो धारयन्त्विन्द्रः पूषा वरुंणो मित्रो अग्निः।
इममांदित्या उत विश्वें च देवा उत्तंरस्मिन् ज्योतिंषि धारयन्तु॥ *(अथर्ववेद १.९.१)*

ॐभूर्भुवः स्वः अष्टवसुभ्यो नमः। अष्टवसून् आवाहयामि। भो अष्टवसवः इहा गच्छ। इह तिष्ठतः। पूजां गृहाण। वरदो भवत। **सोमेशानयोर्मध्ये एकादशरुद्रान्**—(सोमन एवं ईशान के बीच में एकादश रुद्रों का आवाहन करें।) (उत्तर एवं ईशान के बीच में)

ॐ रुद्रस्यैलबकारेभ्योऽसंसूक्तगिलेभ्यंः। इदं महास्येभ्यः श्वभ्यों अकरं नमंः॥ *(अथर्ववेद ११.२.३०)*

ॐ भूर्भुवः स्वः एकादशरुद्रेभ्यो नमः। एकादश रुद्रानावाहयामि। भो एकादशरुद्राः इहा गच्छत। इह तिष्ठत। पूजां गृषीत। वरदा भवत। **ईशानेन्द्रयोर्मध्ये द्वादशादित्यान्**—(ईशान्य एवं पूर्व के बीच में द्वादशादित्यों का आवाहन करें।)

ॐ उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्ददत्रिः॥ *(अथर्ववेद १३.२.३६)*

ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः। द्वादशादित्यानावाहयामि। भो द्वादशादित्याः इहा गच्छत। इह तिष्ठत। पूजां गृह्णीत। वरदो भवत। **इन्द्राग्निमध्ये अश्विनौ**—(पूर्वा एवं आग्नेय के बीच में अश्विनी देवताओं को आवाहन करें।)

ॐ यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना *(अथर्ववेद २०.१३९.२)*

ॐ भूर्भुवः स्वः अश्विभ्यां नमः। अश्विनौ आवाहयामि। भो अश्विनौ इहा गच्छतं। इह तिष्ठतं पूजां गृषीतं। वरदौ भवतं। **अग्नियम मध्ये विश्वेदेवान् सपैतृकान्**—(आग्नेय एवं दक्षिण के बीच में पितृसाहित विश्वेदेवों का आवाहन करें।)

ॐ विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन्।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः॥ *(अथर्ववेद १.३०.१)*

ॐ भूर्भुवः स्वः विश्वेभ्योदेवेभ्यो नमः विश्वान् देवान् आवाहयामि। भो विश्वेदेवाः इहा गच्छत। इह तिष्ठंत पूजां गृह्णीत। वरदा भवत। **यम निर्ऋतिमध्ये सप्तयक्षान्**—(दक्षिण एवं नैऋत्य के बीच में सप्त यक्षों का आवाहन करें।)

ॐ देवान् यन्नाथितो हुवे ब्रह्मचर्यं यदूषिम। अक्षान् यद् बभ्रूनालभे ते नो मृडन्त्वीदृशे॥ *(अथर्ववेद ७.१०९.७)*

ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः सप्तयक्षान् आवाहयामि। भो सप्तयक्षाः इहा गच्छत। इह तिष्ठत पूजां गृह्णीत। वरदा भवत। **निर्ऋति वरुण मध्ये**

भूतनागान्—(नैऋत्य एवं पश्चिम के बीच में भुतगण एवं नागों का आवाहन करें।)

ॐ अरायान् ब्रूमो रक्षांसि सर्पान् पुण्यजनान् पितॄन्। मृत्यूनेकशतं ब्रूमस्ते नो मुञ्चन्त्वंहसः॥ *(अथर्ववेद ११.६.१६)*

ॐभूर्भुवः स्वः सर्पेभ्यो नमः। सर्पान् आवाहयामि। भो सर्पाः इहागच्छत। इह तिष्ठत पूजां गृह्णीत। वरदा भवत। **वरुणवायुमध्ये गंधर्वाप्सरसः**—(पश्चिम एवं वायव्य के बीच में गन्धर्व एवं अप्सराओं का आवाहन करें।)

ॐ तं पुण्यं गन्धं गंन्धर्वाप्सरस उप जीवन्ति पुण्यंगन्धिरुपजीवनीयो भवति य एवं वेद॥ *(अथर्ववेद ८.१०-५.८)*

ॐभूर्भुवः स्वः गन्धर्वाप्सरोभ्यो नमः। गन्धर्वाप्सिरस आवाहयामि। भो गन्धवाप्सरसः इहा गच्छत। इह तिष्ठत पूजां गृह्णीत। वरदा भवत।

ब्रह्म सोममध्ये स्कन्दं नन्दीश्वरं शूलं महाकालं च- (मध्ये में स्थित ब्रह्मा एवं सोम (उत्तर) के मध्य में स्कन्द नन्दीश्वर शूल एवं महाकाल का आवाहन करें।)

ॐ यन्मे स्कन्नं मनसो जातवेदो यद्वास्कन्दद्धविषो यत्रयत्र।
उत्प्रुषो विप्रुषः सं जुहोमि सत्याः सन्तु यजमानस्य कामाः॥ *(कौशिक सूत्र ६.१)*

ॐभूर्भुवः स्वः स्कन्दाय नमः। स्कन्दमावाहयामि। भो स्कन्द इहा गच्छ। इह तिष्ठ पूजां गृहाण। वरदो भव।

ॐ सहस्रशृङ्गो वृषभो यः संमुद्रादुदाचरत्। तेना सहस्येना वयं नि जनान्त्स्वापयामसि॥ *(अथर्ववेद ४.५.१)*

ॐभूर्भुवः स्वः नन्दीश्वराय नमः नन्दीश्वरं आवाहयामि। भो नंदीश्वर इहा गच्छ। इह तिष्ठ पूजां गृहाण। वरदो भव।

ॐ यां ते रुद्र इषुमस्यदङ्गेभ्यो हृदयाय च। इदं तामद्य त्वद् वयं विषूचीं वि वृहामसि॥ *(अथर्ववेद ६.९०.१)*

ॐभूर्भुवः स्वः शूलायनमः शूलमावाहयामि। भो शूल इहा गच्छ। इह तिष्ठ पूहां गृहाण। वरदो भव।

ॐ कालेन वातः पवते कालेन पृथिवी मही। द्यौर्मही काल आहिता॥ *(अथर्ववेद १९.५४.२)*

ॐ भूर्भुवः स्वः महाकालाय नमः। महाकालमावाहयामि। भो महाकाल इहा गच्छ। इह तिष्ठ पूहां गृहाण। वरदो भव। **ब्रह्मेशानमध्ये दक्षं**—(बीच में विद्यमान ब्रह्मा एवं ईशान्य दिशा के बीच में दक्ष का आवाहन करें।)

ॐ आशीर्णा ऊर्जमुत सौप्रजास्त्वं दक्षं धत्तं द्रविणं सचेतसौ।
जयं क्षेत्राणि सहसायमिन्द्र कृण्वानो अन्यानधरान्त्सपत्नान्॥ *(अथर्ववेद २.२९.३)*

ॐ भूर्भुवः स्वः दक्षाय नमः। दक्षमावाहयामि। भो दक्ष इहा गच्छ। इह तिष्ठ पूजां गृहाण। वरदो भव। ब्रह्मेन्द्रमध्ये दुर्गां विष्णुं च (ब्रह्मा एवं इन्द्र के बीच में अर्थात् बीच में स्थित ब्रह्मा एवं पूर्व के बीच में दुर्गा एवं विष्णु का आवाहन करें।)

ॐ तामग्निवर्णां तपसाज्वलन्तीं वैरोचनीं कर्मफलेषुजुष्टाम्।
दुर्गां देवीं शरणमहंप्रपद्ये सुतरसितरसे नमः॥ *(यजुर्वेद-दुर्गासूक्त)*

ॐ भूर्भुवः स्वः दुर्गायै नमः। दुर्गां आवाहयामि। भो दुर्गे इहा गच्छ। इह तिष्ठ। पूजां गृहाण। वरदा भव।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे॥ *(अथर्ववेद ६.२६.४)*

ॐ भूर्भुवः स्वः विष्णवेनमः। विष्णुं आवाहयामि। भो विष्णो इहा गच्छ। इह तिष्ठ। पूहां गृहाण। वरदो भव। ग्रह्माग्नि मध्ये स्वधां (बीच में स्थित ब्रह्मा एवं आग्नेय दिशा के बीच में स्वधा को)

ॐ एतत् ते प्रततामह स्वधा ये च त्वामनु *(अथर्ववेद १८.४.७५)*

ॐ भूर्भुवः वः स्वधायै नमः। स्वधामावाहयामि। भो स्वधे इहा गच्छ। इह तिष्ठ पूजां गृहाण। वरदा भव। **ब्रह्म यममध्ये मृत्युरोगान्**—(बीच में स्थित ब्रह्मा

एवं दक्षिण दिशा के बीच में मृत्यु एवं रोगों का आवाहन करें।)

ॐ परं मृत्यो अनु परेहि पन्थां यस्त एष इतरो देवयानात्।

चक्षुष्मते शृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु॥ *(अथर्ववेद १२.२.२१)*

ॐभूर्भुवः स्वः मृत्युरोगेभ्यो नमः। मृत्यरोगान् आवाहयामि। भो मृत्युरोगाः इहा गच्छत। इह तिष्ठत। पूजां गृषीत। वरदा भवत। ब्रह्म निर्ऋतिमध्ये गणपतिं (बीच में स्थित ब्रह्मा एवं नैर्ऋत्य दिशा के बीच में गणपति का आवाहन करें।)

ॐ इमा या ब्रह्मणस्पते विषूचीर्वात ईरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि

स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु॥ *(अथर्ववेद १९.८.६)*

ॐभूर्भुवः स्वः गणपतये नमः। गणपतिमावाहयामि। भो गणपति इहा गच्छ। इह तिष्ठ। पूजां गृहाण। वरदो भव। **ब्रह्मवरुणमध्ये अपः**—(बीच में स्थित ब्रह्मा एवं पश्चिम दिशा के बीच में जल का आवाहन करें।)

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः॥ *(अथर्ववेद १.६.१)*

ॐभूर्भुवः स्वः अद्भयो नमः। अपः आवाहयामि। भो आपः इहा गच्छत। इह तिष्ठत। पूजां गृह्णीत। वरदा भवत। **ब्रह्मवायुमध्ये मरुतः**—(बीच में स्थित ब्रह्मा एवं वायव्य दिशा के बीच में मरुत् का आवाहन करें।)

ॐ मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः॥ *(अथर्ववेद २०.१.२)*

ॐभूर्भुवः स्वः मरुद्भयो नमः। मरुतः आवाहयामि। भो मरुतः इहा गच्छत। इह तिष्ठत। पूजां गृह्णीत। वरदा भवत। ब्रह्मणः पादमूले कर्णिकाधः पृथिवीं

(बीच में स्थित ब्रह्मा जी के नीचे पादमूल में पृथिवी का आवाहन करें।)

ॐ स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः॥ (अथर्ववेद १८.२.१९)

ॐभूर्भुवः स्वः भूम्यै नमः। भूमिं आवाहयामि। भो भूमे इहा गच्छा। इह तिष्ठ। पूजां गृहाण। वरदा भव। **तत्रैव गङ्गादिसर्वनद्यः**—(उसी स्थान पर अर्थात पृथिवी पर ही गङ्गादि सभी नदियों का आवाहन करें।)

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ (अथर्ववेद ७.८३.१)

ॐभूर्भुवः स्वः गङ्गादि नदीभ्यो नमः। गङ्गादि नदीः आवाहयामि। भो गङ्गादिनद्यः इहागच्छत। इह तिष्ठत। पूजां गृह्णीत। वरदा भवत। तत्रैव सप्तसागराः। (वहीं पर सात सागरों का आवाहन करें।)

ॐ समुद्रो नदीभिरुदक्रामत् तां पुरं प्र णयामि वः।
तामा विंशत तां प्र विंशत सा वः शर्म च वर्म यच्छतु॥ (अथर्ववेद १९.१९.७)

ॐभूर्भुवः स्वः सप्तसागरेभ्यो नमः। भो सप्तसागराः इहागच्छत। इह तिष्ठतः। पूहां गृह्णीत। वरदा भवत। तदुपरि मेरवे नमः। **मेरुं आवाहयामि।** (उसके ऊपर मेरु पर्वत का आवाहन करें।) (भूमि पर) सोमसमीपे गदायै नमः। **गदां आवाहयामि।** (सोम के पास (उत्तर) गदा का आवाहन करें।) ईशान समीपेत्रिशूलाय नमः। **त्रिशूलं आवाहयामि।।** (ईशान के पास ईशान में त्रिशूल का आवाहन करें।) इन्द्रसमीपे वज्राय नमः। **वज्रं आवाहयामि।** (इन्द्र के पास पूर्व में वज्र का आवाहन करें।) अग्नि समीपे शक्तये नमः। **शक्तिं आवाहयामि।** (अग्नि के पास आग्नेय में शक्ति का आवाहन करें।) यम समीपे दण्डाय नमः। **दण्डं आवाहयामि।** (यम के पास दक्षिण में दण्ड का आवाहन करें।) निर्ऋति समीपे खड्गय नमः। **खड्गमावाहयामि।** (निर्ऋति के पास नैर्ऋत्य के खड्ग का आवाहन करें।) वरुण समीपे पाशाय नमः। **पाशं आवाहयामि।** (वरुण के पास पश्चिम में पाश का आवाहन करें।) वायु समीपे

अंकुशाय नमः। **अंकुशं आवाहयामि।** (वायु के पास वायव्य दिशा में अंकुश का आवाहन करें।)

तद्बाहये उत्तरादि क्रमेण (मण्डल के बाहर) गौतमाय नमः। **गौतमं आवाहयामि।** (उत्तर में गौतम जी का आवाहन करें।) भारद्वाजाय नमः। **भरद्वाजं आवाहयामि।** (ईशान में भरद्वाज जी का आवाहन करें।) विश्वामित्राय नमः। **विश्वामित्रं आवाहयामि।** (पूर्व में विश्वामित्र जी का आवाहन करें।) कश्यपाय नमः। **कश्यपं आवाहयामि।** (आग्नेय में अश्यप जी का आवाहन करें।) जमदग्नये नमः। **जमदग्निं आवाहयामि।** (दक्षिण में जमदग्नि जी का आवाहन करें।) वसिष्ठाय नमः। **वसिष्ठं आवाहयामि।** (नैर्ऋत्य में वसिष्ठ जी का आवाहन करें।) अत्रये नमः। **अत्रिं आवाहयामि।** (पश्चिम में अत्रि जी का आवाहन करें।) अरुंधत्यै नमः। **अरुंधतीं आवाहयामि।** (वायव्ये में अरुंधति जी का आवाहन करें।) ततः पूर्वादि क्रमेण मातृः। (पूर्वादि क्रम से मण्डल के बाहर मातृगणों का आवाहन करें।) ऐंद्र्यै नमः। **ऐन्द्रीं आवाहयामि।** (पूर्व में ऐन्द्री का आवाहन करें।) कौमार्यै नमः। **कौमारीं आवाहयामि।** (आग्नेय में कौमारी का आवाहन करें।) ब्राह्यै नमः। **ब्राह्मीं आवाहयामि।** (दक्षिण में ब्राह्मी का आवाहन करें।) वाराह्यै नमः। **वाराहीं आवाहयामि।** (नैऋत्य में वाराही का आवाहन करें।) चामुण्डायै नमः। **चामुण्डां आवाहयामि।** (पश्चिम में चामुण्डा का आवाहन करें।) वैष्णाव्यै नमः। **वैष्णावीं आवाहयामि।** (वायव्य में वैष्णावी का आवाहन करें।) वैनायक्यै नमः। **वैनायकीं आवाहयामि।** (ईशान्य में वैनायकी का आवाहन करें।) इति सर्वतो भद्र देवताः। (यहाँ पर सर्वतोभद्रमण्डल में विद्यमान सभी देवताओं का आवाहन संपन्न हुआ।)

ॐ तदंस्तु मित्रावरुणा तदंग्ने शं योरस्मभ्यंमिदमंस्तु शस्तम्।
अशीमहिं गाधमुत प्रतिष्ठां नमों दिवे बृंहते सादंनाय॥ *(अथर्ववेद १९.११.६)*

गृहावै सूक्तं, प्रतिवीतं तत्, प्रतिवीततमया वाचा शस्तव्यम्। स यद्यपित दूरात् पशूंल्लभते, गृहानेवैनानाजिगमिषति गृहाहिपशूनां प्रतिष्ठा। *(गो.ब्रा.)*

ॐ ब्रह्मं जज्ञानं प्रंथमं पुरस्तांद् वि सीमतः सुरुचों वेन आंवः।

स बुध्न्यां उपमा अस्य विष्ठाः सतश्च योनिमसंतश्च वि वः ॥ (अथर्ववेद ४.१.१)

एताः ब्रह्मादि देवताः सुप्रतिष्ठिताः सन्तु। (इन मन्त्रों को कहकर आवाहित ब्रह्मादि देवताओं का प्रतिष्ठा करें।)

अनेन मंत्रेण पूजयेत्। (इस मन्त्र से पूजन करें।) ॐ ब्रह्मादि देवताभ्यो नमः। ध्यायामि। ध्यानं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। आवाहयामि। आसनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। स्वागतं। पादारविन्दयोःपाद्यं पाद्यं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। हस्तयोः अर्घ्यं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। मुखे आचमनीयं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ आपो हि ष्ठा मयोभुवस्ता नं ऊर्जे दधातन। महे रणाय चक्षसे ॥ (अथर्ववेद १.५.१)

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ (अथर्ववेद १.५.२)

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ (अथर्ववेद १.५.३)

स्नानं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। स्नानाङ्ग आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उं ॥ (अथर्ववेद २.१३.२)

वस्त्रयुग्मं समर्पयामि। वस्त्राङ्ग आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहज पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ (ऋग्वेद)

यज्ञोपवीतं समर्पयामि। ॐब्रह्मादि देवताभ्यो नमः।

ॐ यद्धिरंरायं सूर्येश सुवर्णं प्रजावंन्तो मनंवः पूर्वं ईषिरे।
तत् त्वां चन्द्रं वर्चसा सं सृजत्यायुंष्मान् भवति यो बिभर्ति॥ *(अथर्ववेद १९.२६.२)*

आभरणं समर्पयामि। ॐब्रह्मादि देवताभ्यो नमः।

ॐ गन्धं द्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपंह्वये श्रियम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

गन्धं समर्पयामि। ॐब्रह्मादि देवताभ्यो नमः।

ॐ अर्चंत प्रार्चंत प्रियंमेधासो अर्चंत। अर्चन्तु पुत्रका उत पुरं न धृष्णवर्चत॥ *(अथर्ववेद २०.९२.५)*

अक्षतान् समर्पयामि। ॐब्रह्मादि देवताभ्यो नमः।

ॐ आयंने ते परांयणे दूर्वारोहन्तु पुष्पिणीः।
उत्सों वा तत्र जायंतां ह्रदो वां पुण्डरींकवान्॥ *(अथर्ववेद ६.१०६.१)*

नाम पूजां करिष्ये—ॐब्रह्मणे नमः। ॐसोमाय नमः। ॐईशानाय नमः। ॐइन्द्राय नमः। ॐअग्नेय नमः। ॐयमाय नमः। ॐनिर्ऋतये नमः। ॐवरुणाय नमः। ॐवायवे नमः। ॐअष्टवसुभ्यो नमः। ॐएकादश रुद्रेभ्यो नमः। ॐद्वादशादित्येभ्यो नमः। ॐअश्विभ्यां नमः। ॐविश्वेभ्यो देवेभ्यो नमः। ॐसप्तयक्षेभ्यो नमः। ॐभूतनागेभ्यो नमः। ॐगंधर्वाप्सरोभ्यो नमः। ॐस्कन्दाय नमः। ॐनन्दीश्वराय नमः। ॐशूलाय नमः। ॐमहाकालाय नमः। ॐदुर्गायै नमः। ॐविष्णवे नमः। ॐस्वधायै नमः। ॐमृत्युरोगेभ्यो नमः। ॐगणपतये नमः। ॐअद्भ्यो नमः। ॐमरुद्भयो नमः। ॐपृथिव्यै नमः। ॐगङ्गादि सर्वनदीभ्यो नमः। ॐसप्त सागरेभ्यो नमः। ॐमेरवे नमः। ॐगदायै नमः। ॐत्रिशूलाय नमः। ॐवज्राय नमः। ॐशक्तये नमः। ॐदण्डाय नमः। ॐखड्गाय नमः। ॐपाशाय नमः।

ॐ अंकुशाय नमः। ॐ गौतमाय नमः। ॐ भरद्वाजाय नमः। ॐ विश्वामित्राय नमः। ॐ कश्यपाय नमः। ॐ जमदग्नये नमः। ॐ वसिष्ठाय नमः। ॐ अत्रये नमः। ॐ अरुन्धत्यै नमः। ॐ ऐन्द्र्यै नमः। ॐ कौमार्यै नमः। ॐ ब्राह्मै नमः। ॐ वाराह्यै नमः। ॐ चामुण्डायै नमः। ॐ वैष्णव्यै नमः। ॐ माहेश्वर्यै नमः। ॐ वैनायक्यै नमः। (देवताओं के ५७ समूह।) नाम पूजां समर्पयामि। (ये सभी देवता सर्वतो भद्र मण्डल से आवाहित हैं।) ॐ ब्रह्मादि देवताभ्यो नमः।

वनस्पति रसोत्पन्नो गन्धाढयः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥ धूपं आघ्रापयामि। *(प्रयोगरत्नाकर)*

ॐ ब्रह्मादि देवताभ्यो नमः।

आज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥ *(ब्रह्मकर्म समुच्चय)*

दीपं दर्शयामि धूपदीपानन्तरं आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। (नैवेद्य को गायत्री मन्त्र से प्रोक्षण करें नैवेद्य मण्डल पर रखें। **सत्यं त्वर्तेन परिषिञ्चामि**। इस मन्त्र से परिषिञ्चन करें।) **अमृतोपस्तरणमसि** कहकर जल छोड़ें। ॐ प्राणाय स्वाहा (अङ्गुष्ठ एवं कनिष्ठिका मिलाकर) ॐ अपानाय स्वाहा (अङ्गुष्ठ एवं तर्जनी मिलाकर) ॐ व्यानाय स्वाहा (अङ्गुष्ठ एवं मध्यमा मिलाकर) ॐ उदानाय स्वाहा (अङ्गुष्ठ एवं अनामिका मिलाकर) ॐ समानाय स्वाहा (सभी अङ्गुलियों को मिलाकर) ॐ देवेभ्यः स्वाहा नैवेद्यं निवेदयामि। **अमृतापिधानमसि** कहकर जल छोड़ें। नैवेद्यं विसर्जयामि। हस्तप्रक्षालनं समर्पयामि। गण्डूषं समर्पयामि। पुनराचमनं समर्पयामि। (कहकर जल छोड़ें) ॐ ब्रह्मादि देवताभ्यो नमः।

पूगीफल समायुक्तं नागवल्ल्यादलैर्युतम्। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यतां। क्रमुक ताम्बूलं समर्पयामि। *(देवपूजा)*

ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ एह यांतु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यांतु।
अस्य श्रियमुपसंयांत सर्वे उग्रस्य चेत्तुः संमनसः सजाताः॥ *(अथर्ववेद ६.७३.१)*

मङ्गलनीराजनं समर्पयामि। नीराजनान्ते परिमल पत्र पुष्पाणि समर्पयामि। मन्त्रपुष्पं समर्पयामि। प्रदक्षिणां समर्पयामि। नमस्कारान् समर्पयामि।

देवाराधनमण्डलं सुरगणावासं सदामङ्गलं। कुर्तुः दर्शनमात्रतः शुभकरं तत् पञ्च भूतात्मकं॥
अर्णाद्यक्षरसंयुतं भयहरं तद् याग पुण्यार्जितं। नानामन्त्रमयं समस्त फलदं ध्यायेन्मनोनन्दनं॥
अरिष्टानि बहून्यस्मिन् दुष्कृतानि शतानि च। मण्डलानि निरीक्षन्ते यथा युद्धेषु कातराः॥ *(अनुष्ठान पद्धति)*

(युद्ध भूमि में कायर जैसे देखते ही भीत हो जाते हैं, वैसे ही मण्डल को देखते ही सभी अरिष्ट दूर हो जाते हैं।) **अनया पूजया ब्रह्मादि मण्डल देवताः प्रीयन्तां** यहाँ पर सर्वतोभद्र मण्डल पूजन संपन्न हुआ।

प्रधान देवता महाविष्णु षोडशोपचार पूजन

ध्यानम्—(पुष्प हाथ में लेकर ध्यान करें) **विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।**
अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥ ॐ नमो नारायणाय।

आवाहन—ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ (अथर्ववेद १९.६.१)
ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

सपरिवार श्री महाविष्णवे नमः, आवाहयामि आवाहनं समर्पयामि।

आसनम्—ॐ त्रिभिः पद्भिर्द्यामरोहत्पादस्येहाभवत्पुनः। तथा व्यक्रामद्विष्वङशनानशने अनु॥ *(अथर्ववेद १९.६.२)*
ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । आसनं समर्पयामि।

पाद्यम्— ॐ तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ (अथर्ववेद १९.६.३)

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

अर्घ्यं— ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह ॥ (अथर्ववेद १९.६.४)

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहो पह्वये श्रियम् ॥ (पञ्चम मण्डलस्य परिशिष्टम्) ॐ सपरिवाराय श्री महाविष्णावे नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

आचमनम्— ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते ॥ (अथर्ववेद १९.६.५)

ॐ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टा मुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

सपरिवाराय श्री महाविष्णावे नमः, । मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् (दूध)— ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।

संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ॥ (अथर्ववेद २.२६.४)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । पयः स्नानं समर्पयामि।

शुद्ध जल— ॐ स॒द्योजा॒तं प्र॑पद्या॒मि स॒द्योजा॒ताय॒ वै नमो॒ नमः॑।
भ॒वे भ॑वे॒नाति॑ भ॒वे भवस्व॒माम् भ॒वोद्भ॑वाय॒ नमः॑॥ (यजुर्वेद-महानारायणोपनिषत् आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं समर्पयामि

दहि— ॐ द॒धि॒क्राव्णो॑ अकारिषं जि॒ष्णोरश्व॑स्यवा॒जिनः॑। सु॒रभि नो॒ मुखा॑ कर॒त्प्र ण॒ आयूं॑षि तारिषत्॥ (अथर्ववेद २०.१३७.३)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। दधि स्नानं समर्पयामि।

शुद्ध जल— ॐ वा॒म॒दे॒वाय॒ नमो॑ ज्ये॒ष्ठाय॒ नमः॑श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नमः॑ काला॑य॒ नम॒ःकाल॑विकरणाय॒
नमो॒बला॑य नमो॒ बल॑प्रमथनाय॒ नम॒स्सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नमः॑। (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं सपर्मयामि।

घी— ॐ घृ॒तं ते॑ अग्ने दि॒व्ये स॒धस्थे॑ घृ॒तेन॒ त्वां मनु॑र॒द्या समि॑न्धे।
घृ॒तं ते॑ दे॒वीर्न॒प्त्य॑ आ व॑हन्तु घृ॒तं तुभ्यँ॑ दुह्र॒तां॒ गावो॑ अग्ने॥ (अथर्ववेद ७.८२.६)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। घृतस्नानं समर्पयामि।

शुद्ध जल— ॐ अ॒घोरे॑भ्योऽथ॒ घोरे॑भ्यो॒ घोर॒घोर॑ तरेभ्यः।
सर्वे॑भ्यः सर्व॒शर्वे॑भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं समर्पयामि।

मधु (शहद)—ॐ मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद ॥ *(अथर्ववेद ६.१.२३)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । मधु स्नानं समर्पयामि।

शुद्ध जल—ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥ *(यजुर्वेद-महानारायणोपनिषत्-आरण्यक)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं सपर्पयामि।

शर्करा (शक्कर)—ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ *(अथर्ववेद ५.२.३)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । शर्करा स्नानं समर्पयामि।

शुद्ध जन—ॐ ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो
अधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ *(यजुर्वेद-महानारायणोपनिषत्-आरण्यक)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि।

फल— ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये ॥ *(अथर्ववेद ८.७.२७)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । फल स्नानं समर्पयामि।

शुद्धोदक—ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥ *(अथर्ववेद १.५.१)*
ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ *(अथर्ववेद १.५.२)*
ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ *(अथर्ववेद १.५.३)*

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यो भवत्। मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ (अथर्ववेद १९.६.६)

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।

तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च ब्राह्या अलक्ष्मीः। (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं समर्पयामि।

वस्त्र— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ (अथर्ववेद १९.६.७)

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। वस्त्रं समर्पयामि।

यज्ञोपवीतं—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ क्षुत् पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। यज्ञोपवीतं समर्पयामि।

आभरण—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।

तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

ॐसपरिवाराय श्री महाविष्णावे नमः, । आभरणं समर्पयामि।

गन्ध— **ॐ गंधं द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥** (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नाभ्यां आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ (अथर्ववेद १९.६.८)

ॐसपरिवाराय श्री महाविष्णावे नमः, । गन्धं समर्पयामि।

अक्षत—ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ (अथर्ववेद २०.९२.५)

ॐसपरिवाराय श्री महाविष्णावे नमः, । अक्षतान् समर्पयामि।

पुष्पाणि—ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये॥ (अथर्ववेद ८.७.२७)

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः, । पुष्पाणि समर्पयामि।

प्रथमावरण पूजनम्—पूर्वादिक्रमेण ॐविमलायै नमः १। ॐ उत्कर्षिण्यै नमः २। ॐ ज्ञानायै नमः ३। ॐ क्रियायै नमः ४। ॐ योगायै नमः ५। ॐ प्रह्व्यै नमः ६। ॐ सत्यायै नमः ७। ॐ ईशानायै नमः ८। मध्ये ॐ अनुग्रहायै नमः ९।

द्वितीयावरण पूजनम्—ॐब्राह्म्यै नमः। पूर्वे ॐमाहेश्वर्यै नमः। आग्नेय दिशि। ॐकौमार्यै नमः। दक्षिण दिशि। ॐवैष्णव्यै नमः। नैऋत्यां दिशि। ॐवाराह्यै नमः पश्चिम दिशि। ॐइन्द्राण्यै नमः। वायव्यां दिशि। ॐचामुण्डायै नमः। उत्तरस्यां दिशि। ॐगिरिजायै नमः ऐशान्यां दिशि। (अनुष्ठान पद्धति)

तृतीयावरण पूजनम्—ॐइन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावत वाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवारायश्री महाविष्णुमूर्ति पार्षदाय नमः। ॐअग्नये तेजोधिपतये पिंगलवर्णाय शक्ति हस्ताय मेष वाहनाय सशक्तिकाय सांगाय सायुधाय स वाहनाय स परिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐयमाय प्रेताधिपतये कृष्णवर्णाय दण्ड हस्ताय महिष वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐनिषतये रक्षोधिपतये रक्तवर्णाय खड्ग हस्ताय नरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐवरुणाय जलाधितये कुंदवर्णाय पाशहस्ताय मकरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय महाविष्णुमूर्ति पार्षदाय नमः। ॐवायवे प्राणाधिपतये धूम्रवर्णाय अंकुश हस्ताय हरिणवाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐसोमाय नक्षत्राधिपतये शुक्लवर्णाय गदा हस्ताय अश्व वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐईशानाय विद्याधिपतये स्फटिकवर्णाय त्रिशूल हस्ताय वृषभ वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्तिपार्षदाय नमः। ॐअनंताय नागाधिपतये क्षीरवर्णाय चक्रहस्ताय गरुड वाहनाय स शक्तिाकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। नैर्ऋत्यं एवं पश्चिम दिशा के बीच में अनन्त का पूजन करें। ॐब्रह्मणे लोकाधिपतये कंजवर्णाय पषहस्ताय हंसवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। पूर्व एवं ईशान दिशा के बीच में ब्रह्मा जी का पूजन करें। *(अनुष्ठान पद्धति)*

चतुर्थावरणपूजनम्—ॐवज्राय नमः। (पूर्व में) ॐशक्त्यै नमः। (आग्नेय में) ॐदण्डाय नमः। (दक्षिण में) ॐखड्गाय नमः। (नैर्ऋत्य) ॐपाशाय नमः। (पश्चिम में) ॐअंकुशाय नमः। (वायव्य में) ॐगदायै नमः। (उत्तर में) ॐत्रिशूलाय नमः। (ईशान में) ॐचक्राय न मः। (पश्चिम नैर्ऋत्य के बीच में) ॐपद्माय नमः। (पूर्व ईशान के बीच में) *(अनुष्ठान पद्धति)*

अष्टोत्तर शतनाम पूजा

ॐ विष्णवे नमः। ॐ लक्ष्मीपतये नमः। ॐ कृष्णाय नमः। ॐ वैकुण्ठाय नमः। ॐ गरुडध्वजाय नमः। ॐ जगन्नाथाय नमः। ॐ परब्रह्मणे नमः। ॐ वासुदेवाय नमः। ॐ त्रिविक्रमाय नमः। ॐ दैत्यान्तकाय नमः। ॐ मधुरिपवे नमः। ॐ तार्क्ष्यवाहनाय नमः। ॐ सनातनाय नमः। ॐ नारायणाय नमः। ॐ पद्मनाभाय नमः। ॐ हृषीकेशाय नमः। ॐ सुधाप्रदाय नमः। ॐ माधवाय नमः। ॐ पुण्डरीकाक्षाय नमः। ॐ स्थितिकर्त्रे नमः। ॐ परात्पराय नमः। ॐ वनकालिने नमः। ॐ यज्ञ रूपाय नमः। ॐ चक्र पाणये नमः। ॐ गदाधराय नमः। ॐ उपेन्द्राय नमः। ॐ केशवाय नमः। ॐ हंसाय नमः। ॐ समुद्रमथनाय नमः। ॐ हरये नमः। ॐ गोविन्दाय नमः। ॐ ब्रह्मजनकाय नमः ॐ कैटभासुरमर्दनाय नमः। ॐ श्रीधराय नमः। ॐ कामजनकाय नमः ॐ शेषशायिने नमः। ॐ चतुर्भजाय नमः। ॐ पाञ्चजन्यधराय नमः। ॐ श्रीमते नमः। ॐ शार्ङ्गपाणये नमः। ॐ जनार्दनाय नमः। ॐ पीताम्बरधराय नमः। ॐ देवाय नमः। ॐ सूर्यचन्द्रविलोचनाय नमः। ॐ मत्स्यरूपाय नमः। ॐ कूर्मतनवे नमः। ॐ क्रोडरूपाय नमः। ॐ नृकेसरिणे नमः। ॐ वामनाय नमः। ॐ भार्गवाय नमः। ॐ रामाय नमः। ॐ बलिने नमः। ॐ कल्किने नमः। ॐ हयाननाय नमः। ॐ विश्वम्भराय नमः। ॐ शिशुमाराय नमः। ॐ श्रीकराय नमः। ॐ कपिलाय नमः। ॐ ध्रुवाय नमः। ॐ दत्तात्रेयाय नमः। ॐ अच्युताय नमः। ॐ अनन्ताय नमः। ॐ मुकुन्दाय नमः। ॐ दधिवामनाय नमः। ॐ धन्वन्तरये नमः। ॐ श्रीनिवासाय नमः। ॐ प्रद्युम्नाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ श्रीवत्सकौस्तुभधराय नमः। ॐ मुरारातये नमः। ॐ अधोक्षजाय नमः। ॐ ऋषभाय नमः। ॐ मोहिनी रुप धारिणे नमः। ॐ सङ्कर्षणाय नमः। ॐ पृथवे नमः। ॐ क्षीराब्धिशायिने नमः। ॐ भूतात्मने नमः। ॐ अनिरुद्धाय नमः। ॐ भक्तवत्सलाय नमः। ॐ नराय नमः। ॐ गजेन्द्रवरदाय नमः। ॐ त्रिधाम्ने नमः। ॐ भूतभावनाय नमः। ॐ श्वेतद्वीपसुवास्तव्याय नमः। ॐ सनकादिमुनिध्येयाय नमः। ॐ भगवते नमः। ॐ शङ्करप्रियाय नमः। ॐ नीलकान्ताय नमः। ॐ धराकान्ताय नमः। ॐ वेदात्मने नमः। ॐ बादरायणाय नमः। ॐ भागीरथीजन्मभूमि पादपद्माय नमः। ॐ सतांप्रभवे नमः। ॐ स्वभुवे नमः। ॐ विभवे नमः। ॐ घनश्यामाय नमः। ॐ जगत्कारणाय नमः। ॐ अव्ययाय नमः। ॐ बुद्धावताराय नमः। ॐ शान्तात्मने नमः। ॐ लीलामानुष

विग्रहाय नमः। ॐ दामोदराय नमः। ॐ विराड्रूपाय नमः। ॐ भूतभव्यभवत्प्रभवे नमः। ॐ आदिदेवाय नमः। ॐ प्रह्लादपरिपालकाय नमः। ॐ श्रीमहाविष्णवे नमः। अष्टोत्तर शतनाम पूजां समर्पयामि।

धूप— **ॐ वनस्पति रसोत्पन्नो गंधाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥**

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ *(अथर्ववेद १९.६.१०)*

ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णवे नमः, धूपं आघ्रापयामि। *(अनुष्ठान पद्धति)*

दीपम्—आज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये॥ *(अथर्ववेद १९.६.११)*

ॐ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। निचं देवीं मातरं श्रियं वासय मे कुले॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णवे नमः दीपं दर्शयामि। धूपदीपानंतरं आचमनीयं समर्पयामि।

नैवेद्यम्—देवस्याग्रे स्थलं संशोध्य गोमयेन मण्डलं कृत्वा तत्र शुद्धं पात्रं न्यस्य अभिघार्य निर्मलं हविः तदुपरि न्यस्य आज्येन द्रवीभूतं कृत्वा ''ॐभूर्भुवः स्वः इति गायत्र्या प्रोक्ष्य वायु बीजं जप्त्वा निवेद्यान्नं संशोध्य दक्षिणहस्ते अग्निबीजं विलिख्य तेन हस्तेन संदह्य वामहस्ते अमृत बीजं विलिख्य तेन हस्तेन हविराप्लाव्य सुरभिमुद्रां बध्वा अमृतमयं भावयित्वा मल धातु रसांशं विभाज्य देवस्य निवेद्य ग्रहणेच्छां कुर्यात्। **''सत्यं त्वर्तेन परिषिञ्चामि''** इत्यनेन परिषिच्य हस्तभ्यां पुष्पैः देवस्य जिह्वार्चीरुचिं निवेद्ये निपात्य निवेदयामि भवते जुषाणेदं हविर्विभो इति वामहस्तेन ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादि मुद्राः प्रदर्शयेत्। अन्नात् मलांशं धात्वंशं च परित्यज्य रसांशं देवस्य वदनार्चिषि समर्पयेत्। वं अबात्मना इति नैवेद्य मुद्रां प्रदर्शयेत्। नैवेद्य सारं

रससमर्पणात् जातं सुधांशं देवे समर्प्य अंजलिमुद्रा बध्वा नैवेद्यसारसमर्पित जातामृतमय सुधांशुना पुनः पुनः वर्धितं देवं हृन्मूर्ति देवं ध्यायन् स्व स्व मूलमंत्र यथा शक्ति जप्त्वा।

कलश के आगे स्थल शुद्धि कर गोमय से शुद्धि कर चतुरस्त्र मण्डल को बनाकर उस पर शुद्ध पात्र को रखें। पात्र में थोडा सा घी डालें। उस पात्र में निर्मलहविस् (नैवेद्य पदार्थ को) को घी पर रखें। उस हविस् को घीं से भिगोयें।

गायत्री मंत्र से नैवेद्य का प्रोक्षण करें—"यं यं यं" इस वायुबीज को जपकर हविस् को शुद्ध करें। दाहिने हाथ में (रं) अग्नि बीज को लिखकर उस अग्नि से हविस् में विद्यमान कश्मलों को जलाऐं (कल्पना करें)। बायें हाथ में अमृत बीज (वं) को लिखकर उस हाथ से हविस् को शुद्ध करें (धोने की कल्पना करें) ॐनमो नारायणाय। इस मन्त्र का आठ बार जप करें। हविस् को मंत्रमय एवं अमृतमय छोने की कल्पना करें। सुरभि मुद्रा से अमृतमय हुआ है मानकर मलांश, धातु का अंश एवं रसांश को अलग अलग करने की कल्पना करें। देवता को नैवेद्य ग्रहण करने की इच्छा उत्पन्न करती चाहिये।

"सत्यं त्र्तेन परिषिचामि" इससे परिषिञ्चन करें। दोनों हाथों में पुष्प लेकर देवता का जीभ नैवेद्य तक पहुँचने का चिन्तन करें।

"निवेदयामि भवते जुषाणेदं हविर्विभो" कहकर नैवेद्य स्वीकार करने की प्रार्थना करते हुए। बायें हाथ से ग्रास मुद्रा (जैसे बछडे को घास देते है) को दिखाकर दाहिने हाथ से प्राणाय स्वाहा-अङ्गुष्ठ कनिष्ठिका मिलाकर अपानाय स्वाहा-अङ्गुष्ठ एवं तर्जनी मिलाकर व्यानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर उदानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर समानाय स्वाहा। सभी अङ्गुलियों को मिलाकर। अन्त से मलांश एवं धातु के अंध को अलग कर केवल रसांश को अर्पित करने की कल्पना करें।

"वं अबात्मना नैवेद्यं कल्पयामि" कहकर नैवेद्य मुद्रा का प्रदर्शन करें (अङ्गुष्ठ एवं अनामिका मिलाने से नैवेद्य मुद्रा)। नैवेद्य का सार जो रसांश था उसका भी सार अमृत का जो अंश है उसे देवता को समर्पित कर, हाथ जोडकर, नैवेद्य के सार अमृत से भगवान् को बढते हुए मानकर उसे हृदय में स्थित

मानकर यथाशक्ति ''ॐनमो नारायणाय''—इस मूल मंत्र का जप करें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ *(अथर्ववेद ५.२.३)*

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

यथा संभव नैवेद्यं निवेदयामि। अमृतापिधानमसि कहकर उत्तरापोशन देवें। हस्तप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूल—ॐ तस्मादश्वा अजायन्त ये च के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ *(अथर्ववेद १९.६.१२)*

पूगीफल समायुक्तं नागवल्या दलैर्युतं। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥ ॐसपरिवाराय श्री महाविष्णवे नमः। क्रमुक तांबूलं समर्पयामि।

नीराजन (आरति)—ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ *(अथर्ववेद १९.६.१३)*

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥ *(अथर्ववेद ६.७३.१)*

ॐसपरिवाराय श्री महाविष्णवे नमः। मङ्गल नीराजनं समर्पयामि।

मंत्रपुष्प—ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ *(अथर्ववेद १९.६.१)*

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ *(अथर्ववेद १९.६.१६)*

ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताश्चक्रे वायव्यां नारण्या ग्राम्याश्च ये ॥ (अथर्ववेद १९.६.१४)

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः। मंत्रपुष्पं समर्पयामि। षोडशोपचार के बाद अष्टावधान सेवा करें।

देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायक ऋषिगणवन्द्य श्री महा भविष्णु स्वामिन् ऋग्वेद प्रिय ऋग्वेद सेवां अवधारय। ऋग्वेद मंत्रों का पाठ करें। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायकऋषिगणवन्द्य श्री महा विष्णुस्वामिन् यजुर्वेदप्रिय यजुर्वेदसेवां अवधारय। यजुर्वेद मंत्रों का पाठ करें। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायकऋषिगणवन्द्य श्री महा विष्णुस्वामिन् सावदेव प्रिय सामवेद सेवांअवधारय। सामवेद मंत्रों का पाठ करें। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायकऋषिगणवन्द्य श्री महा विष्णुस्वामिन् अथर्ववेद प्रिय अथर्ववेद सेवां अवधारय। अथर्ववेद मंत्रों का पाठ करें। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायकऋषिगणवन्द्य श्री महा विष्णुस्वार्मिन् शास्त्रप्रिय शास्त्र सेवां अवधारय। शास्त्रों का पाठ करें। तर्क, न्याय, मीमांसा, वेदान्त, साहित्य, व्याकरण, ज्योतिष आदि शास्त्र कहलाते हैं। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटि ब्रह्माण्ड नायक ऋषिगणवन्द्य श्री महा विष्णुास्वामिन् पुराणप्रिय पुराण सेवां अवधारय। अठारह पुराणों में देवता विषयक कोई भाग या भवगद्गीता के श्लोक भी पुराण के अन्तर्गत आते हैं। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटि ब्रह्माण्ड नायक ऋषिगणवन्द्य श्री महा विष्णुस्वामिन् अष्टक सेवाप्रिय अष्टकसेवां अवधारय। देवदेवोत्तम देवता सार्वभौम अखिलाण्डकोटिब्रह्माण्ड नायक ऋषिगणवन्द्य श्री महा विष्णुस्वामिन् सङ्गीतप्रिय सङ्गीत सेवां अवधारय। अष्टावधान सेवा को नीराजन के तुरन्त बाद मंत्र पुष्प से पहले भी कर सकते हैं। मन्त्र पुष्प के तुरन्त बाद प्रदक्षिण से पहले भी कर सकते हैं।

प्रदक्षिणा नमस्कार—यानि कानि च पापानि जन्मांतर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे ॥ (देवपूजा-स्मृति

संग्रह)

ॐ सप्तास्यांसन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबंध्नन्पुरुषं पशुम्॥ (अथर्ववेद १६.६.१५)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विंदेयं पुरुषानहम्॥

(पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः। प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्य—ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यम्। (कहकर तीन बार पुष्पमिश्रित जल छोड़ें।)

सर्वोपचार पूजनम्—ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आंदोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचार पूजां समर्पयामि।

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त संसतीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि॥ (अथर्ववेद १६.६.१६)

ॐ यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ (ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः। सर्वोपचार पूजां समर्पयामि।

प्रार्थना—विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ (पौराणिकम्)

ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना ।। *(श्री भगवद्गीते)* ॐसपरिवाराय श्री महा विष्णवे नमः। अनेन पूजनेन सपरिवारः श्री महा विष्णुः प्रीयताम्। षोडशोपचार पूजनं संपूर्णम्।

नवग्रह षोडशोपचार पूजनम्

ध्यायामि। ध्यानं समर्पयामि।

ॐ सहस्त्रंबाहुः पुरुंषः सहस्त्राक्षः सहस्त्रंपात्। स भूमिं विश्वतों वृत्वात्यंतिष्ठद्दशाङ्गुलम्।। *(अथर्ववेद १९.६.१)*

ॐ हिरंण्य वर्णां हरिंणीं सुवर्णरजतस्त्रंजाम्। चन्द्रां हिरण्मंयीं लक्ष्मीं जातवेंदो म आ वंह ।। *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐनवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, आवाहनं समर्पयामि।

ॐ त्रिभिः पद्भिर्द्यामंरोहत्पादंस्येहाभंवत्पुनंः। तथा व्यंक्रामद्विष्वंङशनानशने अनुं।। *(अथर्ववेद १९.६.२)*

ॐ तां म आवंह जातवेदो लक्ष्मीमनंपगामिनींम्। यस्यां हिरंण्यं विन्देयं गामश्वं पुरुंषानहम्।। *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐनवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, आसनं समर्पयामि।

ॐ तावंन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुंषः। पादोंस्य विश्वां भूतानिं त्रिपादंस्यामृतं दिवि ।। *(अथर्ववेद १९.६.३)*

ॐ अश्वपूर्वा रंथमध्यां हस्तिनांद प्रमोदिंनीम्। श्रियं देवी मुपंह्वये श्रीर्मां देवी जुंषताम्।। *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐनवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह॥ (अथर्ववेद १९.६.४)

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्। (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहितदेवताभ्यो नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते॥ (अथर्ववेद १९.६.५)

ॐ चन्द्रां प्रभासां यशसा ज्वलन्ती श्रियं लोके देवजुष्टामुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः। मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् पयः (दूध)—ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।

संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ॥ (अथर्ववेद २.२६.४)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पयः स्नानं समर्पयामि। दूध से स्नान के बाद शुद्धोदक स्नान

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ (अथर्ववेद १.५.१)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः। पयः स्नानांते शूद्धोदकस्नानं समर्पयामि।

दधि (दहि)—ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥ (अथर्ववेद २०.१३७.३)

ॐनवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, दधि स्नानं समर्पयामि। दहि स्नान के बाद शुद्धोदक स्नान

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐनवग्रह मंडलस्थ आवाहितदेवताभ्यो नमः, दधि स्नानांते शुद्धोदक स्नानं समर्पयामि।

घृत (घी)—ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने॥ *(अथर्ववेद ७.८२.६)*

ॐनवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, घृत स्नानं समर्पयामि। घी स्नान के बाद शुद्धोदक स्नान

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

ॐनवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, घृतस्नानांते शुद्धोदक स्नानं समर्पयामि।

मधु (शहद)—ॐ मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद॥ *(अथर्ववेद ९.१.२३)*

ॐनवग्रहमण्डलस्थ आवाहितदेवताभ्यो नमः, मधु स्नानं समर्पयामि।

ॐ ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्॥ *(अथर्ववेद १.५.४)*

ॐनवग्रह मण्डलस्थ आवाहितदेवताभ्यो नमः, मधु स्नानान्ते शुद्धोदकस्नानं समर्पयामि।

शर्करा (शक्कर)—ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥ *(अथर्ववेद ५.२.३)*

ॐनवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, शर्करास्नानं समर्पयामि।

ॐ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवम्॥ *(अथर्ववेद १.६.२)*

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि।

ॐ पुष्पंवतीः प्रसूमंतीः फलिनीरफला उत। संमातरं इव दुह्रामस्मा अरिष्टतांतये॥ (अथर्ववेद ८.७.२७)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, फलस्नानं समर्पयामि।

ॐ उच्चा पतंन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजंमानम्।
पश्याम त्वा सवितारं यमाहुरजंस्रं ज्योतिर्यदविन्दुदत्रिः॥ (अथर्ववेद १३.२.३६)

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ (अथर्ववेद २०.१३७.४)

ॐ अग्निर्वासाः पृथिव्यं सितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु॥ (अथर्ववेद १२.१.२१)

ॐ कपृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजंसातये।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाधं इह सोमंपतये॥ (अथर्ववेद २०.१३७.२)

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु॥ (अथर्ववेद ७.५१.१)

ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पिपर्तु।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च॥ (अथर्ववेद ६.५३.१)

ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।

अहा॑नि॒ शं भ॑वन्तु न॒: शं रात्री॒ प्रति॑ धीयता॒ं शमु॒षा नो॒ व्यु॑च्छतु॒ ॥ (अथर्ववेद ७.६९.१)

ॐ कया॑नश्चि॒त्र आ भु॑वदू॒ती स॒दावृ॑ध॒: सखा॑। कया॒ शचि॑ष्ठया वृ॒ता ॥ (अथर्ववेद २०.१२४.१)

ॐ के॒तुं कृ॒ण्वन्न॑के॒तवे॒ पेशो॑ मर्या अपे॒शसे॑। समु॒षद्भि॑रजायथा: ॥ (अथर्ववेद २०.२६.६)

ॐ ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्यो॑ भवत्। मध्यं॒ तद॑स्य॒ यद्वैश्य॑: प॒द्भ्यां शू॒द्रो अ॑जायत ॥ (अथर्ववेद १९.६.६)

ॐ आ॒दि॒त्यव॑र्णो॒ तप॒सोऽधि॑जा॒तो व॒नस्पति॒स्तव॒ वृ॒क्षोऽथ बि॒ल्वः।
तस्य॒ फला॑नि तप॒सा नु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॒लक्ष्मी: ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, शुद्धोदकस्नानं सपर्मयामि। शुद्धोदक स्नान मंत्रों के तीन प्रकार प्रचलित है।

प्रथम क्रम में—९ ग्रह- ९ अधिदेवता-९ प्रत्यधिदेवता ६ कर्म साद्गुण्य देवता, ८ क्रतु संरक्षक देवता कुल मिलाकर ४१ देवताओं का मंत्र पठन करके शुद्धोदक स्नान करना चाहिये। सभी मंत्र आवाहन में है। नवग्रह यागादियों में इसका प्रयोग होता है। जहाँ कलश पूजन के लिए ही एक पण्डित नियुक्त हो वहाँ भी इसे कर सकते हैं।

द्वितीय क्रम में—९ ग्रह+९ अधिदेवता+९ प्रत्यधिदेवता कुलमिलाकर २७ देवताओं का मंत्र पठन करके शुद्धोदक स्नान कराना चाहिये।

तृतीय क्रम में—९ ग्रहों का मंत्र पठन करके शुद्धोदक स्नान कराना चाहिये।

वस्त्रम्— ॐ चन्द्रमा॒ मन॑सो जा॒तश्चक्षो॒: सूर्यो॑ अजायत। मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ प्रा॒णाद्वा॒युर॑जायत ॥ (अथर्ववेद १९.६.७)
ॐ उपै॑तु मां दे॑वस॒खः कीर्ति॒श्च मणि॑ना सह। प्रा॒दु॒र्भू॒तोऽस्मि॑ राष्ट्रे॒ऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, वस्त्रं समर्पयामि।

यज्ञोपवीतम्—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वा निर्णुद मे गृहात्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, यज्ञोपवीतं समर्पयामि, आचमनं समर्पयामि।

आभरणम्—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।

तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, आभरणं समर्पयामि।

गन्धम्— ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ (अथर्ववेद १९.६.८)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, गन्धं समर्पयामि।

अक्षतम्—ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ (अथर्ववेद २०.९२.५)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, अक्षतान् समर्पयामि।

पुष्पाणि—ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जाते अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ पुष्पंवतीः प्रसूमंतीः फलिनींरफला उत। संमातरं इव दुह्नामस्मा अंरिष्टतांतये ॥ (अथर्ववेद ८.७.२७)

ॐ मनंसः काममाकूंतिं वाचः सत्यमंशीमहि। पशूनां रूपंमन्नस्य मयि श्रीः श्रंयतां यशंः ॥ (ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पुष्पाणि समर्पयामि।

नाम पूजा

ॐ सहस्रकिरणाय नमः। ॐ सूर्याय नमः। ॐ तपनाय नमः। ॐ सवित्रे नमः। ॐ रवये नमः। ॐ विकर्तनाय नमः। ॐ जगच्चक्षुषे नमः। ॐ द्युमणये नमः। ॐ तिग्मदीधितये नमः। ॐ त्रयीमूर्तये नमः। ॐ द्वादशात्मने नमः। ॐ ब्रह्माविष्णुशिवात्मकाय नमः। ॐ आदित्याय नमः। ॐ अग्नये नमः। ॐ रुद्राय नमः। ॐ चन्द्रमसे नमः। ॐ अद्भ्यो नमः। ॐ गौर्यै नमः। ॐ अङ्गारकाय नमः। ॐ भूम्यै नमः। ॐ स्कन्दाय नमः। ॐ बुधाय नमः। ॐ विष्णवे नमः। ॐ पुरुषाय नमः। ॐ बृहस्पतये नमः। ॐ इंद्राय नमः। ॐ ब्रह्मणे नमः। ॐ शुक्राय नमः। ॐ इंद्राण्यै नमः। ॐ इंद्राय नमः। ॐ शनैश्चराय नमः। ॐ प्रजापतये नमः। ॐ यमाय नमः। ॐ राहवे नमः। ॐ सर्पेभ्यो नमः। ॐ मृत्यवे नमः। ॐ केतवे नमः। ॐ ब्रह्मणे नमः। ॐ चित्रगुप्ताय नमः। ॐ विनायकाय नमः। ॐ दुर्गायै नमः। ॐ क्षेत्रपालाय नमः। ॐ वायवे नमः। ॐ आकाशाय नमः। ॐ अश्विभ्यां नमः। ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, नाम पूजां समर्पयामि।

धूपः— वनस्पति रसोत्पन्नो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

ॐ यत्पुरुंषेण हविषां देवा यज्ञमतंन्वत। वसन्तो अंस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ (अथर्ववेद १९.६.१०)

ॐ कर्दमेन प्रंजा भूता मयि संम्भव कर्दम। श्रियं वासयं मे कुले मातरं पद्ममालिंनीम् ॥ (ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, धूपं आघ्रापयामि।

दीपं— **साज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापह॥**

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये॥ *(अथर्ववेद १९.६.११)*

ॐ आपः स्रजन्तु स्निग्धानि चिक्लीत व स मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले॥ *(ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, दीपं दर्शयामि। धूपदीपानन्तरं आचमनीयं समर्पयामि।

नैवेद्यं—नैवेद्य रखने के स्थल पर मण्डल बनायें (चतुरस्र) नैवेद्य को मण्डल पर रखने के बाद मंत्र पढ़ें। विश्वामित्र ऋषिः देवी गायत्री छन्दः, सविता देवता निवेदने विनियोगः। एक बार नैवेद्य पर गायत्री मंत्र से प्रोक्षण करें। सत्यं त्वर्तेन परिषिञ्चामि इस मंत्र से दिन में एवं **ऋतं त्वा सत्येन परिषिञ्चामि**। इस मंत्र से रात्रि में परिषिञ्चन करें।

यथा संभव नैवेद्यं निरीक्षस्व कहकर प्रार्थना कर **अमृतोपस्तरणमसि** मन्त्र से जल छोड़ें। बायें हाथ से ग्रास मुद्रा (जैसे बछड़े को घास खिलाते हैं) एवं दाहिने हाथ से निम्न मुद्राओं से देवताओं को नैवेद्य अर्पण करें। मन में कल्पना करें कि भगवान को खिला रहे हैं। प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा। ॐ घृणिः सूर्य आदित्यः-इस मूल मंत्र को आठ बार जप करें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥ *(अथर्ववेद ५.२.३)*

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ *(ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)*

यथा सम्भवं नैवेद्यं निवेदयामि। अमृतापिधानमसि। कहकर उत्तरापोशण जल दें। उत्तरापोशनार्थं जलं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूलम्—पूगीफलसमायुक्तं नागवल्ल्यादलैर्युतम्। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ तस्मादश्वा अजायन्त ये च के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ *(अथर्ववेद १९.६.१२)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, अमुक ताम्बूलं समर्पयामि। ताम्बूल के पश्चात् नीराजन करें।

ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ *(अथर्ववेद १९.६.१३)*

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः॥ *(अथर्ववेद ६.७३.१)*

ॐ नवग्रह मडलस्थ आवाहित देवताभ्यो नमः, मङ्गल नीराजनं दर्शयामि।

मन्त्र पुष्पः—ॐ उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।

पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्दुदत्रिः॥ *(अथर्ववेद १३.२.३६)*

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ *(अथर्ववेद २०.१३७.४)*

ॐ अग्निवासाः पृथिव्य सितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु॥ *(अथर्ववेद १२.१.२१)*

ॐ कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये।

निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपतये॥ *(अथर्ववेद २०.१३७.२)*

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरदघायोः।

इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु ॥ (अथर्ववेद ७.५१.१)

ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पितर्तु।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च ॥ (अथर्ववेद ६.५३.१)

ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।
अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु ॥ (अथर्ववेद ७.६९.१)

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ (अथर्ववेद २०.१२४.१)

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥ (अथर्ववेद २०.२६.६)

ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताश्चक्रे वायव्यां नारण्या ग्राम्याश्च ये ॥ (अथर्ववेद १९.६.१४)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, मंत्रपुष्पं समर्पयामि।

प्रदक्षिणा नमस्कारः—यानि कानि च पापानि जन्मान्तर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिणा पदे पदे ॥

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ (अथर्ववेद १९.६.१५)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्या हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।

(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्यः— ॐ प्रभाकराय विद्महे दिवाकराय धीमहि। तन्नः सूर्यः प्रचोदयात्॥

ॐ अत्रिपुत्राय विद्महे अमृतोद्भवाय धीमहि। तन्नः सोमः प्रचोदयात्॥

ॐ भूमिपुत्राय विद्महे भारद्वाजाय धीमहि। तन्नः कुजः प्रचोदयात्॥

ॐ तारापुत्राय विद्महे सोमपुत्राय धीमहि। तन्नो बुधः प्रचोदयात्॥

ॐ देवाचार्याय विद्महे वाचस्पतये धीमहि। तन्नो गुरुः प्रचोदयात्॥

ॐ दैत्याचार्याय विद्महे विद्यारूपाय धीमहि। तन्नः शुक्रः प्रचोदयात्॥

ॐ सूर्यपुत्राय विद्महे शनैश्चराय धीमहि। तन्नो मंदः प्रचोदयात्॥

ॐ सैंहिकेयाय विद्महे तमोमयाय धीमहि। तन्नो राहुः प्रचोदयात्॥

ॐ ब्रह्मपुत्राय विद्महे विकृतास्याय धीमहि। तन्नः केतुः प्रचोदयात्॥

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यं, प्रसन्नार्घ्यं समर्पयामि।

सर्वोपचार पूजनम्— ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आन्दोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचारपूजां समर्पयामि।

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त संसतीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि॥ *(अथर्ववेद १९.६.१६)*

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ *(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, सर्वोपचारपूजां समर्पयामि।

प्रार्थना— ग्रहाणामादिरादित्यो लोकरक्षणकारकः। विषमस्थानसंभूतां पीडां हरतु ते रविः ॥
रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः। विषमस्थानसंभूतां पीडां हरतु ते विधुः ॥
भूमिपुत्रो महातेजा जगतां भयकृत्सदा। वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु ते कुजः ॥
उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः। सूर्य प्रियकरो विद्वान् पीडां हरतु ते बुधः ॥
देवमन्त्री विशालाक्षः सदालोकहितेरतः। अनेक शिष्य संपूर्णः पीडां हरतु ते गुरुः ॥
दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः। प्रभुस्ताराग्रहाणां च पीडां हरतु ते भृगुः ॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः। मंदचारः प्रसन्नात्म पीडां हरतु ते शनिः ॥
महाशिरा महावक्त्रौ दीर्घदंष्ट्रो महाबलः। अतनुश्चोर्ध्व केशश्च पीडां हरतु ते तमः ॥
अनेक रूपवर्णौश्च शतशोथ सहस्त्रशः। उत्पातरूपो जगतः पीडां हरतु ते शिखी ॥ (ब्रह्मकर्म समुच्चय)
आरोग्यं पद्मबन्धुर्वितरतु विपुलां संपदं शीतरश्मिः, भूलाभं भूमिपुत्रः सकलगुणयुतां वाग्विभूतिं च सौम्यः।
सौभाग्यं देवमन्त्री रिपुभयशमनं भार्गवः शौर्यमार्किः, दीर्घायुस्सैंहिकेयो विपुलतरयशः केतुराचन्द्रतारम् ॥

शान्तिरस्तु शिवं ते अस्तु ग्रहाः कुर्वन्तु मङ्गलम्। अरिष्टानि प्रणश्यन्तु दुरितानि भयानि च। ॐनवग्रहमण्डलस्थ देवताभ्यो नमः, प्रार्थनां समर्पयामि।

यहाँ पर नवग्रह पूजन समाप्त हुआ। मण्डप में कलशों का पूजन भी संपूर्ण हुआ।

तृतीय / चतुर्थ / पञ्चम दिन द्वितीय प्रहर

भू-शुद्धि— ॐ स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः॥ *(अथर्ववेद १८.२.१९)*

इस मन्त्र से जल प्रोक्षण करने से भूमि शुद्ध होती है।

देह शुद्धि—ॐ या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः॥ *(अथर्ववेद ११.८.३०)*

आचमन मन्त्र—ऋग्वेदाय स्वाहा। यजुर्वेदाय स्वाहा। सामवेदाय स्वाहा। (स्वाहा मन्त्र से जल पीना चाहिये।)

अथर्ववेदाय नमः। इतिहास पुराणेभ्यो नमः। अग्नये नमः। वायवे नमः। प्राणाय नमः। सूर्याय नमः। चन्द्राय नमः। दिग्भ्यो नमः। इन्द्राय नमः। पृथिव्यै नमः। अन्तरिक्षाय नमः। दिवे नमः। ब्रह्मणे नमः। विष्णवे नमः। सदाशिवाय नमः। द्विराचम्य .. इस प्रक्रिया को दुबारा करना चाहिये।

पवित्र धारणम्— ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ *(अथर्ववेद २०.१३७.४)*

ॐभूर्भुवः स्वः कहकर जल सिञ्चन करें॥ (इन मन्त्रों से पवित्र शुद्धिकर धारण करना चाहिये आसन के नीचे दो कुश डाल लेना चाहिये।)

प्राणायाम—प्रणवस्य परब्रह्म ऋषिः। दैवी गायत्री छन्दः। परमात्मा देवता। प्राणायामे विनियोगः।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्। ॐ आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवस्वरोम्। *(ऋग्वेद ३.६२.१०)*

(रेखङ्कित मन्त्र को तीन बार कुम्भक में जप करना चाहिये।)

आसन शुद्धि—ॐ स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथः।' *(१५ मन्त्र-२२ सूक्त-प्रथम मण्डल)* इस मन्त्र से जल प्रोक्षण करने से भूमि शुद्ध होती है।

शिखाबन्धनम्—

ऊर्ध्वकेशि विरूपाक्षि मांसशोणित भक्षणे। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते॥ *(ब्रह्मकर्म समुच्चय)*

(इस मन्त्र से शिखाबन्धन करना चाहिये।)

महा संकल्प —..........

गुरु प्रार्थना —

नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः।
आचार्य सिद्धेश्वर पादुकाभ्यो नमोऽस्तु लक्ष्मीपति पादुकाभ्यः॥ *(श्रृङ्गेरी मठीय आचार्य प्रार्थनम्)*

श्री गुरु परमगुरु परमेष्ठी गुरु सद्गुरु पादुकाभ्यो नमो नमः। हम लोग ब्रह्मानन्दं गुरु तं नमानि। गुरु परम्परा को भी बोल सकते हैं। कर सकते हैं। हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ ईश्वर के रुष्ट होने पर गुरुजी रक्षा करते हैं एवं गुरुजी के कुपित होने पर कोई भी रक्षक नहीं है।

भूतोच्चाटन मन्त्र—

ॐ अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरण)*
ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरण)*
ॐ तीक्ष्णादंष्ट्रमहाकाय कल्पान्ते दहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि॥ *(ब्रह्मकर्म समुच्चय)*

इति भैरवं नमस्कृत्य। (इन मन्त्रों से भूतोच्चाटन कर भैरव जी से यज्ञ रक्षा की प्रार्थना करते हैं।)

गणपति प्रार्थना—**ॐ इमा या ब्रह्मणस्पते विषूचीर्वात ईरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि।**

स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु ॥ *(अथर्ववेद १९.८.६)* इन मन्त्रों से गणपति प्रार्थना कर पुष्पाक्षत छोड़ना चाहिये।

जल कलश पूजनम्—कलश में पूर्ण जल भरकर रखना चाहिये। फिर उसमें गन्ध अक्षत पुष्प कलश के अन्दर डालना चाहिये एवं बाहर भी चारों ओर लगाना चाहिये। गायत्री मन्त्र से तीन बार कलश छूकर जप करना चाहिये।

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदस्सामवेदोह्यथर्वणः॥
अङ्गैश्चसहितास्सर्वे कलशाम्बुसमाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
आयान्तु देवपूजार्थं दुरितक्षयकारकाः। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिंकुरु॥ *(ब्रह्मकर्म समुच्चय-देवपूजा प्रकरण)*
ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*
ॐ एमां कुमरस्तरुण आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः॥ *(अथर्ववेद ३.१२.७)*
श्री वरुण मूर्तये नमः।

(इन मन्त्रों को कलश छूकर पाठ करना चाहिये।)

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृत कलशोद्यत्पंकजाभीत्यभीष्टाम्।

विधि हरिहररूपां सेन्दुकोटीरचूडां भसितसितदुकूलां जाह्नवीं तां नमामि ।। *(स्मृति संग्रह)*

(इस मन्त्र से कलश में गङ्गाजी का ध्यान करना चाहिये।)

आत्माराधनम्—हृदि स्थितं पंकजमष्टपत्रं सकेसरं कर्णिक मध्यनालं ।।
अङ्गुष्ठमात्रं मुनयो वदन्ति ध्यायेत् च विष्णुं पुरुषं पुराणम् ।।
हृदयकमलमध्ये सूर्यबिम्बासनस्थं सकलभुवनबीजं सृष्टिसंहारहेतुम् ।
निरतिशयसुखात्म ज्योतिषं हंसरूपं परमपुरुषमाद्यं चिन्तयेदात्ममूर्तिम् ।।
आराधयामि मणि सन्निभमात्मलिङ्गम् । मायापुरीरहृदय पंकज सन्निविष्टम् ।।
श्रद्धा नदी विमलचित्त जलभिषेकै । र्नित्यं समाधि कुसुमैर्न पुनर्भवाय ।।
देहो देवालयः प्रोक्तो जीवो हंसः सदाशिवः । त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ।।
स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकम् । तावत् त्वं प्रीति भावेन बिम्बेस्मिन् सन्निधिं कुरु ।। (देवपूजा)

ॐ आत्मने नमः। ॐ अन्तरात्मने नमः। ॐ परमात्मने नमः। ॐ ज्ञानात्मने नमः। आत्मपूजां समर्पयामि। इससे आत्मशुद्धि होती है। (इन मन्त्रों को कहकर अपने सिर पर अक्षत डाल लेवें।)

हवन कुण्ड में

स्थंडिल शुद्धिः—तद् गोमयेन प्रदक्षिणमुपलिप्य दक्षिणे उदीच्यां द्वे, प्रतीच्यां चतुः, प्राच्यामर्धं इत्यंगुलानित्यक्त्वा दक्षिणोपक्रमां उदक्संस्थां प्रादेशमात्रां एकां लेखां तस्या दक्षिणोत्तरयोः प्रागायते पूर्वरेखया असंसृष्टे प्रादेशसंमिते

द्वे लेखे लिखित्वा तयोर्मध्ये परस्परं असंसृष्टाः उदक्संस्थाः प्रागायताः प्रादेश संमिताः तिस्त्रः इति षड्लेखाः यज्ञीय शकलमूलेन दक्षिण हस्तेन उल्लिख्य लेखासु तच्छकलं उदगग्रं निधाय स्तंडिलं अद्भिः अभ्युक्ष्य शकलं भंक्त्वा आग्नेय्यां निरस्य पाणिं प्रक्षाल्य वाग्यतः भवेत्।

स्थण्डिल को पहले गोमय से लेपना चाहिये। स्थण्डिल (वेदी) में दक्षिण में आठ अंगुल, उत्तर में दो अंगुल, पश्चिम में चार अंगुल, पूर्व में आधा अंगुल छोड़कर दक्षिण से प्रारम्भकर उत्तर में समाप्त हो ऐसे १२ अंगुल चौक बनाना चाहिये। फिर बीच में दक्षिण से उत्तर एक रेखा खींचना चाहिये। १२ अंगुल फिर दक्षिण से प्रारम्भ कर एक दक्षिण में एवं एक उत्तर में दो रेखायें पश्चिम से पूर्व की ओर खीचें १२ अंगुल बी फिर दक्षिण से प्रारम्भकर दक्षिण में समाप्त होने वाले पश्चिम से पूर्व में समाप्त होने वाले तीन रेखायें। (१२ अंगुल) खीचें। (प्रादेश प्रमाण-लगभग १२ अंगुल) (ब) इसे यज्ञ में प्रयुक्त अश्वत्थादि समित् के अग्रभाग से इन लकीरों को खीचना चाहिये। दाहिने हाथ से लिखें। (रेत पर) खीचने वाले समित् को उसके ऊपर उत्तर उत्तराभिमुख रखें। फिर स्थण्डिल (stage) को जल से अभ्युक्षण करना चाहिये। (अभ्युक्षण मतलब मुष्टि में जल लेकर सिञ्चन करना चाहिये।) फिर उस समित् को (लकीर खीचें) तोडकर आग्नेय दिशा में फेंककर हाथ धो लेना चाहिये।

त्वं भूमित्येष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे। त्वां पवित्रमृषयो भरन्तस्त्वं पुनीहि दुरितान्यस्म ॥

दिति पवित्रे अन्तर्धाय हविर्निर्वपति (इस वाक्य से चरुपात्र में दो कुशा डालें फिर अक्षत की कटोरी हाथ में लें उसमें से प्रत्येक देवता के नाम से दो-दो दाना चरु पात्र में डालते जायें —मुठ्ठी-मुठ्ठी भर प्रत्येक देताओं के नाम से निकालना चाहिए ये नियम है।) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्रये जुष्टं निर्वपामीति (आदित्याय जुष्ठम निर्वपामि, चन्द्राय अङ्गारकाय, बुधाय, बृहस्पतये, शुक्राय, शनिश्चराय, राहवे, केतवे, विनाकाय, दुर्गायै, क्षेत्रपालाय, वायवे, आकाशाय, अश्विनभ्यां, इन्द्राय, अग्नेयै, यमाय, नैर्ऋतये, वरुणाय, वायवे, सोमाय, इशानाय, विष्णवे जुष्टं निर्वपामि एवं जुष्टं प्रोक्षामि

कुशा लेकर के जल पात्र से चरुपात्र में प्रोक्षण करें)

परित्वाग्ने पुरं वयमिति त्रिः पर्यग्नि करोति। (इस मन्त्र से ३ बार अग्नि कुण्ड की पूर्व दिशा से जल घुमाकर पूर्व दिशा तक ही प्रदक्षिणा करें)

परिं त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। धृषद् वर्णं दिवेदिवे हन्तारं भङ्गुरावंतः॥ त्रिः पर्यग्नि करोति।

अग्निं अर्चयेत—अग्नेर्मन्वे प्रथमस्य प्रचेंतसः पाञ्चंजन्यस्य बहुधा यमिन्धतें।

विशोंविशः प्रविशिवांसंमीमहे स नों मुञ्चत्वंहंसः॥

यथां हव्यं वहंसि जातवेदो यथां यज्ञं कल्पयंसि प्रजानन्। एवा देवेभ्यः सुमतिं न आ वंह स नों मुञ्चत्वंहंसः॥

यामंन्यामन्नुपंयुक्तं वहिंष्ठं कर्मन्कर्मन्नाभंगम्। अग्निमींडे रक्षोहणं यज्ञवृधं घृताहुतं स नों मुञ्चत्वंहंसः॥

सुजांतं जातवेंदसमग्निं वैश्वानरं विभुम। हव्यवाहं हवामहे स नों मुञ्चत्वंहंसः॥

येन ऋषंयो बलमद्योंतयन् युजा येनासुंराणामयुंवन्त मायाः। येनाग्निना पणीनिन्द्रों जिगाय स नों मुञ्चत्वंहंसः॥

येनं देवा अमृतंमन्वविन्दन् येनौषंधीर्मधुंमतीरकृंण्वन्। येनं देवाः स्व१राभंरन्त्स नों मुञ्चत्वंहंसः॥

यस्येदं प्रदिशि यद् विरोचंते यज्जातं जंनितव्यं च केवंलम्। स्तौम्यग्निं नांथितो जोंहवीमि स नों मुञ्चत्वंहंसः॥

(अथर्ववेद .४.२३.१-७)

इन मंत्रों को बोल करके अग्नि देवता का ध्यान एवं पञ्चोपचार पूजन करना चाहिए।

अग्निमूर्तिध्यान—ॐ चत्वारि शृङ्गास्त्रयों अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधां बद्धो वृंषभो रोंरवीति महोदेवो मर्त्यां आविंवेश॥ *(गोपथ ब्राह्मण १.१६)*

सप्तहस्तश्चतुः शृंगः सप्तजिह्वो द्विशीर्षकः। त्रिपात्प्रसन्नवदनः सुखासीनः सुचिस्मितः॥
स्वाहांतुदक्षिणोपार्श्वे देवीं वामेस्वधां तथा। बिभ्रद्दक्षिण हस्तैस्तु शक्तिमन्नंस्त्रुचं स्त्रुवं॥
तोमरंव्यजनंवामैर्घृतपात्रं च धारयन्। मेषारूढो जटाबद्ध गौरवर्णो महौजसः।
धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः॥ आत्माभिमुखमासीन एवं रूपो हुताशनः। *(ब्रह्मकर्म समुच्चय-अग्निमुख प्रकरण)*

हे अग्ने शाण्डिल्यगोत्र मेषारूढ वैश्वानर प्राङ्मुखः सन् ममाभिमुखो वरदस्सुप्रसन्नो भव। अष्टदिशी अग्निं अर्च्येत्। ॐ पूर्वे अग्नये नमः ॐ आग्नेयां अग्नये नमः ॐ दक्षिणे अग्नये नमः ॐ नैर्ऋत्यां अग्नये नमः ॐ पश्चिमे अग्नये नमः ॐ वायव्ये अग्नये नमः ॐ उत्तरे अग्नये नमः ॐ ऐशान्ये अग्नये नमः ॐ मध्ये यज्ञ पुरुषाय नमः॥ उत्तरतोऽग्रेरुपसादयतीध्मम्। (इस वाक्य से १५ लकड़ी के गाठ को इध्मा कहते हैं कुण्ड के उत्तर दिशा में नीचे कुशा का आसन विछाकर उसके ऊपर इध्मा रख दें एवं उसी के उत्तर में बर्हिः मुठ्ठी भर कुशा को बर्हिः कहते हैं) उत्तर बर्हिः। अग्नये त्वा जुष्टं प्रोक्षामीतीध्मम्। (इस वाक्य से इध्मा को प्रोक्षण करें एवं बर्हिः को भी प्रोक्षण करें) पृथिव्या प्रोक्षामि इति बर्हिः। (इस वाक्य को बोल करके मुठ्ठी भर कुशाओं को जहां घी का पात्र रखा जाता है वहां पर दक्षिण से लेकर उत्तर तक विछाना है) दर्भमुष्टिमभ्युक्ष्य पश्चादग्नेः प्रागग्रं निदधात्यूर्णाम्रदं प्रथस्व स्वासस्थं देवभ्य इति। दर्भाणामपादाय (बड़ा वाला कुशा लेकर करके ब्रह्मा के आसन को स्पर्श करें नियम ये है कि ब्रह्मा जी का आसन अग्नि कुण्ड के दक्षिण दिशा में देना चाहिए ऋषीणां इस मन्त्र को बोले) ऋषीणां प्रस्तरोऽसीति दक्षिणतो ऽग्नेर्ब्रह्मासनं निदधाति।

ऋषीणां प्रस्तरोंऽसि नमोंऽस्तु दैवांय प्रस्तरायं।

पुरस्तादग्रास्तार्य तेषां मूलान्यपरेषां प्रान्तैरवछादयन्परिसर्पति दक्षिणेनाग्निमा पश्चार्धात्। परि स्तृणीहीति संप्रेष्यति।

(यहां पर जो आगे वाक्य लिखा है उस वाक्य को बोलते हुए इस्तीर्ण वशिष्ठ कुशा लेकर के पहले पूर्व दिशा में डाले जिसका मूल भाग दक्षिण दिशा

की ओर होना चाहिए एवं अग्र भाग उत्तर दिशा की ओर होना चाहिए इसी तरह से पश्चिम दिशा में डाले फिर मूल भाग पश्चिम दिशा को एवं अग्र भाग पूर्व दिशा की ओर होना चाहिए इसी तरह उत्तर दिशा में भी डालें **नोट**—अग्र भाग पूर्व एवं उत्तर की ओर होना चाहिए एवं मूल भाग दक्षिण एवं पश्चिम की ओर होना चाहिए) पुरस्तादग्रेरास्तीर्य तेषां मूलान्यपरेषां प्रान्तैरवछादयन्परिसर्पति (इन वाक्यों से स्तीर्य को स्पर्श करें) दक्षिणेनाग्निमा पश्चार्धात् । परि स्तृणीहीति संप्रेष्यति।

परिंस्तृणीहि परिं धेहि वेदिंमा जामिं मोंषीरमुया शयांनाम्। होतृषदंनं हरिंतं हिरण्ययं निष्का एते यजंमानस्य लोके ॥

(देवस्यत्वा इस मंन्त्र से स्तीर्ण को प्रोक्षण करें)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यांप्रसूतः प्रशिषा परिस्तृणामीति।

स्तीर्णं प्रोक्षति (हवि को प्रोक्षण करें) हविषां त्वा जुष्टं प्रोक्षामीति। (दो कुशा लेकर के अग्नि में जलाकर घी पात्र के अन्दर ३ परिक्रमा करें उसके बाद कुशा को अग्नि कुण्ड के अन्दर डाल दें।) विलीनपूतमाज्यं गृहीत्वाधिश्रृत्य पर्यग्नि कृत्वो (इस वाक्य से उत्तर की ओर घी पात्र को किंचित खिंचना है।) दगुद्वास्य पश्चाद्ग्रेरुपसाद्योदगग्राभ्यांपवित्राभ्यामुत्पुनाति। (दो कुशा को लेकर अनामिका एवं अंगुष्ठ के बीच में दबा कर घी पात्र के अन्दर ४ बार चलायें यह प्रक्रिया पूरी होने के बाद अग्नि कुण्ड में कुशा को डाल दें।)

विष्णोर्मनसा पूतमसि। देवस्त्वा सवितोत्पुनातु। अच्छिद्रेण त्वा पवित्रेण शतधारेण सहस्त्रधारेण सुप्वोत्पुनामीति

तृतीयम्। तूष्णीं चतुर्थम्। (इस वाक्य को पढ़कर श्रुवा से दो बार घी चरु पात्र में डालें।) श्रृतं हविरभिघारयति मध्वा समञ्जन्घृतवत्कराथेति। अभिघार्योदञ्चमुद्वासयत्युद्वासयाग्ने: (इस वाक्य को पढ़कर चरु पात्र को उत्तर दिशा की ओर खिचें।)

अदांरसृद् भवतु देव सोमास्मिन् यज्ञे मंरुतो मृडतां नः। मा नों विददभिभा मो अशंस्तिर्मा नों विदद् वृजिना द्वेष्या या॥

(इस मन्त्र से घी पात्र के दायें एवं बायें हाथ फैला करके घी को देखें) शृतमर्क हव्यमा सीद पृष्ठममृतस्य धामेति। पश्चादाज्यस्य निधायालंकृत्य समानेनोत्पुनाति। अदारसृदित्यवेक्षते। उत्तिष्ठतेत्यैन्द्रम्। (३ समीधा हाथ में लेकर के अग्नि को दिखाकर के घी पात्र के बायीं तरफ रख दें।)

अ॒ग्निर्भूम्या॒मोष॑धीष्व॒ग्निमापो॑ बिभ्रत्य॒ग्निरश्म॑सु। अ॒ग्निर॒न्तः पुरु॑षेषु गोष्वश्वे॑ष्व॒ग्नयः॑॥

अग्निर्भूम्यामिति तिसृभिरुपसमादधात्यस्मै क्षत्राणयेतमिध्ममिति वा।

युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः। इन्धानास्त्वा सुप्रजसः सुवीर ज्योग्जीवेम बलिहृतो वयं त

इति। (इस वाक्य को पढ़कर के कुण्ड के नैर्ऋत्य एवं दक्षिण के मध्य में खाली जल पात्र को स्पर्श करके अभी मन्त्रीत करें।) दक्षिणतो जाङ्मायनमुदपात्रमुपसाद्याभिमन्त्रयते तथोदपात्रं धारय यथाग्रे ब्रह्मणस्पतिः। सत्यधर्मा अदीधरद्देवस्य सवितुः सव इति।

अथोदकमासिञ्चति—(नीचे लिखे हुए मन्त्र को पढ़कर के जल पात्र में जलधारा डालें।)

इहेत देवीरमृतं वसाना हिरण्यवर्णा अनवद्यरूपाः। आपः समुद्रो वरुणश्च राजा संपातभागान्हविषो जुषन्ताम्। इन्द्रप्रशिष्टा वरुणप्रसूता अपः समुद्राद्दिवमुद्वहन्तु। इन्द्रप्रशिष्टा वरुणप्रसूता दिवस्पृथिव्याः श्रियमा वहन्त्विति।

(इस वाक्य को पढ़कर के हवि आज्यादि पर एवं सामाग्रीयों पर प्रोक्षण करें) ऋतं त्वा सत्येन परिषिञ्चामि जातवेद इति सह हविर्भिः पर्युक्ष्य (मंत्र को पढ़कर के ४ बार आचमन करें मन्त्र आगे है)

जी॒वा स्थ॑ जी॒व्यासं॒ सर्व॒मायु॑र्जीव्यासम्। उ॒प॒जी॒वा स्थोप॑ जीव्यासं॒ सर्व॒मायु॑र्जीव्यासम्।

सं॒जीवा स्थ॒ सं जी॑व्यासं॒ सर्व॒मायु॑र्जीव्यासम्। जी॒व॒ला स्थ॑ जी॒व्यासं॒ सर्व॒मायु॑र्जीव्यासम्।

जीवाभिराचम्योपोत्थाय (आगे दिये गये वाक्य से वेद भगवान एवं यज्ञ पुरुष को प्रणाम करें) वेद प्रपद्भिः प्रपद्यत

ॐ प्रपद्ये भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये जनत्प्रपद्य इति।

प्रपद्य (आगे वाक्य को पढ़कर यजमान अपने आसन के नीचे दो कुशा डालें) पश्चात्स्तीर्णस्य दर्भानास्तीर्याहि दैधिषव्योदतस्तिष्ठा (आगे वाक्य को पढ़कर के ब्रह्मासन को देखना चाहिए एवं बड़े कुशा से ब्रह्मा जी को स्पर्श करें) न्यस्य सदने सीद यो ऽस्मत्पाकतर इति ब्रह्मासनमन्वीक्षते। (आगे वाक्य को पढ़कर के बह्माजी के आसन के नीचे कुशा का आसन है उसमें से दक्षिण कुशा निकाल करके नैर्ऋत्य दिशा की ओर फेंक दें) निरस्तः परागवसुः सह पाप्मना निरस्तः सो ऽस्तु यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणा तृणं निरस्यति। (इस वाक्य को पढ़कर के एवं आगे मन्त्र दिया गया है विमृग्वरी इस मन्त्र को पढ़ते हुए ब्रह्मासन कुशा से स्पर्श करें) तदन्वालभ्य जपतीदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं त्वाध्यासदेयमूर्णम्रदमनभिशोकम्।

वि॒मृ॒ग्व॑रीं पृथि॒वीमा व॑दामि क्ष॒मां भूमिं॒ ब्रह्म॑णा वावृधा॒नाम्। ऊर्जं॑ पु॒ष्टं बिभ्र॑तीमन्नभा॒गं घृ॒तं त्वा॒भि नि षी॑देम भूमे॥

मित्युपविश्यासनीयं ब्रह्मजपं जपति (आगे इस वाक्य को पढ़कर के अपने आसन को पकडकर अभिमन्त्रित करें) बृहस्पतिर्ब्रह्मा ब्रहमसदन आसिष्ये बृहस्पते यज्ञं गोपाय यदुदुद्वत उन्निवतः शकेयमिति। (आगे लिखे हुए वाक्य से यजमान अपने दक्षिण हाथ में दो कुशा लेकर के अंगुली में लपेट लें एवं बायें हाथ में श्रुवा लें मूल भाग से लेकर अग्र भाग होते हुए मूल भाग तक ३ बार परिक्रमा करने के उपरान्त कुशा एवं श्रुवा सहित अग्नि में तपायें फिर हाथ में लिपटा हुआ कुशा अग्नि कुण्ड में डाल दें) दर्भैः स्रुवं निर्मृज्य निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति प्रतप्य।

मूले स्रुवं गृहीत्वा जपति विष्णोर्हस्तो ऽसि दक्षिणः पूष्णा दत्तो बृहस्पतेः तं त्वाहं स्रुवमाददे देवानां हव्यवाहनम्। अयं स्रुवो वि दधाति होमाञ्छताक्षरछन्दसा जागतेन। (मूल भाग में श्रुवा को पकड़े इसके उपरान्त वाक्य रुपी मंत्र को बोलते हुये श्रुवा को चार बार स्थानांतरण करें)

सर्वा यज्ञस्य समनक्ति विष्ठा बार्हस्पत्येष्टिः शर्मणा दैव्येनेति। ओं भूः शं भूत्यै त्वा गृह्णे भूतय इति प्रथमं ग्रहं गृह्णाति। ओं भुवः शं पुष्टयै त्वा गृह्णे पुष्टय

इति द्वितीयम्। ओं स्वः शं त्वा गृह्णे सहस्रपोषायेति तृतीयम्। ओं जनच्छं त्वा गृह्णे ऽपरिमितपोषायेति चतुर्थम्। राजकर्माभिचारिकेष्वमुष्य त्वा प्राणाय गृह्णे ऽपानाय व्यानाय समानायोदानायेति पञ्चमम्। अग्नावग्निर्हदा पूतं पुरस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति। (इन चार मंत्रो को पढ़ते हुये श्रुवा से चार बार घी की आहूति दें यज्ञ कुण्ड के मध्य में दें।)

ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् स्वाहा
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान्।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् स्वाहा
पुरस्ताद् युक्तो वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम्।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम स्वाहा
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः स्वाहा।

पश्चादग्नेर्मध्यदेशे समानत्र पुरस्ताद्धोमान्। दक्षिणेनाग्निमुदपात्र आज्याहुतीनां संपातानानयति। पुरस्ताद्धोम आज्यभागः संस्थितहोमः समृद्धिः शान्तानामिति। एतावाज्यभागौ।

वृष्णे बृहते स्वर्विदे अग्नये शुल्कं हरामि त्विषीमते। स न स्थिरान्बलवतः कृणोतु ज्योक्क नो जीवातवे दधात्वग्नये स्वाहे त्युत्तरपूर्वार्ध आग्नेयमाज्यभागं जुहोति। (इस वाक्य रुपी मंत्र को पढ़कर के पूर्व एवं उत्तर के मध्य ईशान दिशा के बीचो बीच में घी की आहूति दें) दक्षिणपूर्वार्ध

सोमाय— त्वं सोम दिव्यो नृचक्षाः सुगाँ अस्मभ्यं पथो अनु ख्यः। अभि नो गोत्रं विदुष इव नेषो ऽछा नो वाचमुशंती जिगासि सोमाय स्वाहेति। (दक्षिण पूर्व के बीचो बीच अग्नेय कोण में घी की आहूति दें यह भी ध्यान दें कि ये आहूतियां यज्ञ की नेत्र मानी जाती है ये समझ कर आहूतियां दें) मध्ये हविः। उपस्तीर्याज्यं संहताभ्यामङ्गुलिभ्यां द्विर्हविषो ऽवद्यति मध्यात्पूर्वार्धाच्च। अवत्तमभिघार्य द्विर्हविः प्रत्यभिघारयति। (इस वाक्य को पढ़कर के श्रुवा से घी लेकर के दो बार श्रुक में डालें इसके उपरान्त चरु पात्र के अन्दर से चरु निकालना हैं मध्य एवं पूर्वाध से ये चरु श्रुक में रखे फिर श्रुवा से दो बार जहां से चरु निकाला गया है उसी स्थान पर घी डालें फिर श्रुवा से दोबारा दो बार श्रुक में घी डालें) यतोयतो ऽवद्यति तदनुपूर्वम्। एवं सर्वाण्यवदाननि। अन्यत्र सौविष्टकृतात्।

ॐ उदेनमुत्तरं नयाग्ने घृतेनाहुत। समेनं वर्चसा सृज प्रजया च बहुं कृधि स्वाहा

उदेनमुत्तरं नयेति पुरस्तादधोमसंहतां पूर्वाम्। एवं पूर्वांपूर्वां संहतां जुहोति। स्वाहान्ताभिः प्रत्यृचं होमाः। (इस मंत्र को बोल करके यजमान श्रुक वाली आहूति हवन कुण्ड के मध्य में छोड़ दे फिर सभी पंडित मिलकर के नवग्रह क्रतु साद्गुण्य क्रतु संरक्षक एवं प्रधान देवता श्री विष्णु का हवन करें)

नवग्रह होमः

प्रधान देवता सूर्य होमः—प्रधान देवता आदित्य प्रीत्यर्थे अर्कसमित्, आज्य, चरु होमे विनियोगः।

ॐ उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्दुदत्रिः स्वाहा॥

आदित्यायेदं न मम। २८ बार इस मंत्र से अर्क सहित घी एवं चरु से होम यह संख्या ८ या २८ या १०८ बार कर सकते हैं।

दिवाकरं दीप्त सहस्त्ररश्मिं तेजोमयं जगतः कर्मसाक्षिम्। अंशुं भानुं सूर्यमादिं ग्रहाणां दिवाकरं सदा शरणमहं प्रपद्ये॥

आदित्याय नमः।

प्रधान देवता सोम होमः—प्रधान देवता चन्द्रप्रीत्यर्थे पलाश समित्, आज्य, चरु होम विनियोगः।

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः स्वाहा॥

सोमाय इदं न मम। २८ बार इस मंत्र से पलाश सहित घी एवं चरु से होम करें।

प्रार्थना— यः कालहेतोः क्षयवृद्धिमेति यं देवताः पितरश्चापिबन्ति तं वै वरेण्यं ब्रह्मेन्द्रवन्द्यं चन्द्रं सदा शरणमहं प्रपद्ये॥

चन्द्राय नमः।

प्रधान देवता अङ्गारक होमः—प्रधान देवता अङ्गारक प्रीत्यर्थे खदिरसमित आज्य चरु होमे विनियोगः।

ॐ अग्निर्वासाः पृथिव्यं सितज्ञूस्त्विषींमन्तं संशितं मा कृष्णोतु स्वाहा।

अङ्गारकाय इदं न मम। २८ बार इस मंत्र में खदिर समित्, घी एवं चरु से होम करें।

प्रार्थना— महेश्वरस्याननस्वेदबिन्दोर्भूमौ जातं रक्तमालांबराढ्यं। सुरश्मिरणं लोहिताङ्गं कुमारमङ्गारकं सदा शरणमहं प्रपद्ये॥

अङ्गारकाय नमः।

प्रधान देवता बुध होमः—प्रधान देवता बुध प्रीत्यर्थे अपामार्ग समित्, आज्य, चरु होमे विनियोगः।

ॐ कर्पृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजसातये।

निष्ट्रिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये स्वाहा।

बुधाय इदं न मम। २८ बार इस मंत्र से अपामार्ग समित्, घी एवं चरु से होम करें।

प्रार्थना— उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः। सूर्य प्रियकरो विद्वान् पीडां दहतु मे बुधः॥ ॐ बुधाय नमः।

प्रधान देवता बृहस्पति होमः— प्रधान देवता बृहस्पति प्रीत्यर्थे पिप्ल समित् आज्य चरु होमे विनियोगः।

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।

इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु स्वाहा॥ *(ऋग्वेद १०.४२.११)*

बृहस्पतये इदं न मम। २८ बार इस मंत्र से पिप्ल समित्, घी एवं चरु से होम करें।

प्रार्थना— बुध्यात्मनो यस्य न कश्चिदन्यो मतिं देवा उपजीवंति यस्य। प्रजापते रात्मजं धर्मनिष्ठं गुरुं सदा शरणमहं प्रपद्ये॥

ॐ गुरुवे नमः।

प्रधान देवता शुक्र होमः— प्रधान देवता शुक्रग्रह प्रीत्यर्थे औदुम्बर समित्, आज्य चरु होमे विनियोगः।

ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु।

अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च स्वाहा।

शुक्राय इदं न मम। २८ बार इस मंत्र से औदुम्बर समित्, घी एवं चरु से हाम करें।

प्रार्थना— वर्षप्रदं चिन्तितार्थानुकूलं मौनाद्विशिष्टं सुनयोमपन्नम्। तं भार्गवं योगविशुद्धसत्वं शुक्रं सदा शरणमहं प्रपद्ये॥

ॐ शुक्राय नमः।

प्रधान देवता शनैश्चर होमः—प्रधान देवता शनैश्चर प्रीत्यर्थे शमी समित्, आज्य, चरु होमे विनियोगः।

ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।

अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छत स्वाहा।

शनैश्चराय इदं न मम। २८ बार इस मंत्र से शमी समित्, घी एवं चरु से होम करें।

प्रार्थना— शनैश्चरो राशितो राशिमेति शनैर्भोगो गमनं चेष्टितं च। सूर्यात्मजं क्रोधनं सुप्रसन्नं शनैश्चरं सदा शरणमहं प्रपद्ये॥

ॐ शनैश्चराय नमः।

प्रधान देवता राहु होम—प्रधान देवता राहु प्रीत्यर्थे दूर्वासमित् आज्य चरु होमे विनियोगः।

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता स्वाहा॥ *(अथर्ववेद २०.१२४.१)*

राहवे इदं न मम। २८ बार इस मंत्र से दूर्वा समित्, घी एवं चरु से होम करें।

प्रार्थना— यो विष्णुनैवामृतं भोक्ष्यमाणः छित्वाशिरो ग्रहभावे नियुक्तः। यश्चन्द्रसूर्यौ ग्रसते पर्व काले राहुं सदा शरणमहं प्रपद्ये॥

ॐ राहवे नमः।

प्रधान देवता केतु होमः—प्रधान देवता केतु प्रीत्यर्थे कुश समित् आज्य चरु होमे विनियोगः।

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः स्वाहा॥

केतवे इदं न मम। २८ बार इस मंत्र से कुश समित्, घी एवं चरु से होम करें।

प्रार्थना—हे ब्रह्मपुत्रा ब्रह्मसमानवक्त्राः ब्रह्मोद्भवाः ब्रह्मसमाः कुमाराः।
ब्रह्मोत्तमा वरदा जामदग्न्याः केतून् सदा शरणमहं प्रपद्ये॥

ॐ केतवे नमः। यहाँ पर नवग्रह होम संपन्न हुआ। आगे छः कर्म साद्गुण्य देवता होम होगा।

कर्म साद्गुण्य देवता विनायक होमः-१— क्रतु साद्गुण्यदेवता विनायक प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यस्य॑ कृ॒ण्मो ह॒विर्गृ॒हे तमं॑ग्ने वर्धया॒ त्वम्। तस्मै॒ सोमो॒ अधि॑ ब्रवद॒यं ब्रह्म॑ण॒स्पति॒ः स्वाहा॑।

कर्म सादगुण्यदेवतायै विनायकाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्यदेवता दुर्गा होमः-२—क्रतुसाद्गुण्यदेवता दुर्गा प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ दे॒वानां॑ पत्नी॑रुश॒तीर॑वन्तु न॒ः प्राव॑न्तु नस्तु॒जये॒ वाज॑सातये।
याः पार्थि॑वासो॒ या अ॒पामपि॑ व्र॒ते ता नो॑ देवी॒ः सु॒हवा॒ः शर्म॑ यच्छन्तु स्वाहा॑॥

क्रतु साद्गुण्य देवतायै दुर्गायै इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्यदेवता क्षेत्रपाल होमः-३—चरु होमे विनियोगः।

ॐ मधु॑मती॒रोष॑धी॒र्द्याव॒ आपो॒ मधु॑मन्नो भवत्व॒न्तरि॑क्षम्।
क्षेत्र॑स्य॒ पति॒र्मधु॑मान्नो अ॒स्त्वरि॑ष्यन्तो॒ अन्वे॑नं चरेम॒ स्वाहा॑।

क्रतु साद्गुण्य देवतायै क्षेत्रपालाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता वायु होमः-४—क्रतु साद्गुण्य देवता वायु प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ वायोः पूतः पवित्रेण प्रत्यङ् सोमो अति द्रुतः। इन्द्रस्य युज्यः सखा स्वाहा॥

क्रतु साद्गुण्य देवतायै वायवे इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता आकाश होमः-५—क्रतु साद्गुण्य देवता आकाश प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् स्वाहा॥

क्रतु साद्गुण्यदेवतायै आकाशाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता अश्विनी देवता होमः-६—अश्वि प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना स्वाहा॥

क्रतु साद्गुण्य देवतायै अश्विभ्यां इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता इन्द्र होमः—क्रतु संरक्षक देवता इन्द्र प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ इन्द्रं त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः स्वाहा॥

क्रतु संरक्षक देवतायै इन्द्राय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता अग्नि होमः—क्रतु संरक्षक देवता अग्नि प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् स्वाहा॥

क्रतु संरक्षक देवतौ अग्नय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता यम होमः—क्रतु संरक्षक देवता यम प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यमाय सोमः पवते यमाय क्रियते हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः स्वाहा॥

क्रतु संरक्षक देवतायै यमाय इदं न मम। इस मंत्र को दो बार होम करें।

क्रतु संरक्षक देवता निर्ऋति होमः—क्रतु संरक्षक देवता निर्ऋति प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत्।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः स्वाहा॥

क्रतु संरक्षक देवतायै निर्ऋतये इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता वरुण होमः—क्रतु संरक्षक देवता वरुण प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु स्वाहा॥

क्रतु संरक्षक देवतायै वरुणाय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता वायु होमः—क्रतु संरक्षक देवता वायु प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे स्वाहा॥

क्रतु संरक्षक देवतायै वायवे इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता सोम होम—क्रतु संरक्षक देवता सोम प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अभि त्यं देवं संतिारंमोरायोः कविक्रंतुम्। अर्चांमि सत्यसवं रत्नधामभि प्रियं मतिम् स्वाहां॥

क्रतु संरक्षक देवतायै सोमाय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता ईशान होमः—क्रतु संरक्षक देवता ईशान प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ मा नो मर्ता अभि द्रुहन् तनूनांमिन्द्र गिर्वणः। ईशांनो यवया वधम् स्वाहां॥

क्रतु संरक्षक देवतायै ईशानाय इदं न मम। इस मंत्र से दो बार होम करें। यहाँ पर क्रतु संरक्षक देवता होम संपन्न हुआ।

व्याहृति होमः—व्याहृतीनां परमेष्ठी प्रजापतिः बृहती व्याहृति होमे विनियोगः। ॐभूः स्वाहा, अग्नये इदं न मम। ॐभुवः स्वाहा,वायवे इदं न मम। ॐस्वः स्वाहा, सूर्याय इदं न मम। ॐभूर्भुवः स्वः स्वाहा, प्रजापतये इदं न मम। इन मत्रों से एक बार होम करें।

प्रधान देवता विष्णु होमः—विष्णु प्रीत्यर्थे चरु होमे विनियोगः।

ॐ इदं विष्णुर्वि चंक्रमे त्रेधा नि दंधे पदा। समूंढमस्य पांसुरे स्वाहां। *(अथर्ववेद ७.२६.४)*

विष्णाव इदं न मम। इस मंत्र से १०८ बार, २१६ बार, ३१४ बार होम कर सकते हैं। ॐविष्णावे स्वाहा, विष्णाव इदं न मम। ॐसर्वभूतपतये स्वाहा, सर्वभूतपतय इदं न मम। ॐचक्रपाणाये स्वाहा, चक्रपाणाये इदं न मम। ॐईश्वराय स्वाहा, ईश्वराय इदं न मम। ॐसर्वोत्पातशमनाय स्वाहा, सवोत्पातशमनाय इदं न मम। प्रधान देवता के होम के बाद इन पॉच मंत्रों से घी की आहूति एक-एक बार देवें।

प्रायश्चित आहूतिया— प्रधान यजमान घृत की आहूति करें।

आकूत्यै त्वा स्वाहा। कामाय त्वा स्वाहा। समृधे त्वा स्वाहा। आकूत्यै त्वा कामाय त्वा समृधे त्वा स्वाहा। ऋचा स्तोमं समर्धय गायत्रेण रथंतरम्।

बृहद्वायत्रवर्तनि स्वाहा। (इन मंत्रों को बोल करके प्रत्येक देवताओं के नाम से आहूति छोड़ते जाये फिर आगे दश मंत्रो को पढ़कर के आहूतियां डालें।)

पृथिव्यामग्रये समनमन्निति संनतिभिश्च। प्रजापते न त्वदेतान्यन्य इति च।

ॐ पृथिव्यामग्नये समनमन्त्स आर्घ्नोत्। यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः सं नमन्तु स्वाहा

पृथिवी धेनुस्तस्या अग्निर्वत्सः। सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम्। आयुः पथमं प्रजां पोषं रयिं स्वाहा

अन्तरिक्षे वायवे समनमन्त्स आर्घ्नोत्। यथान्तरिक्षे वायवे समनमन्नेवा मह्यं संनमः सं नमन्तु स्वाहा

अन्तरिक्षे धेनुस्तस्या वायुर्वत्सः। सा मे वायुना वत्सेनेषमूर्जं कामं दुहाम्। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा

दिव्या दित्याय समनमन्त्स आर्घ्नोत्। यथा दिव्या दित्याय समनमन्नेवा मह्यं संनमः स नमन्तु स्वाहा

द्यौर्धेनुस्तस्या आदित्यो वत्सः। सा म आदित्येन वत्सेनेषमूर्जं कामं दुहाम्। अयुः प्रथमं प्रजां पोषं रयिं स्वाहा

दिक्षु चन्द्राय समनमन्त्स आर्घ्नोत्। यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं संनमः सं नमन्तु स्वासा

दिशो धेनवस्तासां चन्द्रो वत्सः। ता मे चन्द्रेण वत्सेनेषमूर्जं कामं दुहाम्। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ।

नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् स्वाहा

हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान्।

सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् स्वाहा

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिभूर्जजान।

यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् स्वाहा

उपस्तीर्याज्यं सर्वेषामुत्तरतः सकृत्सकृदवदाय द्विरवत्तमभिघारयति। न हवींषि॥ (इस वाक्य से यजमान दो बार घी श्रुक में डालें फिर चरु पात्र में जितना चरु बचा हो वो दो बार में श्रुक में डालें फिर पुनः दो बार घी श्रुक में डालें चरु पात्र में घी नहीं डालना है)

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवोढुम्। अग्निर्विद्वान्स यज्ञात्स इद्धोता सो ऽध्वरान्स ऋतून्कल्पयात्यग्नये स्विष्टकृते स्वाहेत्युत्तरपूर्वार्धे (इस वाक्य को बोलकर के श्रुक वाली आहूति कुण्ड में डालें) ऽवयुतं हुत्वा सर्व प्रायश्चित्तीयन्होमाञ्जुहोति। स्वाहेष्टेभ्यः स्वाहा। वषडनिष्टेभ्यः स्वाहा। भेषजं स्विष्ट्यै स्वाहा। निष्कृतिर्दरिष्ट्यै स्वाहा। दैवीभ्यस्तनूभ्यः स्वाहा।

अयाश्चाग्ने ऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि। अयासा मनसा कृतो ऽयास्यं हव्यमूहिषे। अया नो धेहि भेषजं स्वाहेत्यों स्वाहा भूः स्वाहा भुवः स्वाहा स्वः स्वाहों भूर्भुवः स्वः स्वाहेति।

यन्मे स्कन्नं मनसो जातवेदो यद्वास्कन्दद्धविषो यत्रयत्र। उत्प्रुषो विप्रुषः सं जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति।

यन्मे स्कन्नं यदस्मृतीति च स्कन्नास्मृतिहोमौ।

ॐ यदस्मृति चकृम किं चिदग्न उपारिम चरणे जातवेदः।
ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः स्वाहा

यदद्य त्वा प्रयतीति संस्थितहोमाः।

ॐ यदद्य त्वा प्रयति प्रयति यज्ञे अस्मिन् होतश्चिकित्वन्नवृणीमहीह।
ध्रुवमयो ध्रुवमुता शविष्ठ प्रविद्वान् यज्ञमुप याहि सोमम् स्वाहा॥ मनसस्पत इत्युत्तमं चतुर्गृहीतेन।

मनसस्पत इमं नो दिवि देवषु यज्ञम्।
स्वाहा दिवि स्वाहा पृथिव्यां स्वाहान्तरिक्षे स्वाहा वाते धां स्वाहा॥

(इस मंत्र को पढ़ते हुए यजमान श्रुवा से चार बार घी श्रुक में डालें फिर खड़े होकर श्रुक की आहूति दें) बर्हिराज्यशेषे ऽनक्ति पृथिव्यै त्वेति मूलमन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रम्। एवं त्रिः। (इस वाक्य से बर्हि को वायें हाथ में पकड़े एवं श्रुवा दाहिने हाथ में पकड़कर घी बर्हि में मूलभाग एवं मध्य भाग एवं अग्र भाग में डालें यह प्रक्रिया तीन बार होनी चाहिये आगे वाला मंत्र बोलकर बर्हि को स्वाहा कर दें) सं बर्हिरक्तमित्यनुप्रहरति यथादेवतम्।

ॐ सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना सं मरुद्भिः। सं देवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु हविः स्वाहा॥

स्रुवमग्नौ धारयति। (इस वाक्य को पढ़कर यजमान वायें हाथ में घी पात्र दाहिने हाथ में श्रुवा लेकर खड़े होकर धारा प्रवाह रुपी आहूति डालें) यदाज्यधान्यां तत्संस्रावयति संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः।
इमं यज्ञमभि विश्वे गृणन्तः स्वाहा देवा अमृता मादयन्तामिति। स्रुवो ऽसि घृतादनिशितः। सपत्नक्षयणो दिवि षीद। अन्तरिक्षे सीद पृथिव्यां सीदोत्तरो ऽहं भूयासमधरे मत्सपत्ना (इस वाक्य को पढ़कर श्रुवा को उल्टा करके यज्ञ कुण्ड से टीका कर रखदें) इति स्रुवं प्राग्दण्डं निदधाति।
(इस वाक्य एवं मंत्र से ३ समिधाओं को हाथ में लेकर के एक एक करके आगे दिये गये वाक्य एवं मंत्र से आहुति दें) वि मुञ्चामि ब्रह्मणा जातवेदसमग्निं होतारमजरं रथस्पृतम्। सर्वा देवानां जनिमानि विद्वान्यथाभागं वहतु हव्यमग्निरग्नये स्वाहेति इति प्रथमा।

ॐ एधोऽस्येधिषीय स्वाहा इति द्वितीया **समिदसि समेधिषीय स्वाहा।** एधो ऽसीति द्वितीयां समिदसीति तृतीयाम्।

करौ प्रक्षाल्यः अग्निं प्रत्यप **ॐ तेजोऽसि तेजो मयि धेहि।** (इस मंत्र से पहले हाथ धुल करके हाथ को अग्नि से सेंके फिर उसके उपरान्त हाथ से अपने मुख को मलें)

तेजो ऽसीति मुखं विमार्ष्टि। (इसके बाद पूर्णाहुति के दिन यहां से बलिदान करें उसके उपरान्त आगे तीन पग चलने का मंत्र एवं कार्य आगे बढ़ाये) दक्षिणेनाग्निं त्रन्विष्णुक्रमान्क्रमते।

ॐ विष्णोः क्रमोऽसिसपत्नहा पृथिवीसंशितोऽग्नितेजाः।
पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः॥
स मा जीवीत् तं प्राणो जहातु।
विष्णोः क्रमोऽसि सपत्नहान्तरिक्षसंशितो वायुतेजाः।
अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः।
स मा जीवीत् तं प्राणो जहातु।
विष्णोः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः।
दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः॥
स मा जीवीत् तं प्राणो जहातु।

विष्णोः क्रमो ऽसीति दक्षिणेन पादेनानुसंहरति सव्यम्। (इसके उपरान्त कुण्ड की परिक्रमा करते हुए यजमान को यज्ञशाला के बाहर जाकर सूर्य भगवान को देखें एवं नमस्कार करें)

ॐ सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम्। सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसम्॥
दिशो ज्योतिष्मतीरभ्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम्॥

सूर्यस्यावृतमित्यभिदक्षिणामावर्तते।

ॐ अगंन्म् स्वंः स्वं रगन्म् सं सूर्यस्य् ज्योतिंषागन्म॥

अगन्म स्वरित्यादित्यमीक्षते। (इसके बाद यजमान अपने आसन में बैठ जाये फिर दक्षिण दिशा में जो उदपात्र है उसको अपने हाथों से उठा करके किसी ब्राह्मण के हाथ में दें साथ में कुशा भी दें फिर ब्राह्मण आपो हि ष्ठा से मंत्र से मार्जन करें)

इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च। ब्रह्मणा स्थापितं पात्रं पुनरुत्थापयामसी त्यपरेणाग्निमुदपात्रं परिहृत्योत्तरणाग्नि।

ॐ आपो हि ष्ठा मंयोभुवस्ता नं ऊर्जे दंधातन। महे रणांय चक्षंसे॥ *(अथर्ववेद १.५.१)*

ॐ यो वंः शिवतंमो रसस्तस्यं भाजयतेह नंः। उशतीरिंव मातरंः॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयांय जिन्वंथ। आपों जनयंथा च नः॥ *(अथर्ववेद १.५.३)*

ॐ ईशांना वार्यांणां क्षयंन्तीश्चर्षणीनाम्। अपो यांचामि भेषजम्॥

मापो हि ष्ठा मयोभुव इति मार्जयित्वा बर्हिषि पत्न्याञ्जलौ निनयति समुद्रं वः प्र हिणोमीतीदं जनास इति वा। वीरपत्न्यहं भूयासमिति मुखं विमार्ष्टि। व्रतानि व्रतपतय इति समिधमादधाति। सत्यं त्वर्तेनति परिषिच्योदञ्चि हविरुच्छिष्टान्युद्वासयति। पूर्ण पात्रं दक्षिणा।

करौ प्रक्षाल्यः हस्ते पुष्पाणी गृहित्वा अग्निं अर्चयेत ॐ पूर्वे अग्नये नमः ॐ आग्नेयां अग्नये नमः ॐ दक्षिणे अग्नये नमः ॐ नैर्ऋत्यां अग्नये नमः ॐ पश्चिमे अग्नये नमः ॐ वायव्ये अग्नये नमः ॐ उत्तरे अग्नये नमः ॐ ऐशान्ये अग्नये नमः ॐ मध्ये यज्ञ पुरुषाय नमः॥ आचमनं ॐ ऋग्वेदाय स्वाहा। ॐ यजुर्वेदाय स्वाहा। ॐ सामवेदाय स्वाहा। करौ प्रक्षाल्यः। हस्ते जलाक्षत पुष्पाणी गृहित्वा संकल्प वाक्यान स्मैरेयुः स्वस्ति पूर्वोच्चारित ग्रह, गुण, गण, विशेषण, विशिष्टायाम, शुभ पुण्य तिथौ, अमुख गोत्रा, अमुख नाम शर्मामः षड दिवस साद्य अद्य...............दिने।

हवन कुण्ड में षोडशोपचार पूजनम्

आवाहनम्—ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ (अथर्ववेद १९.६.१)

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ (पञ्चम मण्डलस्य परिशिष्टम्)

सपरिवार श्री महाविष्णावे नमः, आवाहयामि आवाहनं समर्पयामि।

आसनम्—ॐ त्रिभिः पद्भिर्द्यामरोहत्पादस्येहाभवत्पुनः। तथा व्यक्रामद्विष्वङशनानशने अनु॥ (अथर्ववेद १९.६.२)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः,। आसनं समर्पयामि।

पाद्यम्— ॐ तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ (अथर्ववेद १९.६.३)

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः,। पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

अर्घ्यं— ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह॥ (अथर्ववेद १९.६.४)

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहो पह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्) ॐसपरिवाराय श्री महाविष्णावे नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

आचमनम्—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते॥ (अथर्ववेद १९.६.५)

ॐ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टा मुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे॥ (पञ्चम मण्डलस्य परिशिष्टम्)

सपरिवाराय श्री महाविष्णवे नमः, । मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् (दूध)— ॐ सं सिंञ्चामि गवां क्षीरं समाज्येन बलं रसम्।

संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ॥ (अथर्ववेद २.२६.४)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । पयः स्नानं समर्पयामि।

शुद्ध जल—ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।

भवे भवेनाति भवे भवस्वमाम् भवोद्भवाय नमः॥ (यजुर्वेद-महानारायणोपनिषत् आरण्यक)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । शुद्धोदक स्नानं समर्पयामि

दहि— ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥ (अथर्ववेद २०.१३७.३)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । दधि स्नानं समर्पयामि।

शुद्ध जल—ॐ वामदेवाय नमो ज्येष्ठाय नमःश्रेष्ठाय नमो रुद्राय नमः कालाय नमःकालविकरणाय

नमोबलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः। (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं सपर्मयामि।

घी— ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने॥ (अथर्ववेद ७.८२.६)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। घृतस्नानं समर्पयामि।

शुद्ध जल—ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोर तरेभ्यः।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं समर्पयामि।

मधु (शहद)—ॐ मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद॥ (अथर्ववेद ९.१.२३)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। मधु स्नानं समर्पयामि।

शुद्ध जल—ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं सपर्पयामि।

शर्करा (शक्कर)—ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥ (अथर्ववेद ५.२.३)

ॐ सपरिवाराय श्री महाविष्णावे नमः,। शर्करा स्नानं समर्पयामि।

शुद्ध जन—ॐ ईशानस्सर्वं विद्यानामीश्वरस्सर्वं भूतानां ब्रह्माधिपतिर्ब्रह्मणो

अधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि ।

फल— ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत । संमातरं इव दुह्रामस्मा अरिष्टतांतये ॥ (अथर्ववेद ८.७.२७)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । फल स्नानं समर्पयामि ।

शुद्धोदक—ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ (अथर्ववेद १.५.१)

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ (अथर्ववेद १.५.२)

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ (अथर्ववेद १.५.३)

ॐ ब्राह्मणो स्य मुखमासीद्बाहू राजन्यो भवत् । मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ (अथर्ववेद १९.६.६)

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु मायांतरा याश्च ब्राह्या अलक्ष्मीः । (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धदक स्नानं समर्पयामि ।

वस्त्र— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ (अथर्ववेद १९.६.७)

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । वस्त्रं समर्पयामि ।

यज्ञोपवीतं—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

ॐ विराडग्रे समभवद्विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ *(अथर्ववेद १९.६.९)*

ॐ क्षुत् पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

अनेन मंत्रेण पूजयेत्। (इस मन्त्र से पूजन करें।) ॐ ब्रह्मादि देवताभ्यो नमः। ध्यायामि। ध्यानं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। आवाहयामि। आसनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। स्वागतं। पादारविन्दयोःपाद्यं पाद्यं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। हस्तयोः अर्घ्यं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। मुखे आचमनीयं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ (अथर्ववेद १.५.१)

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ (अथर्ववेद १.५.२)

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ (अथर्ववेद १.५.३)

स्नानं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। स्नानाङ्ग आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ॥ (अथर्ववेद २.१३.२)

वस्त्रयुग्मं समर्पयामि। वस्त्राङ्ग आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहज पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ (ऋग्वेद)

यज्ञोपवीतं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।
तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

आभरणं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ गन्धं द्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

गन्धं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ (अथर्ववेद २०.९२.५)

अक्षतान् समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।
उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्॥ (अथर्ववेद ६.१०६.१)

नाम पूजां करिष्ये—ॐ ब्रह्मणे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ इन्द्राय नमः। ॐ अग्नेय नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ अष्टवसुभ्यो नमः। ॐ एकादश रुद्रेभ्यो नमः। ॐ द्वादशादित्येभ्यो नमः। ॐ अश्विभ्यां नमः। ॐ विश्वेभ्यो देवेभ्यो नमः। ॐ सप्तयक्षेभ्यो नमः। ॐ भूतनागेभ्यो नमः। ॐ गंधर्वाप्सरोभ्यो नमः। ॐ स्कन्दाय नमः। ॐ नन्दीश्वराय नमः। ॐ शूलाय नमः। ॐ महाकालाय नमः। ॐ दुर्गायै नमः। ॐ विष्णवे नमः। ॐ स्वधायै नमः। ॐ मृत्युरोगेभ्यो नमः। ॐ गणपतये नमः। ॐ अद्भ्यो नमः। ॐ मरुद्भ्यो नमः। ॐ पृथिव्यै नमः। ॐ गङ्गादि सर्वनदीभ्यो नमः। ॐ सप्त सागरेभ्यो नमः। ॐ मेरवे नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गौतमाय नमः। ॐ भरद्वाजाय नमः। ॐ विश्वामित्राय नमः। ॐ कश्यपाय नमः। ॐ जमदग्नये नमः। ॐ वसिष्ठाय नमः। ॐ अत्रये नमः। ॐ अरुन्धत्यै नमः। ॐ ऐन्द्र्यै नमः। ॐ कौमार्यै नमः। ॐ ब्राह्म्यै नमः। ॐ वाराह्यै नमः। ॐ चामुण्डायै नमः। ॐ वैष्णव्यै नमः। ॐ माहेश्वर्यै नमः। ॐ वैनायक्यै नमः। (देवताओं के ५७ समूह।) नाम पूजां समर्पयामि। (ये सभी देवता सर्वतो भद्र मण्डल से आवाहित हैं।) ॐ ब्रह्मादि देवताभ्यो नमः।

वनस्पति रसोत्पन्नो गन्धाढयः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥ धूपं आघ्रापयामि। *(प्रयोगरत्नाकर)*

ॐ ब्रह्मादि देवताभ्यो नमः।

आज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥ *(ब्रह्मकर्म समुच्चय)*

दीपं दर्शयामि धूपदीपानन्तरं आचमनं समर्पयामि। ॐ ब्रह्मादि देवताभ्यो नमः। (नैवेद्य को गायत्री मन्त्र से प्रोक्षण करें नैवेद्य मण्डल पर रखें। **सत्यं त्वर्तेन परिषिञ्चामि।** इस मन्त्र से परिषिञ्चन करें।) **अमृतोपस्तरणमसि** कहकर जल छोड़ें। ॐ प्राणाय स्वाहा (अङ्गुष्ठ एवं कनिष्ठिका मिलाकर) ॐ अपानाय स्वाहा (अङ्गुष्ठ एवं तर्जनी मिलाकर) ॐ व्यानाय स्वाहा (अङ्गुष्ठ एवं मध्यमा मिलाकर) ॐ उदानाय स्वाहा (अङ्गुष्ठ एवं अनामिका मिलाकर) ॐ समानाय स्वाहा (सभी अङ्गुलियों को मिलाकर) ॐ देवेभ्यः स्वाहा नैवेद्यं निवेदयामि। **अमृतापिधानमसि** कहकर जल छोड़ें। नैवेद्यं विसर्जयामि। हस्तप्रक्षालनं समर्पयामि। गण्डूषं समर्पयामि। पुनराचमनं समर्पयामि। (कहकर जल छोड़ें) ॐ ब्रह्मादि देवताभ्यो नमः।

पूगीफल समायुक्तं नागवल्ल्यादलैर्युतम्। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यतां। क्रमुक ताम्बूलं समर्पयामि। *(देवपूजा)*

ॐ ब्रह्मादि देवताभ्यो नमः।

ॐ एह यांतु वरुणः सोमों अग्निर्बृहस्पतिर्वसुंभिरेह यांतु।
अस्य श्रियंमुपसंयांत सर्वं उग्रस्यं चेत्तुः संमंनसः सजाताः॥ *(अथर्ववेद ६.७३.१)*

मङ्गलनीराजनं समर्पयामि। नीराजनान्ते परिमल पत्र पुष्पाणि समर्पयामि। मन्त्रपुष्पं समर्पयामि। प्रदक्षिणं समर्पयामि। नमस्कारान् समर्पयामि।

देवाराधनमण्डलं सुरगणावासं सदामङ्गलं। कुर्तुः दर्शनमात्रतः शुभकरं तत् पञ्च भूतात्मकं॥

अर्णाद्यक्षरसंयुतं भयहरं तद् याग पुण्यार्जितं। नानामन्त्रमयं समस्त फलदं ध्यायेन्मनोनन्दनं॥
अरिष्टानि बहून्यस्मिन् दुष्कृतानि शतानि च। मण्डलानि निरीक्ष्न्ते यथा युद्धेषु कातरा:॥ *(अनुष्ठान पद्धति)*

(युद्ध भूमि में कायर जैसे देखते ही भीत हो जाते हैं, वैसे ही मण्डल को देखते ही सभी अरिष्ट दूर हो जाते हैं।) **अनया पूजया ब्रह्मादि मण्डल देवता: प्रीयन्तां** यहाँ पर सर्वतोभद्र मण्डल पूजन संपन्न हुआ।

प्रधान देवता महाविष्णु षोडशोपचार पूजन

ध्यानम्—(पुष्प हाथ में लेकर ध्यान करें) **विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।**
अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥ ॐ नमो नारायणाय।

आवाहन—ॐ स॒हस्र॑बाहुः पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात्। स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम्॥ (अथर्ववेद १९.६.१)
ॐ हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रज॒तस्र॑जाम्। च॒न्द्रां हि॒रण्य॑मयीं ल॒क्ष्मीं जा॑तवेदो म॒ आव॑ह॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

सपरिवार श्री महाविष्णावे नम:, आवाहयामि आवाहनं समर्पयामि।

आसनम्—ॐ त्रि॒भिः प॒द्भिर्द्याम॑रोह॒त्पाद॑स्ये॒हाभ॑व॒त्पुन॑:। तथा॒ व्य॑क्राम॒द्विष्व॑ङशनानश॒ने अनु॑॥ *(अथर्ववेद १९.६.२)*
ॐ तां म॒ आव॑ह जातवेदो ल॒क्ष्मीमन॑पगामिनी॑म्। यस्यां॒ हिर॑ण्यं॒ विन्दे॑यं॒ गामश्वं॒ पुरु॑षान॒हम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णावे नम:,। आसनं समर्पयामि।

पाद्यम्— ॐ ताव॑न्तो अस्य महि॒मान॒स्ततो॒ ज्यायाँ॑श्च॒ पूरु॑षः। पादो॑ऽस्य॒ विश्वा॑ भूतानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि॥ *(अथर्ववेद १९.६.३)*

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णावे नमः,। पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

अर्घ्यं— ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह॥ *(अथर्ववेद १९.६.४)*

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहो पह्वये श्रियम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)* ॐसपरिवाराय श्री महाविष्णावे नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

आचमनम्—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते॥ *(अथर्ववेद १९.६.५)*

ॐ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टा मुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

सपरिवाराय श्री महाविष्णावे नमः,। मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् (दूध)— ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।

संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ॥ *(अथर्ववेद २.२६.४)*

ॐसपरिवाराय श्री महाविष्णावे नमः,। पयः स्नानं समर्पयामि।

शुद्ध जल—ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।

भुवे भवेनातिं भुवे भवस्वमाम् भुवोद्भवाय नमः ॥ (यजुर्वेद-महानारायणोपनिपत् आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि

दहि— ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवाजिनः । सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ (अथर्ववेद २०.१३७.३)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । दधि स्नानं समर्पयामि ।

शुद्ध जल—ॐ वामदेवाय नमो ज्येष्ठाय नमःश्रेष्ठाय नमो रुद्राय नमः कालाय नमःकालविकरणाय
नमोबलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः । (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं सपर्मयामि ।

घी— ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे ।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने ॥ (अथर्ववेद ७.८२.६)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । घृतस्नानं समर्पयामि ।

शुद्ध जल—ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोर तरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि ।

मधु (शहद)—ॐ मधुमान् भवति मधुमदस्याहार्यं भवति । मधुमतो लोकान् जयति य एवं वेद ॥ (अथर्ववेद ९.१.२३)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । मधु स्नानं समर्पयामि ।

शुद्ध जल—ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ *(यजुर्वेद-महानारायणोपनिषत्-आरण्यक)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं सपर्पयामि ।

शर्करा (शक्कर)—ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ *(अथर्ववेद ५.२.३)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शर्करा स्नानं समर्पयामि ।

शुद्ध जन—ॐ ईशानस्सर्वं विद्यानामीश्वरस्सर्वं भूतानां ब्रह्माधिपतिर्ब्रह्मणो अधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ *(यजुर्वेद-महानारायणोपनिषत्-आरण्यक)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि ।

फल— ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत । संमातर इव दुह्रामस्मा अरिष्टतातये ॥ *(अथर्ववेद ८.७.२७)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । फल स्नानं समर्पयामि ।

शुद्धोदक—ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ *(अथर्ववेद १.५.३)*

ॐ ब्राह्मणो स्य मुखमासीद्बाहू राजन्यो भवत् । मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ *(अथर्ववेद १९.६.६)*

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदंतु मायांतरा याश्च बाह्या अलक्ष्मीः। (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः,। शुद्धदक स्नानं समर्पयामि।

वस्त्र— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ (अथर्ववेद १९.६.७)
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः,। वस्त्रं समर्पयामि।

यज्ञोपवीतं—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरास्तात्। आयुष्यमग्रयं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)
ॐ क्षुत् पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः,। यज्ञोपवीतं समर्पयामि।

आभरण—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।
तत् त्वां चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

ॐसपरिवाराय श्री महाविष्णावे नमः,। आभरणं समर्पयामि।

गन्ध— ॐ गंधं द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नाभ्यां आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ (अथर्ववेद १९.६.८)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । गन्धं समर्पयामि।

अक्षत— ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ (अथर्ववेद २०.९२.५)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । अक्षतान् समर्पयामि।

पुष्पाणि— ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये॥ (अथर्ववेद ८.७.२७)

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णवे नमः, । पुष्पाणि समर्पयामि।

प्रथमावरण पूजनम्— पूर्वादिक्रमेण ॐ विमलायै नमः १। ॐ उत्कर्षिण्यै नमः २। ॐ ज्ञानायै नमः ३। ॐ क्रियायै नमः ४। ॐ योगायै नमः ५। ॐ प्रह्व्यै नमः ६। ॐ सत्यायै नमः ७। ॐ ईशानायै नमः ८। मध्ये ॐ अनुग्रहायै नमः ९।

द्वितीयावरण पूजनम्— ॐ ब्राह्म्यै नमः। पूर्वे ॐ माहेश्वर्यै नमः। आग्नेय दिशि। ॐ कौमार्यै नमः। दक्षिण दिशि। ॐ वैष्णव्यै नमः। नैऋत्यां दिशि। ॐ वाराह्यै नमः पश्चिम दिशि। ॐ इन्द्राण्यै नमः। वायव्यां दिशि। ॐ चामुण्डायै नमः। उत्तरस्यां दिशि। ॐ गिरिजायै नमः ऐशान्यां दिशि। (अनुष्ठान पद्धति)

तृतीयावरण पूजनम्— ॐ इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावत वाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवारायश्री

महाविष्णुमूर्ति पार्षदाय नमः। ॐअग्नये तेजोधिपतये पिंगलवर्णाय शक्ति हस्ताय मेष वाहनाय सशक्तिकाय सांगाय सायुधाय स वाहनाय स परिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐयमाय प्रेताधिपतये कृष्णावर्णाय दण्ड हस्ताय महिष वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐनिषतये रक्षोधिपतये रक्तवर्णाय खङ्ग हस्ताय नरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐवरुणाय जलाधितये कुंदवर्णाय पाशहस्ताय मकरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय महाविष्णुमूर्ति पार्षदाय नमः। ॐवायवे प्राणाधिपतये धूम्रवर्णाय अंकुश हस्ताय हरिणवाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐसोमाय नक्षत्राधिपतये शुक्लवर्णाय गदा हस्ताय अश्व वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐईशानाय विद्याधिपतये स्फटिकवर्णाय त्रिशूल हस्ताय वृषभ वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्तिपार्षदाय नमः। ॐअनंताय नागाधिपतये क्षीरवर्णाय चक्रहस्ताय गरुड वाहनाय स शक्तिाकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। नैर्ऋत्यं एवं पश्चिम दिशा के बीच में अनन्त का पूजन करें। ॐब्रह्मणे लोकाधिपतये कंजवर्णाय पषहस्ताय हंसवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। पूर्व एवं ईशान दिशा के बीच में ब्रह्मा जी का पूजन करें। *(अनुष्ठान पद्धति)*

चतुर्थावरणपूजनम्—ॐवज्राय नमः। (पूर्व में) ॐशक्त्यै नमः। (आग्नेय में) ॐदण्डाय नमः। (दक्षिण में) ॐखड्गाय नमः। (नैऋत्य) ॐपाशाय नमः। (पश्चिम में) ॐअंकुशाय नमः। (वायव्य में) ॐगदायै नमः। (उत्तर में) ॐत्रिशूलाय नमः। (ईशान में) ॐचक्राय न मः। (पश्चिम नैऋत्य के बीच में) ॐपद्माय नमः। (पूर्व ईशान के बीच में) *(अनुष्ठान पद्धति)*

अष्टोत्तर शतनाम पूजा

ॐ विष्णवे नमः। ॐ लक्ष्मीपतये नमः। ॐ कृष्णाय नमः। ॐ वैकुण्ठाय नमः। ॐ गरुडध्वजाय नमः। ॐ जगन्नाथाय नमः। ॐ परब्रह्मणे नमः।ॐ वासुदेवाय नमः। ॐ त्रिविक्रमाय नमः। ॐ दैत्यान्तकाय नमः। ॐ मधुरिपवे नमः। ॐ तार्क्ष्यवाहनाय नमः। ॐ सनातनाय नमः। ॐ नारायणाय नमः। ॐ पद्मनाभाय नमः। ॐ हृषीकेशाय नमः। ॐ सुधाप्रदाय नमः। ॐ माधवाय नमः। ॐ पुण्डरीकाक्षाय नमः। ॐ स्थितिकर्त्रे नमः। ॐ परात्पराय नमः। ॐ वनकालिने नमः। ॐ यज्ञ रूपाय नमः। ॐ चक्र पाणये नमः। ॐ गदाधराय नमः। ॐ उपेन्द्राय नमः। ॐ केशवाय नमः। ॐ हंसाय नमः। ॐ समुद्रमथनाय नमः। ॐ हरये नमः। ॐ गोविन्दाय नमः। ॐ ब्रह्मजनकाय नमः ॐ कैटभासुरमर्दनाय नमः। ॐ श्रीधराय नमः। ॐ कामजनकाय नमः ॐ शेषाशायिने नमः। ॐ चतुर्भजाय नमः। ॐ पाञ्चजन्यधराय नमः। ॐ श्रीमते नमः। ॐ शार्ङ्गपाणये नमः। ॐ जनार्दनाय नमः। ॐ पीताम्बरधराय नमः। ॐ देवाय नमः। ॐ सूर्यचन्द्रविलोचनाय नमः। ॐ मत्स्यरूपाय नमः। ॐ कूर्मतनवे नमः। ॐ क्रोडरूपाय नमः। ॐ नृकेसरिणे नमः। ॐ वामनाय नमः। ॐ भार्गवाय नमः। ॐ रामाय नमः। ॐ बलिने नमः। ॐ कल्किने नमः। ॐ हयाननाय नमः। ॐ विश्वम्भराय नमः। ॐ शिशुमाराय नमः। ॐ श्रीकराय नमः। ॐ कपिलाय नमः। ॐ ध्रुवाय नमः। ॐ दत्तात्रेयाय नमः। ॐ अच्युताय नमः। ॐ अनन्ताय नमः। ॐ मुकुन्दाय नमः। ॐ दधिवामनाय नमः। ॐ धन्वन्तरये नमः। ॐ श्रीनिवासाय नमः। ॐ प्रद्युम्नाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ श्रीवत्सकौस्तुभधराय नमः। ॐ मुरारातये नमः। ॐ अधोक्षजाय नमः। ॐ ऋषभाय नमः। ॐ मोहिनी रुप धारिणे नमः। ॐ सङ्कर्षणाय नमः। ॐ पृथवे नमः। ॐ क्षीराब्धिशायिने नमः। ॐ भूतात्मने नमः। ॐ अनिरुद्धाय नमः। ॐ भक्तवत्सलाय नमः। ॐ नराय नमः। ॐ गजेन्द्रवरदाय नमः। ॐ त्रिधाम्ने नमः। ॐ भूतभावनाय नमः। ॐ श्वेतद्वीपसुवास्तव्याय नमः। ॐ सनकादिमुनिध्येयाय नमः। ॐ भगवते नमः। ॐ शङ्करप्रियाय नमः। ॐ नीलकान्ताय नमः। ॐ धराकान्ताय नमः। ॐ वेदात्मने नमः। ॐ बादरायणाय नमः। ॐ भागीरथीजन्मभूमि पादपद्माय नमः। ॐ सतांप्रभवे नमः। ॐ स्वभुवे नमः। ॐ विभवे नमः। ॐ घनश्यामाय नमः। ॐ जगत्कारणाय नमः। ॐ अव्ययाय नमः। ॐ बुद्धावताराय नमः। ॐ शान्तात्मने नमः। ॐ लीलामानुष

विग्रहाय नमः। ॐ दामोदराय नमः। ॐ विराड्रूपाय नमः। ॐ भूतभव्यभवत्प्रभवे नमः। ॐ आदिदेवाय नमः। ॐ प्रह्लादपरिपालकाय नमः। ॐ श्रीमहाविष्णवे नमः। अष्टोत्तर शतनाम पूजां समर्पयामि।

धूप— **ॐ वनस्पति रसोत्पन्नो गंधाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥**

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ *(अथर्ववेद १९.६.१०)*

ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महाविष्णवे नमः, धूपं आघ्रापयामि। *(अनुष्ठान पद्धति)*

दीपम्—आज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये॥ *(अथर्ववेद १९.६.११)*

ॐ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महाविष्णवे नमः दीपं दर्शयामि। धूपदीपानंतरं आचमनीयं समर्पयामि।

नैवेद्यम्—देवस्याग्रे स्थलं संशोध्य गोमयेन मण्डलं कृत्वा तत्र शुद्धं पात्रं न्यस्य अभिघार्य निर्मलं हविः तदुपरि न्यस्य आज्येन द्रवीभूतं कृत्वा ''ॐ भूर्भुवः स्वः इति गायत्र्या प्रोक्ष्य वायु बीजं जप्त्वा निवेद्यान्नं संशोध्य दक्षिणहस्ते अग्निबीजं विलिख्य तेन हस्तेन संदह्य वामहस्ते अमृत बीजं विलिख्य तेन हस्तेन हविराप्लाव्य सुरभिमुद्रां बध्वा अमृतमयं भावयित्वा मल धातु रसांशं विभाज्य देवस्य निवेद्य ग्रहणेच्छां कुर्यात्। **''सत्यं त्वर्तेन परिषिञ्चामि''** इत्यनेन परिषिच्य हस्तभ्यां पुष्पैः देवस्य जिह्वार्चीरुचिं निवेद्ये निपात्य निवेदयामि भवते जुषाणेदं हविर्विभो इति वामहस्तेन ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादि मुद्राः प्रदर्शयेत्। अन्नात् मलांशं धात्वंशं च परित्यज्य रसांशं देवस्य वदनार्चिषि समर्पयेत्। वं अबात्मना इति नैवेद्य मुद्रां प्रदर्शयेत्। नैवेद्य सारं

रससमर्पणात् जातं सुधांशं देवे समर्प्य अंजलिमुद्रा बध्वा नैवेद्यसारसमर्पित जातामृतमय सुधांशुना पुनः पुनः वर्धितं देवं हृन्मूर्ति देवं ध्यायन् स्व स्व मूलमंत्र यथा शक्ति जप्त्वा।

कलश के आगे स्थल शुद्धि कर गोमय से शुद्धि कर चतुरस्र मण्डल को बनाकर उस पर शुद्ध पात्र को रखें। पात्र में थोडा सा घी डालें। उस पात्र में निर्मलहविस् (नैवेद्य पदार्थ को) को घी पर रखें। उस हविस् को घीं से भिगोयें।

गायत्री मंत्र से नैवेद्य का प्रोत्क्षण करें—"यं यं यं" इस वायुबीज को जपकर हविस् को शुद्ध करें। दाहिने हाथ में (रं) अग्नि बीज को लिखकर उस अग्नि से हविस् में विद्यमान कश्मलों को जलाऐं (कल्पना करें)। बायें हाथ में अमृत बीज (वं) को लिखकर उस हाथ से हविस् को शुद्ध करें (घोने की कल्पना करें) ॐनमो नारायणाय। इस मन्त्र का आठ बार जप करें। हविस् को मंत्रमय एवं अमृतमय छोने की कल्पना करें। सुरभि मुद्रा से अमृतमय हुआ है मानकर मलांश, धातु का अंश एवं रसांश को अलग अलग करने की कल्पना करें। देवता को नैवेद्य ग्रहण करने की इच्छा उत्पन्न करती चाहिये।

"सत्यं त्तेंन परिषिचामि" इससे परिषिञ्चन करें। दोनों हाथों में पुष्प लेकर देवता का जीभ नैवेद्य तक पहुँचने का चिन्तन करें।

"निवेदयामि भवते जुषाणोदं हविर्विभो" कहकर नैवेद्य स्वीकार करने की प्रार्थना करते हुए। बायें हाथ से ग्रास मुद्रा (जैसे बछडे को घास देते है) को दिखाकर दाहिने हाथ से प्राणाय स्वाहा-अङ्गुष्ठ कनिष्ठिका मिलाकर अपानाय स्वाहा-अङ्गुष्ठ एवं तर्जनी मिलाकर व्यानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर उदानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर समानाय स्वाहा। सभी अङ्गुलियों को मिलाकर। अन्त से मलांश एवं धातु के अंध को अलग कर केवल रसांश को अर्पित करने की कल्पना करें।

"वं अबात्मना नैवेद्यं कल्पयामि" कहकर नैवेद्य मुद्रा का प्रदर्शन करें (अङ्गुष्ठ एवं अनामिका मिलाने से नैवेद्य मुद्रा)। नैवेद्य का सार जो रसांश था उसका भी सार अमृत का जो अंश है उसे देवता को समर्पित कर, हाथ जोडकर, नैवेद्य के सार अमृत से भगवान् को बढते हुए मानकर उसे हृदय में स्थित

मानकर यथाशक्ति ''ॐनमो नारायणाय''—इस मूल मंत्र का जप करें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ (अथर्ववेद ५.२.३)

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

यथा संभव नैवेद्यं निवेदयामि। अमृतापिधानमसि कहकर उत्तरापोशन देवें। हस्तप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूल—ॐ तस्मादश्वा अजायन्त ये च के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ (अथर्ववेद १९.६.१२)

पूगीफल समायुक्तं नागवल्या दलैर्युतं। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐसपरिवाराय श्री महाविष्णावे नमः। क्रमुक तांबूलं समर्पयामि।

नीराजन (आरति)—ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ (अथर्ववेद १९.६.१३)

ॐ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥ (अथर्ववेद ६.७३.१)

ॐसपरिवाराय श्री महाविष्णावे नमः। मङ्गल नीराजनं समर्पयामि।

मंत्रपुष्प—ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ (अथर्ववेद १९.६.१)

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ (अथर्ववेद १९.६.१६)

ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्तांश्चक्रे वायव्यां नारण्या ग्राम्याश्च ये॥ (अथर्ववेद १९.६.१४)

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णवे नमः। मंत्रपुष्पं समर्पयामि।

प्रदक्षिणा नमस्कार—यानि कानि च पापानि जन्मांतर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे॥ (देवपूजा-स्मृति संग्रह)

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥ (अथर्ववेद १९.६.१५)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विंदेयं पुरुषानहम्॥

(पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णवे नमः। प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्य—ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यम्। (कहकर तीन बार पुष्पमिश्रित जल छोड़ें।)

सर्वोपचार पूजनम्—ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आंदोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचार पूजां समर्पयामि।

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि॥ (अथर्ववेद १९.६.१६)

ॐ यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ (ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णवे नमः। सर्वोपचार पूजां समर्पयामि।

प्रार्थना—विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ (पौराणिकम्)

ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना॥ (श्री भगवद्गीते) ॐ सपरिवाराय श्री महा विष्णवे नमः। अनेन पूजनेन सपरिवारः श्री महा विष्णुः प्रीयताम्। षोडशोपचार पूजनं संपूर्णम्।

नवग्रह षोडशोपचार पूजनम्

ध्यायामि। ध्यानं समर्पयामि।

ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ (अथर्ववेद १९.६.१)

ॐ हिरण्य वर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, आवाहनं समर्पयामि।

ॐ त्रिभिः पद्भिर्द्यामरोहत्पादस्येहाभवत्पुनः। तथा व्यक्रामद्विष्वङशनानशने अनु॥ (अथर्ववेद १९.६.२)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, आसनं समर्पयामि।

ॐ तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ (अथर्ववेद १९.६.३)

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवी मुपह्वये श्रीर्मा देवी जुषताम् ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह ॥ (अथर्ववेद १९.६.४)

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रा ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्। (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहितदेवताभ्यो नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते ॥ (अथर्ववेद १९.६.५)

ॐ चन्द्रां प्रभासां यशसा ज्वलन्ती श्रियं लोके देवजुष्टामुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः। मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् पयः (दूध)—ॐ सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।

संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ॥ (अथर्ववेद २.२६.४)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पयः स्नानं समर्पयामि। दूध से स्नान के बाद शुद्धोदक स्नान

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ *(अथर्ववेद १.५.१)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः। पयः स्नानांते शूद्धोदकस्नानं समर्पयामि।

दधि (दहि)—**ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥** *(अथर्ववेद २०.१३७.३)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, दधि स्नानं समर्पयामि। दहि स्नान के बाद शुद्धोदक स्नान

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐ नवग्रह मंडलस्थ आवाहितदेवताभ्यो नमः, दधि स्नानांते शुद्धोदक स्नानं समर्पयामि।

घृत (घी)—**ॐ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।**
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने॥ *(अथर्ववेद ७.८२.६)*

ॐ नवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, घृत स्नानं समर्पयामि। घी स्नान के बाद शुद्धोदक स्नान

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

ॐ नवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, घृतस्नानांते शुद्धोदक स्नानं समर्पयामि।

मधु (शहद)—**ॐ मधुमान् भवति मधुमदस्याहार्यं भवति। मधुमतो लोकान् जयति य एवं वेद॥** *(अथर्ववेद ९.१.२३)*

ॐ नवग्रहमण्डलस्थ आवाहितदेवताभ्यो नमः, मधु स्नानं समर्पयामि।

ॐ ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्॥ *(अथर्ववेद १.५.४)*

ॐ नवग्रह मण्डलस्थ आवाहितदेवताभ्यो नमः, मधु स्नानान्ते शुद्धोदकस्नानं समर्पयामि।

शर्करा (शक्कर)—ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ (अथर्ववेद ५.२.३)

ॐ नवग्रह मंडलस्थ आवाहित देवताभ्यो नमः, शर्करास्नानं समर्पयामि।

ॐ अप्सु मे सोमो अब्रवीदुन्तर्विश्वानि भेषजा। अग्निं चं विश्वशंभुवम् ॥ (अथर्ववेद १.६.२)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि।

ॐ पुष्पंवतीः प्रसूमतीः फलिनीरफला उत। संमातरं इव दुह्रामस्मा अरिष्टतातये ॥ (अथर्ववेद ८.७.२७)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, फलस्नानं समर्पयामि।

ॐ उच्चा पतंन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्दुदत्रिः ॥ (अथर्ववेद १३.२.३६)

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ (अथर्ववेद २०.१३७.४)

ॐ अग्निवासाः पृथिव्यं सितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु ॥ (अथर्ववेद १२.१.२१)

ॐ कपृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजसातये।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपतये ॥ (अथर्ववेद २०.१३७.२)

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु ॥ (अथर्ववेद ७.५१.१)

ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पिपर्तु।

अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च ॥ (अथर्ववेद ६.५३.१)

ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।

अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु ॥ (अथर्ववेद ७.६९.१)

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ (अथर्ववेद २०.१२४.१)

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥ (अथर्ववेद २०.२६.६)

ॐ ब्राह्मणो स्य मुखमासीद्बाहू राजन्यो भवत्। मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ (अथर्ववेद १९.६.६)

ॐ आदित्यवर्णो तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।

तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, शुद्धोदकस्नानं सपर्मयामि। शुद्धोदक स्नान मंत्रों के तीन प्रकार प्रचलित है।

प्रथम क्रम में—९ ग्रह- ९ अधिदेवता-९ प्रत्यधिदेवता ६ कर्म साद्गुण्य देवता, ८ क्रतु संरक्षक देवता कुल मिलाकर ४१ देवताओं का मंत्र पठन करके शुद्धोदक स्नान करना चाहिये। सभी मंत्र आवाहन में है। नवग्रह यागादियों में इसका प्रयोग होता है। जहाँ कलश पूजन के लिए ही एक पण्डित नियुक्त हो वहाँ भी इसे कर सकते हैं।

द्वितीय क्रम में—९ ग्रह+९ अधिदेवता+९ प्रत्यधिदेवता कुलमिलाकर २७ देवताओं का मंत्र पठन करके शुद्धोदक स्नान कराना चाहिये।

तृतीय क्रम में—९ ग्रहों का मंत्र पठन करके शुद्धोदक स्नान कराना चाहिये।

वस्त्रम्— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत॥ (अथर्ववेद १९.६.७)

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, वस्त्रं समर्पयामि।

यज्ञोपवीतम्—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, यज्ञोपवीतं समर्पयामि, आचमनं समर्पयामि।

आभरणम्—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।

तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, आभरणं समर्पयामि।

गन्धम्— ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ (अथर्ववेद १९.६.८)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, गन्धं समर्पयामि।

अक्षतम्—ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्णवर्चत॥ (अथर्ववेद २०.९२.५)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, अक्षतान् समर्पयामि।

पुष्पाणि—ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये॥ (अथर्ववेद ८.७.२७)

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ (ऋग्वेद – पञ्चम मण्डलस्य परिशिष्टम्

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, पुष्पाणि समर्पयामि।

नाम पूजा

ॐ सहस्रकिरणाय नमः। ॐ सूर्याय नमः। ॐ तपनाय नमः। ॐ सवित्रे नमः। ॐ रवये नमः। ॐ विकर्तनाय नमः। ॐ जगच्चक्षुषे नमः। ॐ द्युमणये नमः। ॐ तिग्मदीधितये नमः। ॐ त्रयीमूर्तये नमः। ॐ द्वादशात्मने नमः। ॐ ब्रह्माविष्णुशिवात्मकाय नमः। ॐ आदित्याय नमः। ॐ अग्नये नमः। ॐ रुद्राय नमः। ॐ चन्द्रमसे नमः। ॐ अद्भ्यो नमः। ॐ गौर्यै नमः। ॐ अङ्गारकाय नमः। ॐ भूम्यै नमः। ॐ स्कन्दाय नमः। ॐ बुधाय नमः। ॐ विष्णवे नमः। ॐ पुरुषाय नमः। ॐ बृहस्पतये नमः। ॐ इंद्राय नमः। ॐ ब्रह्मणे नमः। ॐ शुक्राय नमः। ॐ इंद्राण्यै नमः। ॐ इंद्राय नमः। ॐ शनैश्चराय नमः। ॐ प्रजापतये नमः। ॐ यमाय नमः। ॐ राहवे नमः। ॐ सर्पेभ्यो नमः। ॐ मृत्यवे नमः। ॐ केतवे नमः। ॐ ब्रह्मणे नमः। ॐ चित्रगुप्ताय नमः। ॐ विनायकाय नमः। ॐ दुर्गायै नमः। ॐ क्षेत्रपालाय नमः। ॐ वायवे नमः। ॐ आकाशाय नमः। ॐ अश्विभ्यां नमः। ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, नाम पूजां समर्पयामि।

धूपः— वनस्पति रसोत्पन्नो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ (अथर्ववेद १९.६.१०)

ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ (ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, धूपं आघ्रापयामि।

दीपं— साज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापह॥

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये॥ (अथर्ववेद १९.६.११)

ॐ आपः स्रजन्तु स्निग्धानि चिक्लीत व स मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले॥ (ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, दीपं दर्शयामि। धूपदीपानन्तरं आचमनीयं समर्पयामि।

नैवेद्यं—नैवेद्य रखने के स्थल पर मण्डल बनायें (चतुरस्र) नैवेद्य को मण्डल पर रखने के बाद मंत्र पढ़ें। विश्वामित्र ऋषिः देवी गायत्री छन्दः, सविता देवता निवेदने विनियोगः। एक बार नैवेद्य पर गायत्री मंत्र से प्रोक्षण करें। सत्यं त्वर्तेन परिषिञ्चामि इस मंत्र से दिन में एवं **ऋतं त्वा सत्येन परिषिञ्चामि**। इस मंत्र से रात्रि में परिषिञ्चन करें।

यथा संभव नैवेद्यं निरीक्षस्व कहकर प्रार्थना कर **अमृतोपस्तरणमसि** मन्त्र से जल छोड़ें। बायें हाथ से ग्रास मुद्रा (जैसे बछड़े को घास खिलाते हैं) एवं दाहिने हाथ से निम्न मुद्राओं से देवताओं को नैवेद्य अर्पण करें। मन में कल्पना करें कि भगवान को खिला रहे हैं। प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा। ॐ घृणिः सूर्य आदित्यः-इस मूल मंत्र को आठ बार जप करें।

ॐ स्वादोःस्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥ (अथर्ववेद ५.२.३)

ॐ आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं पि॒ङ्ग॒लां प॑द्म॒मा॒लि॒नी॑म्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥ (ऋग्वेद - पञ्चम मण्डलस्य परिशिष्टम्)

यथा सम्भवं नैवेद्यं निवेदयामि। अमृतापिधानमसि। कहकर उत्तरापोशण जल दें। उत्तरापोशनार्थं जलं समर्पयामि। हस्तप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूलम्—पूगीफलसमायुक्तं नागवल्ल्यादलैर्युतम्। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ तस्मा॒दश्वा॑ अजायन्त॒ ये च॒ के चो॑भ॒याद॑तः। गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑॥ (अथर्ववेद १९.६.१२)

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, अमुक ताम्बूलं समर्पयामि। ताम्बूल के पश्चात् नीराजन करें।

ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॒त॒ ऋच॒ः सामा॑नि जज्ञिरे। छन्दो॑ ह जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत॥ (अथर्ववेद १९.६.१३)

ॐ एह या॑तु वरु॑णः॒ सोमो॑ अ॒ग्निर्बृह॒स्पति॒र्वसु॑भि॒रेह या॑तु।

अ॒स्य श्रिय॑मुप॒संया॑त॒ सर्व॑ उ॒ग्रस्य॑ चे॒त्तुः सम॑नसः सजाताः॥ (अथर्ववेद ६.७३.१)

ॐ नवग्रह मडलस्थ आवाहित देवताभ्यो नमः, मङ्गल नीराजनं दर्शयामि।

मन्त्र पुष्पः—ॐ उ॒च्चा पत॑न्तमरु॒णं सु॑प॒र्णं मध्ये॑ दि॒वस्त॒रणिं॒ भ्राज॑मानम्।

पश्या॑म त्वा सवि॒तार॒ं यमा॒हुरज॑स्रं॒ ज्योति॒र्यदवि॑न्दुदत्रि॑ः॥ (अथर्ववेद १३.२.३६)

ॐ सु॒तासो॒ मधु॑मत्तमा॒ः सोमा॒ इन्द्रा॑य म॒न्दिनः॑। प॒वित्र॑वन्तो अक्षरन्दे॒वान्ग॑च्छन्तु वो॒ मदा॑ः॥ (अथर्ववेद २०.१३७.४)

ॐ अ॒ग्निवा॑साः पृथि॒व्य॑सि॒तज्ञू॒स्त्विषी॑मन्त॒ं संशि॑तं मा कृणोतु॥ (अथर्ववेद १२.१.२१)

ॐ कर्पृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाधं इह सोमपतये॥ (अथर्ववेद २०.१३७.२)
ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरदघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु॥ (अथर्ववेद ७.५१.१)
ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पितर्तु।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च॥ (अथर्ववेद ६.५३.१)
ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।
अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु॥ (अथर्ववेद ७.६९.१)
ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥ (अथर्ववेद २०.१२४.१)
ॐ केतुं कृणवन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥ (अथर्ववेद २०.२६.६)
ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताश्चक्रे वायव्यां नारण्या ग्राम्याश्च ये॥ (अथर्ववेद १९.६.१४)
ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, मंत्रपुष्पं समर्पयामि।
प्रदक्षिणा नमस्कारः—यानि कानि च पापानि जन्मान्तर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिणा पदे पदे॥
ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥ (अथर्ववेद १९.६.१५)

ॐ तां म॒ आव॑ह जातवेदो ल॒क्ष्मीमन॑पगा॒मिनी॑म्। यस्या॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा॑न् वि॒न्देयं॒ पुरु॑षान॒हम्।

(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नवग्रहमण्डलस्थ आवाहित देवताभ्यो नमः, प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्यः— ॐ प्रभाकराय विद्महे दिवाकराय धीमहि। तन्नः सूर्यः प्रचोदयात्॥

ॐ अत्रिपुत्राय विद्महे अमृतोद्भवाय धीमहि। तन्नः सोमः प्रचोदयात्॥

ॐ भूमिपुत्राय विद्महे भारद्वाजाय धीमहि। तन्नः कुजः प्रचोदयात्॥

ॐ तारापुत्राय विद्महे सोमपुत्राय धीमहि। तन्नो बुधः प्रचोदयात्॥

ॐ देवाचार्याय विद्महे वाचस्पतये धीमहि। तन्नो गुरुः प्रचोदयात्॥

ॐ दैत्याचार्याय विद्महे विद्यारूपाय धीमहि। तन्नः शुक्रः प्रचोदयात्॥

ॐ सूर्यपुत्राय विद्महे शनैश्चराय धीमहि। तन्नो मंदः प्रचोदयात्॥

ॐ सैंहिकेयाय विद्महे तमोमयाय धीमहि। तन्नो राहुः प्रचोदयात्॥

ॐ ब्रह्मपुत्राय विद्महे विकृतास्याय धीमहि। तन्नः केतुः प्रचोदयात्॥

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यं, प्रसन्नार्घ्यं समर्पयामि।

सर्वोपचार पूजनम्— ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आन्दोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचारपूजां समर्पयामि।

ॐ मू॒र्ध्नो दे॒वस्य॑ बृह॒तो अं॒शवः॑ स॒प्त स॑प्त॒तीः। राज्ञः॒ सोम॑स्याजायन्त जा॒तस्य॒ पुरु॑षा॒दधि॥ *(अथर्ववेद १९.६.१६)*

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ *(ऋग्वेद-पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ नवग्रह मण्डलस्थ आवाहित देवताभ्यो नमः, सर्वोपचारपूजां समर्पयामि।

प्रार्थना— ग्रहाणामादिरादित्यो लोकरक्षणकारकः। विषमस्थानसंभूतां पीडां हरतु ते रविः॥
रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः। विषमस्थानसंभूतां पीडां हरतु ते विधुः॥
भूमिपुत्रो महातेजा जगतां भयकृत्सदा। वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु ते कुजः॥
उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः। सूर्य प्रियकरो विद्वान् पीडां हरतु ते बुधः॥
देवमन्त्री विशालाक्षः सदालोकहितेरतः। अनेक शिष्य संपूर्णः पीडां हरतु ते गुरुः॥
दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः। प्रभुस्ताराग्रहाणां च पीडां हरतु ते भृगुः॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः। मंदचारः प्रसन्नात्म पीडां हरतु ते शनिः॥
महाशिरा महावक्त्रौ दीर्घदंष्ट्रो महाबलः। अतनुश्चोर्ध्व केशश्च पीडां हरतु ते तमः॥
अनेक रूपवर्णैश्च शतशोथ सहस्त्रशः। उत्पातरूपो जगतः पीडां हरतु ते शिखी॥ *(ब्रह्मकर्म समुच्चय)*

आरोग्यं पद्मबन्धुर्वितरतु विपुलां संपदं शीतरश्मिः, भूलाभं भूमिपुत्रः सकलगुणयुतां वाग्विभूतिं च सौम्यः।
सौभाग्यं देवमन्त्री रिपुभयशमनं भार्गवः शौर्यमार्किः, दीर्घायुस्सैंहिकेयो विपुलतरयशः केतुराचन्द्रतारम्॥

शान्तिरस्तु शिवं ते अस्तु ग्रहाः कुर्वन्तु मङ्गलम्। अरिष्टानि प्रणश्यन्तु दुरितानि भयानि च। ॐ नवग्रहमण्डलस्थ देवताभ्यो नमः, प्रार्थनां समर्पयामि।

यहाँ पर नवग्रह पूजन समाप्त हुआ। मण्डप में कलशों का पूजन भी संपूर्ण हुआ।

षष्ठ दिन द्वितीय प्रहर

देह शुद्धि—ॐ स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः॥ (अथर्ववेद १८.२.१९)

इस मन्त्र से जल प्रोक्षण करने से भूमि शुद्ध होती है।

देह शुद्धि—ॐ या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः॥ (अथर्ववेद ११.८.३०)

आचमन मन्त्र—ऋग्वेदाय स्वाहा। यजुर्वेदाय स्वाहा। सामवेदाय स्वाहा। (स्वाहा मन्त्र से जल पीना चाहिये।) अथर्ववेदाय नमः। इतिहास पुराणेभ्यो नमः। अग्नये नमः। वायवे नमः। प्राणाय नमः। सूर्याय नमः। चन्द्राय नमः। दिग्भ्यो नमः। इन्द्राय नमः। पृथिव्यै नमः। अन्तरिक्षाय नमः। दिवे नमः। ब्रह्मणे नमः। विष्णवे नमः। सदाशिवाय नमः। द्विराचम्य .. इस प्रक्रिया को दुबारा करना चाहिये।

पवित्र धारणम्— ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः॥ (अथर्ववेद २०.१३७.४)

ॐभूर्भुवः स्वः कहकर जल सिञ्चन करें॥ (इन मन्त्रों से पवित्र शुद्धिकर धारण करना चाहिये आसन के नीचे दो कुश डाल लेना चाहिये।)

प्राणायाम—प्रणवस्य परब्रह्म ऋषिः। दैवी गायत्री छन्दः। परमात्मा देवता। प्राणायामे विनियोगः।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्। ॐ आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवस्वरोम्। (ऋग्वेद ३.६२.१०)

(रेखङ्कित मन्त्र को तीन बार कुम्भक में जप करना चाहिये।)

आसन शुद्धि—ॐ स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथः।' *(१५ मन्त्र-२२ सूक्त-प्रथम मराडल)* इस मन्त्र से जल प्रोक्षरा करने से भूमि शुद्ध होती है।

शिखाबन्धनम्—

ऊर्ध्वकेशि विरूपाक्षि मांसशोरिात भक्षरो। तिष्ठ देवि शिखाबन्धे चामुराडे ह्यपराजिते॥ *(ब्रह्मकर्म समुच्चय)*

(इस मन्त्र से शिखाबन्धन करना चाहिये।)

महा संकल्प —..........

गुरु प्रार्थना —

नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः।
आचार्य सिद्धेश्वर पादुकाभ्यो नमोऽस्तु लक्ष्मीपति पादुकाभ्यः॥ *(शृङ्गेरी मठीय आचार्य प्रार्थनम्)*

श्री गुरु परमगुरु परमेष्ठी गुरु सद्गुरु पादुकाभ्यो नमो नमः। हम लोग ब्रह्मानन्दं गुरु तं नमानि। गुरु परम्परा को भी बोल सकते हैं। कर सकते हैं। हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ ईश्वर के रुष्ट होने पर गुरुजी रक्षा करते हैं एवं गुरुजी के कुपित होने पर कोई भी रक्षक नहीं है।

भूतोच्चाटन मन्त्र—

ॐ अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरगा)*
ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ *(ब्रह्मकर्म समुच्चय-आसन विधि प्रकरगा)*
ॐ तीक्ष्णदंष्ट्रमहाकाय कल्पान्ते दहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि॥ *(ब्रह्मकर्म समुच्चय)*

इति भैरवं नमस्कृत्य। (इन मन्त्रों से भूतोच्चाटन कर भैरव जी से यज्ञ रक्षा की प्रार्थना करते हैं।)

गणपति प्रार्थना—ॐ इमा या ब्रह्मणस्पते विषूचीर्वात ईरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि।

स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु॥ *(अथर्ववेद १९.८.६)* इन मन्त्रों से गणपति प्रार्थना कर पुष्पाक्षत छोड़ना चाहिये।

जल कलश पूजनम्—कलश में पूर्ण जल भरकर रखना चाहिये। फिर उसमें गन्ध अक्षत पुष्प कलश के अन्दर डालना चाहिये एवं बाहर भी चारों ओर लगाना चाहिये। गायत्री मन्त्र से तीन बार कलश छूकर जप करना चाहिये।

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदस्सामवेदोह्यथर्वणः॥
अङ्गैश्चसहितास्सर्वे कलशाम्बुसमाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
आयान्तु देवपूजार्थं दुरितक्षयकारकाः। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिंकुरु॥ *(ब्रह्मकर्म समुच्चय-देवपूजा प्रकरण)*
ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु॥ *(अथर्ववेद ७.८३.१)*
ॐ एमां कुमारस्तरुण आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः॥ *(अथर्ववेद ३.१२.७)*
श्री वरुण मूर्तये नमः।

(इन मन्त्रों को कलश छूकर पाठ करना चाहिये।)

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृत कलशोद्यत्पंकजाभीत्यभीष्टाम्।

विधि हरिहररूपां सेन्दुकोटीरचूडां भसितसितदुकूलां जाह्नवीं तां नमामि ॥ *(स्मृति संग्रह)*

(इस मन्त्र से कलश में गङ्गाजी का ध्यान करना चाहिये।)

आत्माराधनम्—हृदि स्थितं पंकजमष्टपत्रं सकेसरं कर्णिक मध्यनालं ॥
अङ्गुष्ठमात्रं मुनयो वदन्ति ध्यायेत् च विष्णुं पुरुषं पुराणम् ॥
हृदयकमलमध्ये सूर्यबिम्बासनस्थं सकलभुवनबीजं सृष्टिसंहारहेतुम्।
निरतिशयसुखात्म ज्योतिषं हंसरूपं परमपुरुषमाद्यं चिन्तयेदात्ममूर्तिम् ॥
आराधयामि मणि सन्निभमात्मलिङ्गम्। मायापुरीरहृदय पंकज सन्निविष्टम् ॥
श्रद्धा नदी विमलचित्त जलभिषेकै। र्नित्यं समाधि कुसुमैर्न पुनर्भवाय ॥
देहो देवालयः प्रोक्तो जीवो हंसः सदाशिवः। त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥
स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकम्। तावत् त्वं प्रीति भावेन बिम्बेस्मिन् सन्निधिं कुरु ॥ (देवपूजा)

ॐआत्मने नमः। ॐअन्तरात्मने नमः। ॐपरमात्मने नमः। ॐज्ञानात्मने नमः। आत्मपूजां समर्पयामि। इससे आत्मशुद्धि होती है। (इन मन्त्रों को कहकर अपने सिर पर अक्षत डाल लेवें।)

हवन कुण्ड में

स्थंडिल शुद्धिः—तद् गोमयेन प्रदक्षिणामुपलिप्य दक्षिणे उदीच्यां द्वे, प्रतीच्यां चतुः, प्राच्यामर्ध इत्यंगुलानित्यक्त्वा दक्षिणोपक्रमां उदक्संस्थां प्रादेशमात्रां एकां लेखां तस्या दक्षिणोत्तरयोः प्रागायते पूर्वरेखया असंसृष्टे प्रादेशसंमिते

द्वे लेखे लिखित्वा तयोर्मध्ये परस्परं असंसृष्टाः उदक्संस्थाः प्रागायताः प्रादेश संमिताः तिस्रः इति षड्लेखाः यज्ञीय शकलमूलेन दक्षिण हस्तेन उल्लिख्य लेखासु तच्छकलं उदगग्रं निधाय स्तंडिलं अद्भिः अभ्युक्ष्य शकलं भंक्त्वा आग्रेय्यां निरस्य पाणिं प्रक्षाल्य वाग्यतः भवेत्।

स्थण्डिल को पहले गोमय से लेपना चाहिये। स्थण्डिल (वेदी) में दक्षिण में आठ अंगुल, उत्तर में दो अंगुल, पश्चिम में चार अंगुल, पूर्व में आधा अंगुल छोड़कर दक्षिण से प्रारम्भकर उत्तर में समाप्त हो ऐसे १२ अंगुल चौक बनाना चाहिये। फिर बीच में दक्षिण से उत्तर एक रेखा खींचना चाहिये। १२ अंगुल फिर दक्षिण से प्रारम्भ कर एक दक्षिण में एवं एक उत्तर में दो रेखायें पश्चिम से पूर्व की ओर खीचें १२ अंगुल बी फिर दक्षिण से प्रारम्भकर दक्षिण में समाप्त होने वाले पश्चिम से पूर्व में समाप्त होने वाले तीन रेखायें। (१२ अंगुल) खीचें। (प्रादेश प्रमाण-लगभग १२ अंगुल) (ब) इसे यज्ञ में प्रयुक्त अश्वत्थादि समित् के अग्रभाग से इन लकीरों को खीचना चाहिये। दाहिने हाथ से लिखें। (रेत पर) खीचने वाले समित् को उसके ऊपर उत्तर उत्तराभिमुख रखें। फिर स्थण्डिल (stage) को जल से अभ्युक्षण करना चाहिये। (अभ्युक्षण मतलब मुष्टि में जल लेकर सिञ्चन करना चाहिये।) फिर उस समित् को (लकीर खीचें) तोडकर आग्रेय दिशा में फेंककर हाथ धो लेना चाहिये।

त्वं भूमित्येष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे। त्वां पवित्रमृषयो भरन्तस्त्वं पुनीहि दुरितान्यस्म॥

दिति पवित्रे अन्तर्धाय हविर्निर्वपति (इस वाक्य से चरुपात्र में दो कुशा डालें फिर अक्षत की कटोरी हाथ में लें उसमें से प्रत्येक देवता के नाम से दो-दो दाना चरु पात्र में डालते जायें —मुठ्ठी-मुठ्ठी भर प्रत्येक देताओं के नाम से निकालना चाहिए ये नियम है।) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति (आदित्याय जुष्टम निर्वपामि, चन्द्राय अङ्गारकाय, बुधाय, बृहस्पतये, शुक्राय, शनिश्चराय, राहवे, केतवे, विनाकाय, दुर्गायै, क्षेत्रपालाय, वायवे, आकाशाय, अश्विनभ्यां, इन्द्राय, अग्नेयै, यमाय, नैर्ऋतये, वरुणाय, वायवे, सोमाय, इशानाय, विष्णवे जुष्टं निर्वपामि एवं जुष्टं प्रोक्षामि

कुशा लेकर के जल पात्र से चरुपात्र में प्रोक्षण करें)

परित्वाग्ने पुरं वयमिति त्रिः पर्यग्नि करोति। (इस मन्त्र से ३ बार अग्नि कुण्ड की पूर्व दिशा से जल घुमाकर पूर्व दिशा तक ही प्रदक्षिणा करें)

परिं त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। धृषद् वर्णं दिवेदिंवे हन्तारं भङ्गुरावंतः॥ त्रिः पर्यग्नि करोति।

अग्निं अर्चयेत—अग्नेर्मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यमिन्धते।
विशोविशः प्रविशिवांसमीमहे स नो मुञ्चत्वंहसः॥
यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन्। एवा देवेभ्यः सुमतिं न आ वह स नो मुञ्चत्वंहसः॥
यामन्यामन्नुपयुक्तं वहिष्ठं कर्मन्कर्मन्नाभगम्। अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं स नो मुञ्चत्वंहसः॥
सुजातं जातवेदसमग्निं वैश्वानरं विभुम। हव्यवाहं हवामहे स नो मुञ्चत्वंहसः॥
येन ऋषयो बलमद्योतयन् युजा येनासुराणामयुवन्त मायाः। येनाग्निना पणीनिन्द्रो जिगाय स नो मुञ्चत्वंहसः॥
येन देवा अमृतमन्वविन्दन् येनौषधीर्मधुमतीरकृण्वन्। येन देवाः स्वरराभरन्त्स नो मुञ्चत्वंहसः॥
यस्येदं प्रदिशि यद् विरोचते यज्जातं जनितव्यं च केवलम्। स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वंहसः॥

(अथर्ववेद .४.२३.१-७)

इन मंत्रों को बोल करके अग्नि देवता का ध्यान एवं पञ्चोपचार पूजन करना चाहिए।

अग्निमूर्तिध्यान—ॐ चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश॥ *(गोपथ ब्राह्मण १.१६)*

सप्तहस्तश्चतुः श्रृंगः सप्तजिह्वो द्विशीर्षकः। त्रिपात्प्रसन्नवदनः सुखासीनः सुचिस्मितः॥
स्वाहांतुदक्षिणेपार्श्वे देवीं वामेस्वधां तथा। बिभ्रद्दक्षिण हस्तैस्तु शक्तिमन्नंस्त्रुचं स्त्रुवं॥
तोमरंव्यजनंवामैर्घृतपात्रं च धारयन्। मेषारूढो जटाबद्ध गौरवर्णो महौजसः।
धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः॥ आत्माभिमुखमासीन एवं रूपो हुताशनः। *(ब्रह्मकर्म समुच्चय-अग्निमुख प्रकरण)*

हे अग्ने शाण्डिल्यगोत्र मेषारूढ वैश्वानर प्राङ्मुखः सन् ममाभिमुखो वरदस्सुप्रसन्नो भव। अष्टदिशी अग्निं अर्च्येत्। ॐ पूर्वे अग्नये नमः ॐ आग्नेयां अग्नये नमः ॐ दक्षिणे अग्नये नमः ॐ नैर्ऋत्यां अग्नये नमः ॐ पश्चिमे अग्नये नमः ॐ वायव्ये अग्नये नमः ॐ उत्तरे अग्नये नमः ॐ ऐशान्ये अग्नये नमः ॐ मध्ये यज्ञ पुरुषाय नमः॥ उत्तरतोऽग्नेरुपसादयतीध्मम्। (इस वाक्य से १५ लकड़ी के गाठ को इध्मा कहते हैं कुण्ड के उत्तर दिशा में नीचे कुशा का आसन विछाकर उसके ऊपर इध्मा रख दें एवं उसी के उत्तर में बर्हिः मुट्ठी भर कुशा को बर्हिः कहते हैं) उत्तर बर्हिः। अग्नये त्वा जुष्टं प्रोक्षामीतीध्मम्। (इस वाक्य से इध्मा को प्रोक्षण करें एवं बर्हिः को भी प्रोक्षण करें) पृथिव्या प्रोक्षामि इति बर्हिः। (इस वाक्य को बोल करके मुट्ठी भर कुशाओं को जहां घी का पात्र रखा जाता है वहां पर दक्षिण से लेकर उत्तर तक विछाना है) दर्भमुष्टिमभ्युक्ष्य पश्चादग्नेः प्रागग्रं निदधात्यूर्णम्रदं प्रथस्व स्वासस्थं देवम्य इति। दर्भाणामपादाय (बड़ा वाला कुशा लेकर करके ब्रह्मा के आसन को स्पर्श करें नियम ये है कि ब्रह्मा जी का आसन अग्नि कुण्ड के दक्षिण दिशा में देना चाहिए ऋषीणां इस मन्त्र को बोले) ऋषीणां प्रस्तरोऽसीति दक्षिणतो ऽग्नेर्ब्रह्मासनं निदधाति।

ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय।

पुरस्तादग्रास्तार्य तेषां मूलान्यपरेषां प्रान्तैरवछादयन्परिसर्पति दक्षिणेनाग्निमा पश्चार्धात्। परि स्तृणीहीति संप्रेष्यति।

(यहां पर जो आगे वाक्य लिखा है उस वाक्य को बोलते हुए इस्तीर्ण वशिष्ठ कुशा लेकर के पहले पूर्व दिशा में डाले जिसका मूल भाग दक्षिण दिशा

की ओर होना चाहिए एवं अग्र भाग उत्तर दिशा की ओर होना चाहिए इसी तरह से पश्चिम दिशा में डाले फिर मूल भाग पश्चिम दिशा को एवं अग्र भाग पूर्व दिशा की ओर होना चाहिए इसी तरह उत्तर दिशा में भी डालें **नोट**—अग्र भाग पूर्व एवं उत्तर की ओर होना चाहिए एवं मूल भाग दक्षिण एवं पश्चिम की ओर होना चाहिए) पुरस्तादग्रेरास्तीर्य तेषां मूलान्यपरेषां प्रान्तैरवछादयन्परिसर्पति (इन वाक्यों से स्तीर्य को स्पर्श करें) दक्षिणेनाग्निमा पश्चार्धात् । परि स्तृणीहीति संप्रेष्यति।

परिस्तृणीहिपरिं धेहि वेदिंमा जामिं मोंषीरमुया शयांनाम्। होतृषदंनं हरिंतं हिरण्ययं निष्का एते यजंमानस्य लोके॥

(देवस्यत्वा इस मंत्र से स्तीर्ण को प्रोक्षण करें)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यांप्रसूतः प्रशिषा परिस्तृणामीति।

स्तीर्णं प्रोक्षति (हवि को प्रोक्षण करें) हविषां त्वा जुष्टं प्रोक्षामीति। (दो कुशा लेकर के अग्नि में जलाकर घी पात्र के अन्दर ३ परिक्रमा करें उसके बाद कुशा को अग्नि कुण्ड के अन्दर डाल दें।) विलीनपूतमाज्यं गृहीत्वाधिश्रृत्य पर्यग्नि कृत्वो (इस वाक्य से उत्तर की ओर घी पात्र को किंचित खिंचना है।) दगुद्वास्य पश्चाद्ग्रेरुपसाद्योदगग्राभ्यांपवित्राभ्यामुत्पुनाति। (दो कुशा को लेकर अनामिका एवं अंगुष्ठ के बीच में दबा कर घी पात्र के अन्दर ४ बार चलायें यह प्रक्रिया पूरी होने के बाद अग्नि कुण्ड में कुशा को डाल दें।)

विष्णोर्मनसा पूतमसि। देवस्त्वा सवितोत्पुनातु। अच्छिद्रेण त्वा पवित्रेण शतधारेण सहस्त्रधारेण सुप्वोत्पुनामीति

तृतीयम्। तूष्णीं चतुर्थम्। (इस वाक्य को पढ़कर श्रुवा से दो बार घी चरु पात्र में डालें।) शृतं हविरभिघारयति मध्वा समञ्जन्घृतवत्कराथेति।

अभिघार्योदञ्चमुद्वासयत्युद्वासयाग्रेः (इस वाक्य को पढ़कर चरु पात्र को उत्तर दिशा की ओर खिचें।)

अदांरसृद् भवतु देव सोमास्मिन् यज्ञे मंरुतो मृडतां नः। मा नों विददभिभा मो अशंस्तिर्मा नों विदद् वृजिना द्वेष्या या॥

(इस मन्त्र से घी पात्र के दायें एवं बायें हाथ फैला करके घी को देखें) शृतमर्क हव्यमा सीद पृष्ठममृतस्य धामेति। पश्चादाज्यस्य निधायालंकृत्य समानेनोत्पुनाति। अदारसृदित्यवेक्षते। उत्तिष्ठतेत्यैन्द्रम्। (३ समीधा हाथ में लेकर के अग्नि को दिखाकर के घी पात्र के बायीं तरफ रख दें।)

अ॒ग्निर्भूम्या॒मोष॑धीष्व॒ग्निमापो॑ बिभ्रत्य॒ग्निरश्म॑सु। अ॒ग्निर॒न्तः पुरु॑षेषु गोष्वश्वे॑ष्व॒ग्नयः॥

अग्निर्भूम्यामिति तिसृभिरुपसमादधात्यस्मै क्षत्राण्येतमिध्ममिति वा।

युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः। इन्धानास्त्वा सुप्रजसः सुवीर ज्योग्जीवेम बलिहृतो वयं त

इति। (इस वाक्य को पढ़कर के कुण्ड के नैर्ॠत्य एवं दक्षिण के मध्य में खाली जल पात्र को स्पर्श करके अभी मन्त्रीत करें।) दक्षिणतो जाङ्मायनमुदपात्रमुपसाद्याभिमन्त्रयते तथोदपात्रं धारय यथाग्रे ब्रह्मणस्पतिः। सत्यधर्मा अदीधरद्देवस्य सवितुः सव इति।

अथोदकमासिञ्चति—(नीचे लिखे हुए मन्त्र को पढ़कर के जल पात्र में जलधारा डालें।)

इहेत देवीरमृतं वसाना हिरण्यवर्णा अनवद्यरूपाः। आपः समुद्रो वरुणश्च राजा संपातभागान्हविषो जुषन्ताम्। इन्द्रप्रशिष्टा वरुणप्रसूता अपः समुद्राद्दिवमुद्वहन्तु। इन्द्रप्रशिष्टा वरुणप्रसूता दिवस्पृथिव्याः श्रियमा वहन्त्विति।

(इस वाक्य को पढ़कर के हवि आज्यादि पर एवं सामाग्रीयों पर प्रोक्षण करें) ऋतं त्वा सत्येन परिषिञ्चामि जातवेद इति सह हविर्भिः पर्युक्ष्य (मंत्र को पढ़कर के ४ बार आचमन करें मन्त्र आगे है)

जी॒वा स्थ॑ जी॒व्यास॒ं सर्व॒मायु॑र्जीव्यासम्। उ॒प॒जी॒वा स्थोप॑ जीव्यास॒ं सर्व॒मायु॑र्जीव्यासम्।
स॒ंजीवा स्थ॒ सं जी॑व्यास॒ं सर्व॒मायु॑र्जीव्यासम्। जी॒व॒ला स्थ॑ जी॒व्यास॒ं सर्व॒मायु॑र्जीव्यासम्।

जीवाभिराचम्योपोत्थाय (आगे दिये गये वाक्य से वेद भगवान एवं यज्ञ पुरुष को प्रणाम करें) वेद प्रपद्भिः प्रपद्यत

ॐ प्रपद्ये भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये जनत्प्रपद्य इति।

प्रपद्य (आगे वाक्य को पढ़कर यजमान अपने आसन के नीचे दो कुशा डालें) पश्चात्स्तीर्णस्य दर्भानास्तीर्याहि दैधिषव्योदतस्तिष्ठा (आगे वाक्य को पढ़कर के ब्रह्मासन को देखना चाहिए एवं बड़े कुशा से ब्रह्मा जी को स्पर्श करें) न्यस्य सदने सीद यो ऽस्मत्पाकतर इति ब्रह्मासनमन्वीक्षते। (आगे वाक्य को पढ़कर के बह्माजी के आसन के नीचे कुशा का आसन है उसमें से दक्षिण कुशा निकाल करके नैर्ऋत्य दिशा की ओर फेंक दें) निरस्तः परागवसुः सह पाप्मना निरस्तः सो ऽस्तु यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणा तृणं निरस्यति। (इस वाक्य को पढ़कर के एवं आगे मन्त्र दिया गया है विमृग्वरी इस मन्त्र को पढ़ते हुए ब्रह्मासन कुशा से स्पर्श करें) तदन्वालभ्य जपतीदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं त्वाध्यासदेयमूर्णाम्रदमनभिशोकम्।

वि॒मृग्व॑रीं पृथि॒वीमा व॑दामि क्ष॒मां भूमिं॒ ब्रह्म॑णा वावृधा॒नाम्। ऊर्जं॑ पु॒ष्टं बिभ्र॑तीमन्नभा॒गं घृ॒तं त्वा॒भि नि षी॑देम भूमे॥

मित्युपविश्यासनीयं ब्रह्मजपं जपति (आगे इस वाक्य को पढ़कर के अपने आसन को पकडकर अभिमन्त्रित करें) बृहस्पतिर्ब्रह्मा ब्रहमसदन आसिष्ये बृहस्पते यज्ञं गोपाय यदुदुद्वत उन्निवतः शकेयमिति। (आगे लिखे हुए वाक्य से यजमान अपने दक्षिण हाथ में दो कुशा लेकर के अंगुली में लपेट लें एवं बायें हाथ में श्रुवा लें मूल भाग से लेकर अग्र भाग होते हुए मूल भाग तक ३ बार परिक्रमा करने के उपरान्त कुशा एवं श्रुवा सहित अग्नि में तपायें फिर हाथ में लिपटा हुआ कुशा अग्नि कुण्ड में डाल दें) दर्भैः स्रुवं निर्मृज्य निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति प्रतप्य।

मूले स्रुवं गृहीत्वा जपति विष्णोर्हस्तो ऽसि दक्षिणः पूष्णा दत्तो बृहस्पतेः तं त्वाहं स्रुवमाददे देवानां हव्यवाहनम्। अयं स्रुवो वि दधाति होमाञ्छताक्षरछन्दसा जागतेन। (मूल भाग में श्रुवा को पकड़े इसके उपरान्त वाक्य रुपी मंत्र को बोलते हुये श्रुवा को चार बार स्थानांतरण करें)

सर्वा यज्ञस्य समनक्ति विष्ठा बार्हस्पत्येष्टिः शर्मणा दैव्येनेति। ओं भूः शं भूत्यै त्वा गृह्णे भूतय इति प्रथमं ग्रहं गृह्णाति। ओं भुवः शं पुष्ट्यै त्वा गृह्णे पुष्टय

इति द्वितीयम्। ओं स्वः शं त्वा गृह्णे सहस्रपोषायेति तृतीयम्। ओं जनच्छं त्वा गृह्णे ऽपरिमितपोषायेति चतुर्थम्। राजकर्माभिचारिकेष्वमुष्य त्वा प्राणाय गृह्णे ऽपानाय व्यानाय समानायोदानायेति पञ्चमम्। अग्रावग्निर्हृदा पूतं पुरस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति। (इन चार मंत्रो को पढ़ते हुये श्रुवा से चार बार घी की आहूति दें यज्ञ कुण्ड के मध्य में दें।)

ॐ अग्रावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् स्वाहा
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान्।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् स्वाहा
पुरस्ताद् युक्तो वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम्।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम स्वाहा
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः स्वाहा।

पश्चादग्नेर्मध्यदेशे समानत्र पुरस्ताद्धोमान्। दक्षिणेनाग्निमुदपात्र आज्याहुतीनां संपातानानयति। पुरस्ताद्धोम आज्यभागः संस्थितहोमः समृद्धिः शान्तानामिति। एतावाज्यभागौ।

वृष्णो बृहते स्वर्विदे अग्नये शुल्कं हरामि त्विषीमते। स न स्थिरान्बलवतः कृणोतु ज्योक्क नो जीवातवे दधात्वग्नये स्वाहे त्युत्तरपूर्वार्ध आग्नेयमाज्यभागं जुहोति। (इस वाक्य रुपी मंत्र को पढ़कर के पूर्व एवं उत्तर के मध्य ईशान दिशा के बीचो बीच में घी की आहूति दें) दक्षिणपूर्वार्ध

सोमाय— त्वं सोम दिव्यो नृचक्षाः सुगाँ अस्मभ्यं पथो अनु ख्यः। अभि नो गोत्रं विदुष इव नेषो ऽछा नो वाचमुशंती जिगासि सोमाय स्वाहेति। (दक्षिण पूर्व के बीचो बीच अग्नेय कोण में घी की आहूति दें यह भी ध्यान दें कि ये आहूतियां यज्ञ की नेत्र मानी जाती है ये समझ कर आहूतियां दें) मध्ये हविः। उपस्तीर्याज्यं संहताभ्यामङ्गुलिभ्यां द्विर्हविषो ऽवद्यति मध्यात्पूर्वार्धाच्च। अवत्तमभिघार्य द्विर्हविः प्रत्यभिघारयति। (इस वाक्य को पढ़कर के श्रुवा से घी लेकर के दो बार श्रुक में डालें इसके उपरान्त चरु पात्र के अन्दर से चरु निकालना हैं मध्य एवं पूर्वाध से ये चरु श्रुक में रखे फिर श्रुवा से दो बार जहां से चरु निकाला गया है उसी स्थान पर घी डालें फिर श्रुवा से दोबारा दो बार श्रुक में घी डालें) यतोयतो ऽवद्यति तदनुपूर्वम्। एवं सर्वाण्यवदानानि। अन्यत्र सौविष्टकृतात्।

ॐ उदेंनमुत्त॒रं न॒याग्नें घृतेनां॑हुत। समेंनं॒ वर्चसा सृज प्र॒जया॑ च ब॒हुं कृंधि स्वाहा

उदेनमुत्तरं नयेति पुरस्तादधोमसंहतां पूर्वाम्। एवं पूर्वांपूर्वां संहतां जुहोति। स्वाहान्ताभिः प्रत्यृचं होमाः। (इस मंत्र को बोल करके यजमान श्रुक वाली आहूति हवन कुण्ड के मध्य में छोड़ दे फिर सभी पंडित मिलकर के नवग्रह क्रतु साद्‌गुण्य क्रतु संरक्षक एवं प्रधान देवता श्री विष्णु का हवन करें)

नवग्रह होमः

प्रधान देवता सूर्य होमः—प्रधान देवता आदित्य प्रीत्यर्थे अर्कसमित्, आज्य, चरु होमे विनियोगः।

ॐ उ॒च्चा पतंन्तमरु॒णं सु॑प॒र्णं मध्ये॑ दि॒वस्त॒रणिं॑ भ्राजंमानम्।
पश्यांम त्वा सवि॒तारं॒ यमा॒हुरजं॑स्त्रं ज्योति॒र्यदविं॑न्दुदत्त्रिः स्वाहा॑॥

आदित्यायेदं न मम। २८ बार इस मंत्र से अर्क सहित घी एवं चरु से होम यह संख्या ८ या २८ या १०८ बार कर सकते हैं।

दिवाकरं दीप्त सहस्त्ररश्मिं तेजोमयं जगतः कर्मसाक्षिम्। अंशुं भानुं सूर्यमादिं ग्रहाणां दिवाकरं सदा शरणमहं प्रपद्ये।।

आदित्याय नमः।

प्रधान देवता सोम होमः—प्रधान देवता चन्द्रप्रीत्यर्थे पलाश समित्, आज्य, चरु होम विनियोगः।

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः स्वाहा।।

सोमाय इदं न मम। २८ बार इस मंत्र से पलाश सहित घी एवं चरु से होम करें।

प्रार्थना— यः कालहेतोः क्षयवृद्धिमेति यं देवताः पितरश्चापिबन्ति तं वै वरेण्यं ब्रह्मेन्द्रवन्द्यं चन्द्रं सदा शरणमहं प्रपद्ये।।

चन्द्राय नमः।

प्रधान देवता अङ्गारक होमः—प्रधान देवता अङ्गारक प्रीत्यर्थे खदिरसमित आज्य चरु होमे विनियोगः।

ॐ अग्निर्वासाः पृथिव्यं सितज्ञूस्त्विषीमन्तं संशितं मा कृष्णोतु स्वाहा।

अङ्गारकाय इदं न मम। २८ बार इस मंत्र में खदिर समित्, घी एवं चरु से होम करें।

प्रार्थना— महेश्वरस्याननस्वेदबिन्दोर्भूमौ जातं रक्तमालांबराढ्यं। सुरश्मिणं लोहिताङ्गं कुमारमङ्गारकं सदा शरणमहं प्रपद्ये।।

अङ्गारकाय नमः।

प्रधान देवता बुध होमः—प्रधान देवता बुध प्रीत्यर्थे अपामार्ग समित्, आज्य, चरु होमे विनियोगः।

ॐ कपृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजसातये।

निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये स्वाहा।

बुधाय इदं न मम। २८ बार इस मंत्र से अपामार्ग समित्, घी एवं चरु से होम करें।

प्रार्थना— उत्पातरूपो जगतां चन्द्रपुत्रौ महाद्युतिः। सूर्य प्रियकरो विद्वान् पीडां दहतु मे बुधः॥ ॐ बुधाय नमः।

प्रधान देवता बृहस्पति होमः—प्रधान देवता बृहस्पति प्रीत्यर्थे पिप्ल समित् आज्य चरु होमे विनियोगः।

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरदघायोः।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु स्वाहा॥ *(ऋग्वेद १.२३.१५)*

बृहस्पतये इदं न मम। २८ बार इस मंत्र से पिप्ल समित्, घी एवं चरु से होम करें।

प्रार्थना— बुध्यात्मनो यस्य न कश्चिदन्यो मतिं देवा उपजीवंति यस्य। प्रजापते रात्मजं धर्मनिष्ठं गुरुं सदा शरणामहं प्रपद्ये॥
ॐ गुरुवे नमः।

प्रधान देवता शुक्र होमः—प्रधान देवता शुक्रक्रह प्रीत्यर्थे औदुम्बर समित्, आज्य चरु होमे विनियोगः।

ॐ द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणाया पितर्तु।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च स्वाहा।

शुक्राय इदं न मम। २८ बार इस मंत्र से औदुम्बर समित्, घी एवं चरु से हाम करें।

प्रार्थना— वर्षप्रदं चिन्तितार्थानुकूलं मौनाद्विशिष्टं सुनयोमपन्नम्। तं भार्गवं योगविशुद्धसत्वं शुक्रं सदा शरणामहं प्रपद्ये॥

ॐ शुक्राय नमः।

प्रधान देवता शनैश्चर होमः—प्रधान देवता शनैश्चर प्रीत्यर्थे शमी समित्, आज्य, चरु होमे विनियोगः।

ॐ शं नो वातो वातु शं नस्तपतु सूर्यः।

अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छत स्वाहा।

शनैश्चराय इदं न मम। २८ बार इस मंत्र से शमी समित्, घी एवं चरु से होम करें।

प्रार्थना— शनैश्चरो राशितो राशिमेति शनैर्भोगो गमनं चेष्टितं च। सूर्यात्मजं क्रोधनं सुप्रसन्नं शनैश्चरं सदा शरणमहं प्रपद्ये॥

ॐ शनैश्चराय नमः।

प्रधान देवता राहु होम—प्रधान देवता राहु प्रीत्यर्थे दूर्वासमित् आज्य चरु होमे विनियोगः।

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता स्वाहा॥ *(अथर्ववेद २०.१२४.१)*

राहवे इदं न मम। २८ बार इस मंत्र से दूर्वा समित्, घी एवं चरु से होम करें।

प्रार्थना— यो विष्णुनैवामृतं भोक्ष्यमाणः छित्वाशिरो ग्रहभावे नियुक्तः। यश्चन्द्रसूर्यौ ग्रसते पर्व काले राहुं सदा शरणमहं प्रपद्ये॥

ॐ राहवे नमः।

प्रधान देवता केतु होमः—प्रधान देवता केतु प्रीत्यर्थे कुश समित् आज्य चरु होमे विनियोगः।

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः स्वाहा॥

केतवे इदं न मम। २८ बार इस मंत्र से कुश समित्, घी एवं चरु से होम करें।

प्रार्थना—हे ब्रह्मपुत्रा ब्रह्मसमानवक्त्राः ब्रह्मोद्भवाः ब्रह्मसमाः कुमाराः।

ब्रह्मोत्तमा वरदा जामदग्न्याः केतून् सदा शरणमहं प्रपद्ये॥

ॐ केतवे नमः। यहाँ पर नवग्रह होम संपन्न हुआ। आगे छः कर्म साद्गुण्य देवता होम होगा।

कर्म साद्गुण्य देवता विनायक होमः-१— क्रतु साद्गुण्यदेवता विनायक प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यस्यं कुर्मो हविर्गृहे तमंग्ने वर्धया त्वम्। तस्मै सोमो अधि ब्रवदयं ब्रह्मणस्पतिः स्वाहा।

कर्म सादगुण्यदेवतायै विनायकाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्यदेवता दुर्गा होमः-२—क्रतुसाद्गुण्यदेवता दुर्गा प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।

याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु स्वाहा॥

क्रतु साद्गुण्य देवतायै दुर्गायै इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्यदेवता क्षेत्रपाल होमः-३—चरु होमे विनियोगः।

ॐ मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम्।

क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम स्वाहा।

क्रतु साद्गुण्य देवतायै क्षेत्रपालाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता वायु होमः-४—क्रतु साद्गुण्य देवता वायु प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ वायोः पूतः पवित्रेण प्रत्यङ् सोमो अति द्रुतः। इन्द्रस्य युज्यः सखा स्वाहा॥

क्रतु साद्गुण्य देवतायै वायवे इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता आकाश होमः-५—क्रतु साद्गुण्य देवता आकाश प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् स्वाहा॥

क्रतु साद्गुण्यदेवतायै आकाशाय इदं न मम। इस मंत्र से तीन बार होम करें।

कर्म साद्गुण्य देवता अश्विनी देवता होमः-६—अश्वि प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यदुन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना स्वाहा॥

क्रतु साद्गुण्य देवतायै अश्विभ्यां इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता इन्द्र होमः—क्रतु संरक्षक देवता इन्द्र प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ इन्द्रं त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अन्धसः स्वाहा॥

क्रतु संरक्षक देवतायै इन्द्राय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता अग्नि होमः—क्रतु संरक्षक देवता अग्नि प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम् स्वाहा॥

क्रतु संरक्षक देवतौ अग्नय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता यम होमः—क्रतु संरक्षक देवता यम प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यमाय सोमः पवते यमाय क्रियते हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः स्वाहा॥

क्रतु संरक्षक देवतायै यमाय इदं न मम। इस मंत्र को दो बार होम करें।

क्रतु संरक्षक देवता निर्ऋति होमः—क्रतु संरक्षक देवता निर्ऋति प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत्।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः स्वाहा॥

क्रतु संरक्षक देवतायै निर्ऋतये इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता वरुण होमः—क्रतु संरक्षक देवता वरुण प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु स्वाहा॥

क्रतु संरक्षक देवतायै वरुणाय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता वायु होमः—क्रतु संरक्षक देवता वायु प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे स्वाहा॥

क्रतु संरक्षक देवतायै वायवे इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता सोम होम—क्रतु संरक्षक देवता सोम प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ अभि त्यं देवं सवितारमोण्योः कविक्रतुम्। अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् स्वाहा॥

क्रतु संरक्षक देवतायै सोमाय इदं न मम। इस मंत्र से दो बार होम करें।

क्रतु संरक्षक देवता ईशान होमः—क्रतु संरक्षक देवता ईशान प्रीत्यर्थे समित् आज्य चरु होमे विनियोगः।

ॐ मा नो मर्तां अभि द्रुहन् तनूनामिन्द्र गिर्वणः। ईशानो यवया वधम् स्वाहा॥

क्रतु संरक्षक देवतायै ईशानाय इदं न मम। इस मंत्र से दो बार होम करें। यहाँ पर क्रतु संरक्षक देवता होम संपन्न हुआ।

व्याहृति होमः—व्याहृतीनां परमेष्ठी प्रजापतिः बृहती व्याहृति होमे विनियोगः। ॐभूः स्वाहा, अग्नये इदं न मम। ॐभुवः स्वाहा,वायवे इदं न मम। ॐस्वः स्वाहा, सूर्याय इदं न मम। ॐभूर्भुवः स्वः स्वाहा, प्रजापतये इदं न मम। इन मत्रों से एक बार होम करें।

प्रधान देवता विष्णु होमः—विष्णु प्रीत्यर्थे चरु होमे विनियोगः।

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे स्वाहा। (अथर्ववेद ७.२६.४)

विष्णाव इदं न मम। इस मंत्र से १०८ बार, २१६ बार, ३१४ बार होम कर सकते हैं। ॐविष्णावे स्वाहा, विष्णाव इदं न मम। ॐसर्वभूतपतये स्वाहा, सर्वभूतपतय इदं न मम। ॐचक्रपाणये स्वाहा, चक्रपाणये इदं न मम। ॐईश्वराय स्वाहा, ईश्वराय इदं न मम। ॐसर्वोत्पातशमनाय स्वाहा, सवोत्पातशमनाय इदं न मम। प्रधान देवता के होम के बाद इन पाँच मंत्रों से घी की आहूति एक-एक बार देवें।

प्रायश्चित आहूतिया— प्रधान यजमान घृत की आहूति करें।

आकूत्यै त्वा स्वाहा। कामाय त्वा स्वाहा। समृधे त्वा स्वाहा। आकूत्यै त्वा कामाय त्वा समृधे त्वा स्वाहा। ऋचा स्तोमं समर्धय गायत्रेण रथंतरम्।

बृहद्रायत्रवर्तनि स्वाहा। (इन मंत्रों को बोल करके प्रत्येक देवताओं के नाम से आहूति छोड़ते जाये फिर आगे दश मंत्रो को पढ़कर के आहूतियां डालें।)
पृथिव्यामग्नये समनमन्निति संनतिभिश्च। प्रजापते न त्वदेतान्यन्य इति च।

ॐ पृथिव्यामग्नये समनमन्त्स आर्घ्नोत्। यथा पृथिव्यामग्नयें समनंमन्नेवा मह्यं संनमः सं नंमन्तु स्वाहा
पृथिवी धेनुस्तस्यां अग्निर्वत्सः। सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम्। आयुः पथमं प्रजां पोषं रयिं स्वाहा
अन्तरिंक्षे वायवे समनमन्त्स आर्घ्नोत्। यथान्तरिंक्षे वायवें समनंमन्नेवा मह्यं संनमः सं नंमन्तु स्वाहा
अन्तरिंक्षे धेनुस्तस्यां वायुर्वत्सः। सा में वायुना वत्सेनेषमूर्जं कामं दुहाम्। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा
दिव्या दित्याय समनमन्त्स आर्घ्नोत्। यथा दिव्या दित्यायं समनंमन्नेवा मह्यं संनमः स नंमन्तु स्वाहा
द्यौर्धेनुस्तस्यां आदित्यो वत्सः। सा मं आदित्येनं वत्सेनेषमूर्जं कामं दुहाम्। अयुः प्रथमं प्रजां पोषं रयिं स्वाहा
दिक्षु चन्द्राय समनमन्त्स आर्घ्नोत्। यथा दिक्षु चन्द्रायं समनमन्नेवा मह्यं संनमः सं नमन्तु स्वासा
दिशों धेनवस्तासां चन्द्रो वत्सः। ता में चन्द्रेणं वत्सेनेषमूर्जं कामं दुहाम्। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा
अग्रावग्निश्चंरति प्रविष्ट ऋषीणां पुत्रो अंभिशस्तिपा उं।
नमस्कारेण नमंसा ते जुहोमि मा देवानां मिथुया कंर्म भागम् स्वाहा
हृदा पूतं मनंसा जातवेदो विश्वांनि देव वयुनांनि विद्वान्।
सप्तास्यांनि तवं जातवेदुस्तेभ्यों जुहोमि स जुंषस्व हव्यम् स्वाहा
प्रजांपते न त्वदेतान्यन्यो विश्वां रूपाणिं परिभूर्जजान।

यत् कांमास्ते जुहुमस्तन्नों अस्तु व॒यं स्यांम॒ पतंयो रयी॒णाम् स्वाहां

उपस्तीर्याज्यं सर्वेषामुत्तरतः सकृत्सकृदवदाय द्विरवत्तमभिघारयति। न हवीं षि॥ (इस वाक्य से यजमान दो बार घी श्रुक में डालें फिर चरु पात्र में जितना चरु बचा हो वो दो बार में श्रुक में डालें फिर पुनः दो बार घी श्रुक में डालें चरु पात्र में घी नहीं डालना है)

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवोढुम्। अग्निर्विद्वान्स यज्ञात्स इद्धोता सो ऽध्वरान्स ऋतून्कल्पयात्यग्नये स्विष्टकृते स्वाहेत्युत्तरपूर्वार्धे (इस वाक्य को बोलकर के श्रुक वाली आहूति कुण्ड में डालें) ऽवयुतं हुत्वा सर्व प्रायश्चित्तीयन्होमाञ्जुहोति। स्वाहेष्टेभ्यः स्वाहा। वषडनिष्टेभ्यः स्वाहा। भेषजं स्विष्ट्यै स्वाहा। निष्कृतिर्दरिष्ट्यै स्वाहा। दैवीभ्यस्तनूभ्यः स्वाहा।

अयाश्चाग्ने ऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि। अयासा मनसा कृतो ऽयास्यं हव्यमूहिषे। अया नो धेहि भेषजं स्वाहेत्यों स्वाहा भूः स्वाहा भुवः स्वाहा स्वः स्वाहों भूर्भुवः स्वः स्वाहेति।

यन्मे स्कन्नं मनसो जातवेदो यद्वास्कन्दद्धविषो यत्रयत्र। उत्प्रुषो विप्रुषः सं जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति।

यन्मे स्कन्नं यदस्मृतीति च स्कन्नास्मृतिहोमौ।

ॐ यदस्मृंति चकृ॒म किं चि॒ंदग्न उपारि॒म चरंणे जातवेदः।
ततः पाहि त्वं नंः प्रचेतः शु॒भे सखिंभ्यो अमृत॒त्वमंस्तु न॒ः स्वाहां

यदद्य त्वा प्रयतीति संस्थितहोमाः।

ॐ यदु॒द्य त्वां प्रयु॒ति प्रयु॒ति यु॒ज्ञे अ॒स्मिन् होतंश्चिकित्व॒न्नवृंणीमही॒ह।
ध्रुवमंयो ध्रुवमु॒ता शंविष्ठ प्रवि॒द्वान् यु॒ज्ञमुपं याहि सोम॒म् स्वाहां॥ मनसस्पत इत्युत्तमं चतुर्गृहीतेन।

मनसस्पत इमं नो दिवि देवषु यज्ञम्।
स्वाहा दिवि स्वाहा पृथिव्यां स्वाहान्तरिक्षे स्वाहा वाते धां स्वाहा ॥

(इस मंत्र को पढ़ते हुए यजमान श्रुवा से चार बार घी श्रुक में डालें फिर खड़े होकर श्रुक की आहूति दें) बर्हिराज्यशेषे ऽनक्ति पृथिव्यै त्वेति मूलमन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रम्। एवं त्रिः। (इस वाक्य से बर्हि को वायें हाथ में पकड़े एवं श्रुवा दाहिने हाथ में पकड़कर घी बर्हि में मूलभाग एवं मध्य भाग एवं अग्र भाग में डालें यह प्रक्रिया तीन बार होनी चाहिये आगे वाला मंत्र बोलकर बर्हि को स्वाहा कर दें) सं बर्हिरक्तमित्यनुप्रहरति यथादेवतम्।

ॐ सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना सं मरुद्भिः। सं देवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु हविः स्वाहा ॥

स्रुवमग्नौ धारयति। (इस वाक्य को पढ़कर यजमान वायें हाथ में घी पात्र दाहिने हाथ में श्रुवा लेकर खड़े होकर धारा प्रवाह रुपी आहूति डालें) यदाज्यधान्यां तत्संस्रावयति संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः।

इमं यज्ञमभि विश्वे गृणान्तः स्वाहा देवा अमृता मादयन्तामिति। स्रुवो ऽसि घृतादनिशितः। सपत्नक्षयणो दिवि षीद। अन्तरिक्षे सीद पृथिव्यां सीदोत्तरो ऽहं भूयासमधरे मत्सपत्ना (इस वाक्य को पढ़कर श्रुवा को उल्टा करके यज्ञ कुण्ड से टीका कर रखदें) इति स्रुवं प्राग्दण्डं निदधाति।

(इस वाक्य एवं मंत्र से ३ समिधाओं को हाथ में लेकर के एक एक करके आगे दिये गये वाक्य एवं मंत्र से आहुति दें) वि मुञ्चामि ब्रह्मणा जातवेदसमग्निं होतारमजरं रथस्पृतम्। सर्वा देवानां जनिमानि विद्वान्यथाभागं वहतु हव्यमग्निरग्रये स्वाहेति इति प्रथमा।

ॐ एधोऽस्येधिषीय स्वाहा इति द्वितीया **समिदसि समेधिषीय स्वाहा।** एधो ऽसीति द्वितीयां समिदसीति तृतीयाम्।

करौ प्रक्षाल्यः अग्नि प्रत्यप **ॐ तेजोऽसि तेजो मयि धेहि।** (इस मंत्र से पहले हाथ धुल करके हाथ को अग्नि से सेंके फिर उसके उपरान्त हाथ से अपने मुख को मलें)

तेजो ऽसीति मुखं विमार्ष्टि। (इसके बाद पूर्णाहुति के दिन यहां से बलिदान करें उसके उपरान्त आगे तीन पग चलने का मंत्र एवं कार्य आगे बढ़ाये) दक्षिणेनाग्निं त्रन्विष्णुक्रमान्क्रमते।

ॐ विष्णोः क्रमोऽसिसपत्नहा पृथिवीसंशितोऽग्नितेजाः।
पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः॥
स मा जीवीत् तं प्राणो जहातु।
विष्णोः क्रमोऽसि सपत्नहान्तरिक्षसंशितो वायुतेजाः।
अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः।
स मा जीवीत् तं प्राणो जहातु।
विष्णोः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः।
दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः॥
स मा जीवीत् तं प्राणो जहातु।

विष्णोः क्रमो ऽसीति दक्षिणेन पादेनानुसंहरति सव्यम्। (इसके उपरान्त कुण्ड की परिक्रमा करते हुए यजमान को यज्ञशाला के बाहर जाकर सूर्य भगवान को देखें एवं नमस्कार करें)

ॐ सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम्। सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसम्॥
दिशो ज्योतिष्मतीरभ्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम्॥

सूर्यस्यावृतमित्यभिदक्षिणामावर्तते।

ॐ अगन्म स्वः स्वरगन्म सं सूर्यस्य ज्योतिषागन्म॥

अगन्म स्वरित्यादित्यमीक्षते। (इसके बाद यजमान अपने आसन में बैठ जाये फिर दक्षिण दिशा में जो उदपात्र है उसको अपने हाथों से उठा करके किसी ब्राह्मण के हाथ में दें साथ में कुशा भी दें फिर ब्राह्मण आपो हि ष्ठा से मंत्र से मार्जन करें)

इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च। ब्रह्मणा स्थापितं पात्रं पुनरुत्थापयामसी त्यपरेणाग्निमुदपात्रं परिहृत्योत्तरणाग्नि।

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ *(अथर्ववेद १.५.३)*

ॐ ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्॥

मापो हि ष्ठा मयोभुव इति मार्जयित्वा बर्हिषि पत्न्याञ्जलौ निनयति समुद्रं वः प्र हिणोमीतीदं जनास इति वा। वीरपत्न्यहं भूयासमिति मुखं विमार्ष्टि। व्रतानि व्रतपतय इति समिधमादधाति। सत्यं त्वर्तेनति परिषिच्योदञ्चि हविरुच्छिष्टान्युद्वासयति। पूर्ण पात्रं दक्षिणा।

करौ प्रक्षाल्यः हस्ते पुष्पाणी गृहित्वा अग्निं अर्चयेत ॐ पूर्वे अग्नये नमः ॐ आग्नेयां अग्नये नमः ॐ दक्षिणे अग्नये नमः ॐ नैर्ऋत्यां अग्नये नमः ॐ पश्चिमे अग्नये नमः ॐ वायव्ये अग्नये नमः ॐ उत्तरे अग्नये नमः ॐ ऐशान्ये अग्नये नमः ॐ मध्ये यज्ञ पुरुषाय नमः॥ आचमनं ॐ ऋग्वेदाय स्वाहा। ॐ यजुर्वेदाय स्वाहा। ॐ सामवेदाय स्वाहा। करौ प्रक्षाल्यः। हस्ते जलाक्षत पुष्पाणी गृहित्वा संकल्प वाक्यान स्मैरेयुः स्वस्ति पूर्वोच्चारित ग्रह, गुण, गण, विशेषण, विशिष्टायाम, शुभ पुण्य तिथौ, अमुख गोत्रा, अमुख नाम शर्मामः षड दिवस साद्य अद्य................दिने।

हवन कुण्ड में षोडशोपचार पूजनम्

आवाहनम्—ॐ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥ (अथर्ववेद १९.६.१)

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ (पञ्चम मण्डलस्य परिशिष्टम्)

सपरिवार श्री महाविष्णावे नमः, आवाहयामि आवाहनं समर्पयामि।

आसनम्—ॐ त्रिभिः पद्भिर्द्यामरोहत्पादस्येहाभवत्पुनः। तथा व्यक्रामद्विष्वङशनानशने अनु॥ (अथर्ववेद १९.६.२)

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । आसनं समर्पयामि।

पाद्यम्— ॐ तावन्तो अस्य महिमानस्ततो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ (अथर्ववेद १९.६.३)

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । पादारविंदयोः पाद्यं पाद्यं समर्पयामि।

अर्घ्यं— ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्येनाभवत्सह॥ (अथर्ववेद १९.६.४)

ॐ कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।

पद्मेस्थितां पद्मवर्णां तामिहो पह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्) ॐ सपरिवाराय श्री महाविष्णावे नमः, हस्तयोः अर्घ्यमर्घ्यं समर्पयामि।

आचमनम्—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरू पादा उच्येते॥ (अथर्ववेद १९.६.५)

ॐ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टा मुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतां त्वां वृणे॥ (पञ्चम मण्डलस्य परिशिष्टम्)

सपरिवाराय श्री महाविष्णावे नमः,। मुखे आचमनीयं समर्पयामि।

पञ्चामृत स्नानम् (दूध)— ॐ सं सिंञ्चामि गवां क्षीरं समाज्येन बलं रसम्।
संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ॥ (अथर्ववेद २.२६.४)

ॐसपरिवाराय श्री महाविष्णावे नमः,। पयः स्नानं समर्पयामि।

शुद्ध जल—ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवे भवेनाति भवे भवस्वमाम् भवोद्भवाय नमः॥ (यजुर्वेद-महानारायणोपनिपत् आरण्यक)

ॐसपरिवाराय श्री महाविष्णावे नमः,। शुद्धोदक स्नानं समर्पयामि

दहि— ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥ (अथर्ववेद २०.१३७.३)

ॐसपरिवाराय श्री महाविष्णावे नमः,। दधि स्नानं समर्पयामि।

शुद्ध जल—ॐ वामदेवाय नमो ज्येष्ठाय नमःश्रेष्ठाय नमो रुद्राय नमः कालाय नमःकालविकरणाय
नमोबलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः। (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं सपर्मयामि ।

घी— ॐ घृतं ते॑ अग्ने दि॒व्ये स॒धस्थे॑ घृतेन॒ त्वां मनु॑र॒द्या समि॑न्धे ।
घृतं ते॑ दे॒वीर्न॒प्त्य॑ऽ आ व॑हन्तु घृतं तुभ्यं॑ दुह्रतां॒ गावो॑ अग्ने ॥ (अथर्ववेद ७.८२.६)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । घृतस्नानं समर्पयामि ।

शुद्ध जल— ॐ अ॒घोरे॑भ्योऽथ॒ घोरे॑भ्यो॒ घोर॒घोर॑ तरेभ्यः ।
सर्वे॑भ्यः॒ सर्व॒शर्वे॑भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः ॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि ।

मधु (शहद)— ॐ मधु॑मान् भवति॒ मधु॑मदस्याहार्यं॑ भवति । मधु॑मतो लो॒कान् जं॑यति॒ य ए॒वं वेद॑ ॥ (अथर्ववेद ९.१.२३)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । मधु स्नानं समर्पयामि ।

शुद्ध जल— ॐ तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि । तन्नो रुद्रः प्रचो॒दया॑त् ॥ (यजुर्वेद-महानारायणोपनिषत्-आरण्यक)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं सपर्पयामि ।

शर्करा (शक्कर)— ॐ स्वा॒दोःस्वादी॑यः स्वा॒दुना॑ सृजा॒ सम॒दः सु मधु॒ मधु॑ना॒भि यो॑धीः ॥ (अथर्ववेद ५.२.३)

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शर्करा स्नानं समर्पयामि ।

शुद्ध जन— ॐ ईशानस्सर्व॑ वि॒द्याना॒मीश्वरस्सर्व॑ भूताना॑ ब्र॒ह्माधि॑पतिर्ब्र॒ह्मणो

अधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ *(यजुर्वेद-महानारायणोपनिषत्-आरण्यक)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धोदक स्नानं समर्पयामि ।

फल— ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत । संमातर इव दुह्रामस्मा अरिष्टतातये ॥ *(अथर्ववेद ८.७.२७)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । फल स्नानं समर्पयामि ।

शुद्धोदक—ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ *(अथर्ववेद १.५.१)*

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ *(अथर्ववेद १.५.२)*

ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ *(अथर्ववेद १.५.३)*

ॐ ब्राह्मणो स्य मुखमासीद्बाहू राजन्यो भवत् । मध्यं तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ *(अथर्ववेद १९.६.६)*

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु मायांतरा याश्च ब्राह्या अलक्ष्मीः । *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महाविष्णावे नमः, । शुद्धदक स्नानं समर्पयामि ।

वस्त्र— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ *(अथर्ववेद १९.६.७)*

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ *(ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णावे नमः, । वस्त्रं समर्पयामि।

यज्ञोपवीतं—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरास्तात्। आयुष्यमग्रयं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)

ॐ क्षुत् पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णावे नमः, । यज्ञोपवीतं समर्पयामि।

आभरण—ॐ यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे।

तत् त्वां चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति॥ (अथर्ववेद १९.२६.२)

ॐसपरिवाराय श्री महाविष्णावे नमः, । आभरणं समर्पयामि।

गन्ध— ॐ गंधं द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ (अथर्ववेद १९.६.८)

ॐसपरिवाराय श्री महाविष्णावे नमः, । गन्धं समर्पयामि।

अक्षत—ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत॥ (अथर्ववेद २०.९२.५)

ॐसपरिवाराय श्री महाविष्णावे नमः, । अक्षतान् समर्पयामि।

पुष्पाणि—ॐ विराडग्रे समभवद्विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ (अथर्ववेद १९.६.९)
ॐ पुष्पवतीः प्रसूमतीः फलिनीरफला उत। संमातर इव दुह्रामस्मा अरिष्टतातये॥ (अथर्ववेद ८.७.२७)
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ (ऋग्वेद पञ्चम मण्डलस्य परिशिष्टम्)
ॐ सपरिवाराय श्री महाविष्णवे नमः, । पुष्पाणि समर्पयामि।

प्रथमावरण पूजनम्—पूर्वादिक्रमेण ॐ विमलायै नमः १। ॐ उत्कर्षिण्यै नमः २। ॐ ज्ञानायै नमः ३। ॐ क्रियायै नमः ४। ॐ योगायै नमः ५। ॐ प्रह्वयै नमः ६। ॐ सत्यायै नमः ७। ॐ ईशानायै नमः ८। मध्ये ॐ अनुग्रहायै नमः ९।

द्वितीयावरण पूजनम्—ॐ ब्राह्मयै नमः। पूर्वे ॐ माहेश्वर्यै नमः। आग्नेय दिशि। ॐ कौमार्यै नमः। दक्षिण दिशि। ॐ वैष्णव्यै नमः। नैरृत्यां दिशि। ॐ वाराह्यै नमः पश्चिम दिशि। ॐ इन्द्राण्यै नमः। वायव्यां दिशि। ॐ चामुण्डायै नमः। उत्तरस्यां दिशि। ॐ गिरिजायै नमः ऐशान्यां दिशि। (अनुष्ठान पद्धति)

तृतीयावरण पूजनम्—ॐ इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावत वाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवारायश्री महाविष्णुमूर्ति पार्षदाय नमः। ॐ अग्नये तेजोधिपतये पिंगलवर्णाय शक्ति हस्ताय मेष वाहनाय सशक्तिकाय सांगाय सायुधाय स वाहनाय स परिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐ यमाय प्रेताधिपतये कृष्णवर्णाय दण्ड हस्ताय महिष वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐ निषतये रक्षोधिपतये रक्तवर्णाय खड्ग हस्ताय नरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐ वरुणाय जलाधितये कुंदवर्णाय पाशहस्ताय मकरवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय महाविष्णुमूर्ति पार्षदाय नमः। ॐ वायवे प्राणाधिपतये धूम्रवर्णाय अंकुश हस्ताय हरिणवाहनाय सशक्ति काय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। ॐ सोमाय नक्षत्राधिपतये शुक्लवर्णाय गदा हस्ताय अश्व वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री

महाविष्णुमूर्ति पार्षदाय नमः। ॐईशानाय विद्याधिपतये स्फटिकवर्णाय त्रिशूल हस्ताय वृषभ वाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्तिपार्षदाय नमः। ॐअनंताय नागाधिपतये क्षीरवर्णाय चक्रहस्ताय गरुड वाहनाय स शक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। नैर्ऋत्यं एवं पश्चिम दिशा के बीच में अनन्त का पूजन करें। ॐब्रह्मणे लोकाधिपतये कंजवर्णाय पषहस्ताय हंसवाहनाय सशक्तिकाय सांगाय सायुधाय सवाहनाय सपरिवाराय श्री महाविष्णुमूर्ति पार्षदाय नमः। पूर्व एवं ईशान दिशा के बीच में ब्रह्मा जी का पूजन करें। *(अनुष्ठान पद्धति)*

चतुर्थावरणपूजनम्—ॐवज्राय नमः। (पूर्व में) ॐशक्त्यै नमः। (आग्नेय में) ॐदण्डाय नमः। (दक्षिण में) ॐखड्गाय नमः। (नैर्ऋत्य) ॐपाशाय नमः। (पश्चिम में) ॐअंकुशाय नमः। (वायव्य में) ॐगदायै नमः। (उत्तर में) ॐत्रिशूलाय नमः। (ईशान में) ॐचक्राय न मः। (पश्चिम नैर्ऋत्य के बीच में) ॐपद्माय नमः। (पूर्व ईशान के बीच में) *(अनुष्ठान पद्धति)*

अष्टोत्तर शतनाम पूजा

ॐविष्णवे नमः। ॐलक्ष्मीपतये नमः। ॐ कृष्णाय नमः। ॐ वैकुण्ठाय नमः। ॐ गरुडध्वजाय नमः। ॐ जगन्नाथाय नमः। ॐपरब्रह्मणे नमः।ॐवासुदेवाय नमः। ॐत्रिविक्रमाय नमः। ॐ दैत्यान्तकाय नमः। ॐ मधुरिपवे नमः। ॐ तार्क्ष्यवाहनाय नमः। ॐसनातनाय नमः। ॐनारायणाय नमः। ॐपद्मनाभाय नमः। ॐहृषीकेशाय नमः। ॐसुधाप्रदाय नमः। ॐ माधवाय नमः। ॐ पुण्डरीकाक्षाय नमः। ॐ स्थितिकर्त्रे नमः। ॐपरात्पराय नमः। ॐवनकालिने नमः। ॐयज्ञ रूपाय नमः। ॐचक्र पाणाये नमः। ॐगदाधराय नमः। ॐउपेन्द्राय नमः। ॐकेशवाय नमः। ॐ हंसाय नमः। ॐ समुद्रमथनाय नमः। ॐ हरये नमः। ॐगोविन्दाय नमः। ॐ ब्रह्मजनकाय नमः ॐ कैटभासुरमर्दनाय नमः। ॐ श्रीधराय नमः। ॐ कामजनकाय नमः ॐ शेषाायिने नमः। ॐ चतुर्भजाय

नमः। ॐ पाञ्चजन्यधराय नमः। ॐ श्रीमते नमः। ॐ शार्ङ्गपाणये नमः। ॐ जनार्दनाय नमः। ॐ पीताम्बरधराय नमः। ॐ देवाय नमः। ॐ सूर्यचन्द्रविलोचनाय नमः। ॐ मत्स्यरूपाय नमः। ॐ कूर्मतनवे नमः। ॐ क्रोडरूपाय नमः। ॐ नृकेसरिणे नमः। ॐ वामनाय नमः। ॐभार्गवाय नमः। ॐ रामाय नमः। ॐ बलिने नमः। ॐ कल्किने नमः। ॐ हयाननाय नमः। ॐ विश्वम्भराय नमः। ॐ शिशुमाराय नमः। ॐश्रीकराय नमः। ॐ कपिलाय नमः। ॐ ध्रुवाय नमः। ॐ दत्तात्रेयाय नमः। ॐ अच्युताय नमः। ॐअनन्ताय नमः। ॐ मुकुन्दाय नमः। ॐ दधिवामनाय नमः। ॐ धन्वन्तरये नमः। ॐ श्रीनिवासाय नमः। ॐप्रद्युम्नाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ श्रीवत्सकौस्तुभधराय नमः। ॐ मुरारातये नमः। ॐ अधोक्षजाय नमः। ॐ ऋषभाय नमः। ॐ मोहिनी रुप धारिणे नमः। ॐ सङ्कर्षणाय नमः। ॐ पृथवे नमः। ॐ क्षीराब्धिशायिने नमः। ॐ भूतात्मने नमः। ॐ अनिरुद्धाय नमः। ॐ भक्तवत्सलाय नमः। ॐनराय नमः। ॐ गजेन्द्रवरदाय नमः। ॐ त्रिधाम्ने नमः। ॐ भूतभावनाय नमः। ॐ श्वेतद्वीपसुवास्तव्याय नमः। ॐ सनकादिमुनिध्येयाय नमः। ॐ भगवते नमः। ॐ शङ्करप्रियाय नमः। ॐ नीलकान्ताय नमः। ॐ धराकान्ताय नमः। ॐवेदात्मने नमः। ॐ बादरायणाय नमः। ॐ भागीरथीजन्मभूमि पादपद्माय नमः। ॐ सतांप्रभवे नमः। ॐस्वभुवे नमः। ॐ विभवे नमः। ॐ घनश्यामाय नमः। ॐ जगत्कारणाय नमः। ॐ अव्ययाय नमः। ॐ बुद्धावताराय नमः। ॐ शान्तात्मने नमः। ॐ लीलामानुष विग्रहाय नमः। ॐ दामोदराय नमः। ॐ विराड्रूपाय नमः। ॐ भूतभव्यभवत्प्रभवे नमः। ॐ आदिदेवाय नमः। ॐ प्रह्लादपरिपालकाय नमः। ॐ श्रीमहाविष्णावे नमः। अष्टोत्तर शतनाम पूजां समर्पयामि।

धूप— **ॐ वनस्पति रसोत्पन्नो गंधाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥**

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यँ ग्रीष्म इध्मः शरद्धविः॥ *(अथर्ववेद १९.६.१०)*

ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम। श्रियँ वासय मे कुले मातरं पद्ममालिनीम्॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णावे नमः, धूपं आघ्रापयामि। *(अनुष्ठान पद्धति)*

दीपम्—आज्यं त्रिवर्ति संयुक्तं वह्निना योजितं मया। गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापह॥

ॐ तं यज्ञं प्रावृषा प्रौक्षन्पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये॥ (अथर्ववेद १९.६.११)

ॐ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले॥ (पञ्चम मण्डलस्य परिशिष्टम्)

ॐसपरिवाराय श्री महाविष्णवे नमः दीपं दर्शयामि। धूपदीपानंतरं आचमनीयं समर्पयामि।

नैवेद्यम्—देवस्याग्रे स्थलं संशोध्य गोमयेन मण्डलं कृत्वा तत्र शुद्धं पात्रं न्यस्य अभिघार्य निर्मलं हविः तदुपरि न्यस्य आज्येन द्रवीभूतं कृत्वा "ॐभूर्भुवः स्वः इति गायत्र्या प्रोक्ष्य वायु बीजं जप्त्वा निवेद्यान्नं संशोध्य दक्षिणहस्ते अग्निबीजं विलिख्य तेन हस्तेन संदह्य वामहस्ते अमृत बीजं विलिख्य तेन हस्तेन हविराप्लाव्य सुरभिमुद्रां बध्वा अमृतमयं भावयित्वा मल धातु रसांशं विभाज्य देवस्य निवेद्य ग्रहणेच्छां कुर्यात्। "**सत्यं त्वर्तेन परिषिञ्चामि**" इत्यनेन परिषिच्य हस्तभ्यां पुष्पैः देवस्य जिह्वार्चीरुचिं निवेद्ये निपात्य निवेदयामि भवते जुषाणेदं हविर्विभो इति वामहस्तेन ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादि मुद्राः प्रदर्शयेत्। अन्नात् मलांशं धात्वंशं च परित्यज्य रसांशं देवस्य वदनार्चिषि समर्पयेत्। वं अबात्मना इति नैवेद्य मुद्रां प्रदर्शयेत्। नैवेद्य सारं रससमर्पणात् जातं सुधांशं देवे समर्प्य अंजलिमुद्रा बध्वा नैवेद्यसारसमर्पित जातामृतमय सुधांशुना पुनः पुनः वर्धितं देवं हृन्मूर्ति देवं ध्यायन् स्व स्व मूलमंत्र यथा शक्ति जप्त्वा।

कलश के आगे स्थल शुद्धि कर गोमय से शुद्धि कर चतुरस्र मण्डल को बनाकर उस पर शुद्ध पात्र को रखें। पात्र में थोडा सा घी डालें। उस पात्र में निर्मलहविस् (नैवेद्य पदार्थ को) को घी पर रखें। उस हविस् को घीं से भिगोयें।

गायत्री मंत्र से नैवेद्य का प्रोत्क्षण करें—"यं यं यं" इस वायुबीज को जपकर हविस् को शुद्ध करें। दाहिने हाथ में (रं) अग्नि बीज को लिखकर उस अग्नि से हविस् में विद्यमान कश्मलों को जलाऐं (कल्पना करें)। बायें हाथ में अमृत बीज (वं) को लिखकर उस हाथ से हविस् को शुद्ध करें (घोने

की कल्पना करें) ॐनमो नारायणाय। इस मन्त्र का आठ बार जप करें। हविस् को मंत्रमय एवं अमृतमय छोने की कल्पना करें। सुरभि मुद्रा से अमृतमय हुआ है मानकर मलांश, धातु का अंश एवं रसांश को अलग अलग करने की कल्पना करें। देवता को नैवेद्य ग्रहण करने की इच्छा उत्पन्न करती चाहिये। **"सत्यं त्र्तेन परिषिचामि"** इससे परिषिञ्चन करें। दोनों हाथों में पुष्प लेकर देवता का जीभ नैवेद्य तक पहुँचने का चिन्तन करें।

"निवेदयामि भवते जुषाणेदं हविर्विभो" कहकर नैवेद्य स्वीकार करने की प्रार्थना करते हुए। बायें हाथ से ग्रास मुद्रा (जैसे बछडे को घास देते है) को दिखाकर दाहिने हाथ से प्राणाय स्वाहा-अङ्गुष्ठ कनिष्ठिका मिलाकर अपानाय स्वाहा-अङ्गुष्ठ एवं तर्जनी मिलाकर व्यानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर उदानाय स्वाहा-अङ्गुष्ठ एवं अनामिका मिलाकर समानाय स्वाहा। सभी अङ्गुलियों को मिलाकर। अन्त से मलांश एवं धातु के अंध को अलग कर केवल रसांश को अर्पित करने की कल्पना करें।

"वं अबात्मना नैवेद्यं कल्पयामि" कहकर नैवेद्य मुद्रा का प्रदर्शन करें (अङ्गुष्ठ एवं अनामिका मिलाने से नैवेद्य मुद्रा)। नैवेद्य का सार जो रसांश था उसका भी सार अमृत का जो अंश है उसे देवता को समर्पित कर, हाथ जोडकर, नैवेद्य के सार अमृत से भगवान् को बढते हुए मानकर उसे हृदय में स्थित मानकर यथाशक्ति "ॐनमो नारायणाय"—इस मूल मंत्र का जप करें।

ॐ स्वा॒दोःस्वादी॑यः स्वा॒दुना॑ सृजा॒ सम॒दः सु मधु॒ मधु॑ना॒भि यो॑धीः ॥ *(अथर्ववेद ५.२.३)*

ॐ आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं पि॒ङ्गलां॑ पद्ममालि॑नम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

यथा संभव नैवेद्यं निवेदयामि। अमृतापिधानमसि कहकर उत्तरापोशन देवें। हस्तप्रक्षालनार्थे जलं समर्पयामि। गण्डूषार्थे जलं समर्पयामि। शुद्धाचमनार्थे जलं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि।

ताम्बूल—ॐ तस्मा॒दश्वा॑ अजायन्त॒ ये च॒ के चो॑भ॒यादतः। गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ ॥ *(अथर्ववेद १९.६.१२)*

पूगीफल समायुक्तं नागवल्या दलैर्युतं। चूर्ण कर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥ ॐसपरिवाराय श्री महाविष्णावे नमः। क्रमुक तांबूलं समर्पयामि।

नीराजन (आरति)—ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॒त॒ ऋच॒: सामा॑नि जज्ञिरे।

छन्दो॑ ह जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत॥ *(अथर्ववेद १९.६.१३)*

ॐ एह या॑तु॒ वरु॑ण॒: सोमो॑ अ॒ग्निर्बृह॒स्पति॒र्वसु॑भि॒रेह या॑तु।

अ॒स्य श्रि॒यमु॑प॒संया॑त॒ सर्वे॑ उ॒ग्रस्य॑ चे॒त्तु: संम॑नस: सजाता:॥ *(अथर्ववेद ६.७३.१)*

ॐसपरिवाराय श्री महाविष्णावे नमः। मङ्गल नीराजनं समर्पयामि।

मंत्रपुष्प—ॐ स॒हस्र॑बाहु॒: पुरु॑ष: सहस्रा॒क्ष: स॒हस्र॑पात्। स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम्॥ *(अथर्ववेद १९.६.१)*

ॐ मू॒र्ध्नो दे॒वस्य॑ बृ॒ह॒तो अं॒शव॑: स॒प्त स॑प्त॒ती:। राज्ञ॒: सोम॑स्याजायन्त जा॒तस्य॒ पुरु॑षा॒दधि॥ *(अथर्ववेद १९.६.१६)*

ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॒त॒: संभृ॑तं पृषदा॒ज्य॑म्। प॒शूँस्ताश्चं॑क्रे वाय॒व्या॑न् आर॒ण्या ग्राम्याश्च॒ ये॥ *(अथर्ववेद १९.६.१४)*

ॐ आ॒र्द्रां य॒: करि॑णीं य॒ष्टिं सु॒वर्णां हेम॒मालि॑नीम्। सूर्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥ *(पञ्चम मण्डलस्य परिशिष्टम्)*

ॐसपरिवाराय श्री महाविष्णावे नमः। मंत्रपुष्पं समर्पयामि।

प्रदक्षिणा नमस्कार—यानि कानि च पापानि जन्मांतर कृतानि च। तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे॥ *(देवपूजा-स्मृति संग्रह)*

ॐ स॒प्तास्या॑सन्परि॒धय॒स्त्रि: स॒प्त स॒मिध॑: कृता:। दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अ॒बध्न॒न्पुरु॑षं प॒शुम्॥ *(अथर्ववेद १९.६.१५)* **ॐ तां म॒ आव॑ह जातवेदो ल॒क्ष्मीमन॑पगा॒ मिनी॑म्। यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा॑न् वि॒न्देयं॒ पुरु॑षान॒हम्॥**

(पञ्चम मराडलस्य परिशिष्टम्)

ॐ सपरिवाराय श्री महाविष्णावे नमः। प्रदक्षिणा नमस्कारान् समर्पयामि।

प्रसन्नार्घ्य—**ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥**

इदमर्घ्यं, इदमर्घ्यं, इदमर्घ्यम्। (कहकर तीन बार पुष्पमिश्रित जल छोड़ें।)

सर्वोपचार पूजनम्—ॐ छत्रं समर्पयामि। चामरेण वीजयामि। गीतं गायामि। नाट्यं नटामि। आंदोळिकामारोहयामि। अश्वमारोहयामि। गजमारोहयामि। समस्त राजोपचार देवोपचार पूजां समर्पयामि।

ॐ मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः। राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि॥ *(अथर्ववेद १९.६.१६)*

ॐ यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत्॥ *(ऋग्वेद-पञ्चम मराडलस्य परिशिष्टम्)*

ॐ सपरिवाराय श्री महाविष्णावे नमः। सर्वोपचार पूजां समर्पयामि।

प्रार्थना—**विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकोत्पात शमनं नमामि पुरुषोत्तमम्॥**

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ *(पौराणिकम्)*

ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना॥ *(श्री भगवद्गीते)* ॐ सपरिवाराय श्री महा विष्णावे नमः। अनेन पूजनेन सपरिवारः श्री महा विष्णुः प्रीयताम्। षोडशोपचार पूजनं संपूर्णम्।

बलि प्रदान विधान—पूजन के बाद बलि प्रदान करें। यजमानः प्रतिबलिं संकल्प्य साक्षतजलं त्यजेत्। यजमान प्रत्येकबलि का संकल्प कहकर

अक्षत सहित जल छोडें। अग्न्यायतनस्य समंतात् दिक्षु माषभक्त कूष्माण्ड बलीन् दिक् पालेभ्यो दद्यात्। यज्ञ शाला के चारों अडद चावल कद्दू के बलि को दिक् पालकों को देना चाहिये। प्रत्येक बलि में दीप लजायें। १. पूर्व में चन्द्र को बलि प्रदान करें।

ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्॥
हुवे नु शक्रं पुरुहूतमिन्द्रं स्वस्ति न इन्द्रो मघवान् कृणोतु॥ (अथर्ववेद ७.८६.१)

इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्तकूष्माण्ड बलिर्नमम। भो इन्द्र दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि पूर्वाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पूर्वाभिमुख छोडना चाहिये।

२. आग्नेय दिश में अग्नि को बलिप्रदान करें।

ॐ अग्निं दूतं वृणीमहे होतारं विश्व वेदसम्। अस्य यज्ञस्य सुक्रतुं॥ (अथर्ववेद २०.१०१.१)

अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो अग्ने दिशं रक्ष बलिं क्षुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि आग्नेयाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को आग्नेयाभिमुख छोडना चाहिये।

३. दक्षण दिशा में यम को बलिप्रदान करें।

ॐ यमाय सोमः पवते यमायं क्रियते हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥ (अथर्ववेद १८.२.१)

यमाय साङ्गाय सपरिवाराय सायुधाय सशक्ति काय एष माषभक्तकूष्माण्ड बलिर्नमम। भो यम दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि दक्षिणाभिमुखस्त्जेत्। इतना कहकर फूल अक्षत जल को दक्षिणाभिमुख छोडना चाहिये।

४. नैऋत्य दिशा में निऋति को बलिप्रदान करें।

ॐ यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत्।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः ॥ (अथर्ववेद ६.६३.१)

निऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो निऋते दिशां रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षत जलानि नैऋत्याभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल नैऋत्याभिमुख छोडना चाहिये।

५. पश्चिम दिशा में वरुण को बलिप्रदान करें।

ॐ आप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु ॥ (अथर्ववेद ७.८३.१))

वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो वरुण दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि पश्चिमाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पश्चिमाभिमुख छोडना चाहिये।

६. वायव्य दिशा में वायु को बलिप्रदान करें।

ॐ गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे ॥ (अथर्ववेद ४.२०.१०)

वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो वायो दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य ायुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि वायव्याभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को वायव्याभिमुख छोडना चाहिये।

७. उत्तर दिशा में सोम को बलिप्रदान करें।

ॐ अस्मिन् वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः।
इममादित्या उत विश्वे च देवा उत्तरस्मिन् ज्योतिंषि धारयन्तु॥ (अथर्ववेद १.९.१)

सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो सोम दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि उत्तराभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को उत्तराभिमुख छोडना चाहिये।

८. ईशान्य दिशा में ईशान को बलिप्रदान करें।

ॐ मा नो मर्ता अभि द्रुहन् तनूनामिन्द्र गिर्वणः। ईशानो यवया वधम्

ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो ईशान दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेकर्ता शंतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि ऐशान्यभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जे ईशान्याभिमुख छोडना चाहिये।

९. इन्द्रेशानयोर्मध्ये ब्रह्म बलिदान पूर्व एवं ईशान्य दिशा के बीच में ब्रह्मा का बलिदान करें।

ॐ ब्रह्म जज्ञानं प्रथमं पुरताद् वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च येनिमसंतश्च वि वः॥ (अथर्ववेद ४.१.१)

ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो ब्रह्मान् दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि पश्चिमाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पश्चिमाभिमुख छोडना चाहिये।

१०. पश्चिम एवं नैऋत्य के बीच में अनन्त को बलिप्रदान करें। आयङ्गौः सार्पराज्ञी अनन्तो गायत्री अनन्त प्रीत्यर्थे बलिदाने विनियोगः।

ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ॥ (अथर्ववेद ६.३१.१)

अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष माषभक्त कूष्माण्ड बलिर्नमम। भो अनन्त दिशं रक्ष बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि पूर्वाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पूर्वाभिमुख होकर छोडना चाहिये।

नवग्रह बलि—१. पूर्व में अधिदेवता प्रत्यधिदेवता सहित सूर्य को बलिदान करें। अधिदेवता प्रत्यधिदेवता सहित आदित्य प्रीत्यर्थे बलिदाने विनियोगः।

ॐ उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्दुदत्रिः ॥ (अथर्ववेद १३.२.३६))

आदित्याय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अधिदेवता अग्नि प्रत्यधिदेवता रुद्रसहिताय इमं सदीपमाषभक्तकूष्माण्डबलिं समर्पयामि। इदं न मम। भो आदित्य बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षंतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजनानि पूर्वाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पूर्वाभिमुख छोडना चाहिये।

२. आग्नेय में अधिदेवता प्रत्यधिदेवता सहित सोम को बलिदान करें। अधिदेवता प्रत्यधिदेवता सहित सोम प्रीत्यर्थे बलिदाने विनियोगः।

ॐ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ (अथर्ववेद २०.१३७.४)

सोमाय साङ्गाय सपरिवाराय सायधाय सशक्तिकाय अधिदेवता अप प्रत्यधिदेवता गौरीसहिताय इमं सदीपमाषभक्त्कूष्माण्डबलिं समर्पयामि। इदं न मम। भो

सोम बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि पूर्वाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को पूर्वाभिमुख छोडना चाहिये।

३. दक्षिण में अधिदेवता प्रत्यधिदेवता सहित अङ्गारक को बलिदान करें। अधिदेवता प्रत्यधिदेवता सहित अङ्गारक प्रीत्यर्थे बलिदाने विनियोगः।

ॐ अग्निर्वासाः पृथिव्यं सितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु॥ (अथर्ववेद १२.१.२१)

अङ्गारकाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अधिदेवता भूमि प्रत्यधिदेवतात स्कन्दसहिताइमंसदीपमाषभक्तकूष्माण्डबलिंसमर्पयामि। इदं न मम। भो अङ्गारक बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि उत्तराभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को उत्तराभिमुख छोडना चाहिये।

४. ईशान्य में अधिदेवता प्रत्यधिदेवता सहित बुध को बलिदान करें। अधिदेवता प्रत्यधिदेवता सहित बुध प्रीत्यर्थे बलिदाने विनियोगः।

ॐ कपृन्नरः कपृथमुद्दधातन चोदयंत खुदत वाजसातये।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाधं इह सोमपतये॥ (अथर्ववेद २०.१३७.२)

बुधाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अधिदेवता विष्णु प्रत्यधिदेवता पुरुष सहिताय इमं सदीपमाषभक्तकूष्माण्डबलिं समर्पयामि। इदं न मम। भो बुध बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि दक्षिणाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को दक्षिणाभिमुख छोडना चाहिये।

५. उत्तर में अधदेवता प्रत्यधिदेवता सहित बृहस्पति को बलिदान करें । अधिदेवता प्रत्यधिदेवता सहित बृहस्पति प्रीत्यर्थे बलिदाने विनियोगः।

ॐ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः।

इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु॥ (अथर्ववेद ७.५१.१)

बृहस्पते साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अधिदेवता इन्द्र प्रत्यधिदेवता ब्रह्मसहिताय इमं सदीपमाषभक्तकूष्माण्डबलिं समर्पयामि। इदं न मम। भो बृहस्पते बलिं भुंक्ष्व मम यजमानस्य सकुटुंबस्य आयुः कर्ता क्षेमकार्त शांतिकर्ता पुष्टिकर्ता वरदो भव। इति पुष्पाक्षतजलानि दक्षिणाभिमुखस्त्यजेत्। इतना कहकर फूल अक्षत जल को दक्षिणाभिमुख छोडना चाहिये।

